lोकप्रियसाहित्यग्रन्थमाला - 35

पं. प्रेमनारायणद्विवेदिरचनावलिः

द्वितीयो भागः

# सप्तशतीसङ्ग्रहः


प्रधानसम्पादकः

**राधावल्लभत्रिपाठी**

कुलपतिः

सम्पादकः

**डॉ. ऋषन्भारद्वाजः ( ऋषभः )**

संस्कृतविभागः, डॉ. हरीसिंहगौरविश्वविद्यालयः

सागरम् ( म.प्र. )



**राष्ट्रिय संस्कृत संस्थानम्**

**( मानित विश्वविद्यालयः )**

नवदेहली

प्रकाशकः

कुल-सचिवः,

**राष्ट्रिय संस्कृत संस्थानम्**

(मानित विश्वविद्यालयः)

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी,

नई दिल्ली-110058

ईपीएबीएक्स : 28524993, 28521994, 28524995

तार : संस्थान

ई मेल : rsks@nda.vsnl.net.in

वेबसाईट : www.sanskrit.nic.in



© राष्ट्रियसंस्कृतसंस्थानम्



संस्करण : 2012

मूल्यम् : रु. 135.00

ISBN : 978-93-82091-07-3

मुद्रकः

**डी.वी. प्रिंटर्स**

97-यू.बी. जवाहर नगर, दिल्ली-110007

# पुरोवाक्

वाग्देव्याः सरस्वत्या वरदपुत्रो राष्ट्रपतिसम्मानितः पण्डितप्रेमनारायणद्विवेदिमहोदय आजीवनं सुरभारत्याः सेवां समुपासनां च कृतवान्। किमधिकं देवलोकगमनात् पूर्वस्मिन् दिवसेऽपि तेन पद्यानि विरचितानि। अतीव विशालस्तस्य रचनासंसारः। हिन्दीभाषायाः कवीनां ग्रन्थानां संस्कृते भाषान्तरणं तस्य मुख्यं वैशिष्ट्यम्। सर्वमाहत्य तेन प्रायः एकविंशतिसहस्रमितानि ( 21000 ) पद्यानि विरचितानि। अनेन तस्य देववाणीसेवा नितरां स्पष्टीभवति। कृतेऽपि भूरि परिश्रमे स जीवने तथा-विधां ख्यातिं न प्राप्तवान् तथापि ब्राह्मणोचितसन्तोषः तस्य जीवने आरम्भादेव आसीत्। तस्य काव्यकरणे प्रवृत्तिः केवलं 'स्वान्तःसुखाय तुलसी रघुनाथगाथा' इत्युक्तिमनुसरति। साम्प्रतमपि तस्य सर्वाः कृतयो न प्रकाशिताः। तस्य रचनासु काश्चन एव प्रकाशिताः सन्ति। अत एव तस्य रचनाः प्रकाशयितुं सङ्कल्पनेयम्। तदनुसारेण प्रेमनारायणद्विवेदिरचनावल्याः प्रथमो भागः 'काव्यसङ्ग्रहः' इति नाम्ना प्रकाशितः।

सप्तशतीसङ्ग्रहनाम्ना महाकवरेस्य द्वितीयोऽयं भागः प्रकाश्यते। अत्र सदुक्तिसप्तशती सौन्दर्यसप्तशती चेति सप्तशतीद्वयं प्रकाशतामुपगच्छति। सौन्दर्यशप्तशती चिरात् प्रकाशितपूर्वा सती अपि सम्प्रति दुर्लभा। महाकवेः बिहारिणः सप्तशत्याः संस्कृते समच्छदोऽनुवादोऽयं नूनं संस्कृतभाषाया वैशिष्ट्यं द्योतयति। सदुक्तिसप्तशत्याः केचन अंशाः पूर्वं दूर्वापत्रिकादौ प्रकाशिताः। सम्प्रति ग्रन्थोऽयं समग्रतया प्रकाश्यत इति स्यादेवेदं सहृदयकोकलोकस्य महते मनस्तोषाय।

वस्तुतः पं. द्विवेदी प्रथमं तावत् सहृदयः ततश्च कविः। अतीवकरुणापूर्णहृदयोऽयं भगवदाराधने निरतः सन् स्तुतिकुसुममालां



रचितवान्। सामाजिक-दैशिक-वैदेशिक-विषयेषु सचेतः सन् लघुमौलिककाव्यानि विरच्य स्वकीया भावनाः प्रकटीकृतवान्। अन्यासां भाषाणां कवीनां मनोहरकाव्यानां गीर्वाणवाचा अनुवादः अस्मै मोदावहो विषयो भवति स्म। अत एव भाषान्तरकरणे सुदक्षस्याऽस्य बहूनि विद्यन्ते अनूदितलघुकाव्यानि। वैदिकसूक्तानां संस्कृतेऽनुवादः किमपि वैशिष्ट्यं भजते। तत्तु सञ्ज्ञापयति कवेरस्य वेदिकज्ञानं, संस्कृतभाषादक्षतां, भाषान्तरकरणपटुतां, भारतीयसंस्कृतिं प्रति अगाधश्रद्धाञ्च।

श्रीऋषन् भारद्वाज इतः पूर्वं महाकविम् अनुवचन-कवन-चातुरी-मर्मज्ञं द्विवेदिवर्यमेनमधिकृत्य अनुसन्धानकार्यं सम्पादितवान्। अस्मिन् निबद्धस्नेहो द्विवेदिवर्योऽपि अप्रकाशितं स्वसाहित्यं पार्थिवशरीरत्यागात् पूर्वमस्मै समर्पितवान्। तस्य विशालवाङ्मयं सम्पाद्य पं. प्रेमनारायणद्विवेदिरचनावल्या अस्याः सम्पादकत्वमनेनाङ्गीकृतमित्ययमभिनन्दनीयः।

-राधावल्लभः त्रिपाठी

कुलपतिः

# सम्पादकीयम्

विद्याविनयसम्पन्नः मध्यप्रदेशस्थ- सागरनगरवास्तव्यः राष्ट्रपतिसम्मानेन सभाजितः पं. प्रेमनारायणद्विवेदी वीणावादिन्याः देव्याः सरस्वत्याः ''**मौनसाधक**'' आसीत्। वाराणसीतः उच्चशिक्षामवाप्य गृहं समागतः द्विवेदिवर्यः स्वकीयाजीविकारूपेण अध्यापनकार्यम् अङ्गीकृतवान्। करुणामयहृदयस्यास्य कवेः वैदिकसंस्कृतौ ईश्वरे च आसीत् दृढीयान् विश्वासः। ''**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च**'' इति शास्त्रवचनमनुसृत्य अनेन महात्मना वाराणस्यां गुरुभ्यः वेदशास्त्राणि अधीतानि। अधीतानां शास्त्राणां गृहेऽपि सततं स्वाध्यायं कुर्वता तेन ''**स्वाध्यायान्मा प्रमदः**'' इति वेदवचनम् आजीवनमाचरितम्। हस्तसञ्चालनसहितं सस्वरं वेदपाठं स न केवलं जानाति स्म करोति स्म च अपितु शिष्यान् अध्यापयति स्म। सः प्रायः वैदिकसाहित्यं वेदान्तग्रन्थान् च अनुशीलयति स्म। अस्मिन्नेव क्रमे तेन केषाञ्चन वैदिकसूक्तानां संस्कृतेन सुष्ठु अनुवादः कृतः।

यथा प्राच्यसाहित्यानुशीलने तस्य सहजा प्रवृत्तिः आसीत् तथैव अन्यासां भाषाणां काव्यानां संस्कृतेन अनुवादे तस्य महती रुचिः आसीत्। तस्य अनूदितकाव्यानां मौलिककाव्यानां च सर्वमाहत्य पद्यानि एकविंशतिसहस्राद् **(21000)** अधिकानि सन्ति। श्री तुलसीकवेः श्रीसूरदासकवेश्च ग्रन्थानामनुवादः द्विवेदिवर्यस्य अनुवादकर्मणि दक्षतां नितरां प्रमाणयति। श्रीमद्रामचरितमानसस्य तेन कृतः संस्कृतानुवादः अनुवादपुरस्कारेण (2009ई.) पुरस्कृतः। श्रीतुलसीकवेः श्रीसूरदासकवेश्च येषां ग्रन्थानां तेन अनुवादः कृतः तेषु श्रीमद्रामचरितमानसं विहाय सर्वे अप्रकाशिताः सन्ति।

द्विवेदिवर्यस्य अप्रकाशितग्रन्थानां प्रकाशनस्य सङ्कल्पनायां पं. प्रेमनारायणद्विवेदिरचनावल्याः प्रथमो भागः ''काव्यसङ्ग्रहः''



राष्ट्रियसंस्कृतसंस्थान- नवदेहलीतः प्रकाशितः। अस्यामेव सङ्कल्पनायां द्वितीयोऽयं भागः प्रकाशमायाति ''सप्तशतीसङ्ग्रहः'' इति नाम।

अस्मिन् भागे सप्तशतीद्वयं प्रकाश्यते- सदुक्तिसप्तशती सौन्दर्यसप्तशती च।

**सदुक्तिसप्तशती** –यथा सूर्यः स्वप्रकाशरश्मिभिः जगत् प्रकाशयति तमश्चाऽपहरति तथैव सन्तः महापुरुषाः च ज्ञानपूर्णवचोभिः लोकम् उद्धरन्ति। भारतवर्षे वाल्मीकि-व्यास-महावीर-बुद्ध-रामानुज-निम्बार्क-वल्लभाचार्य-मध्व-चैतन्य-ज्ञानेश्वर-नानक-कबीर-सूर-तुलसी- तुकाराम-रामदास-रामतीर्थ-रामकृष्णपरमहंस-विवेकानन्द-प्रभृतयः अगणितसन्तः महापुरुषाः अभवन्। तेषां सन्तां महापुरुषाणां च पावनाचरणैः ज्ञानेन प्रतिभया च भारतदेशः ''विश्वगुरुः'' इति-उपाधिम् अवाप। एवमेव पृथिव्यां बहवोऽन्येऽपि सन्तः महापुरुषाः अभवन्। ईशा रसूलः सुकरातः प्लेटो अरस्तुः फ्रांसिसः लात्शे कन्फ्युशियसः चेत्यादयः वैदेशिकाः महापुरुषाः स्वकीयोपदेशैः जनान् सदाचारं कर्तुं प्रेरितवन्तः। सज्जनानां सङ्गतिरपि जनानां सर्वविधं हितं साधयति। तद्यथोक्तं नीतिशतके-

'जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिः कथय किं न करोति पुंसाम्।।'

'जातस्य हि ध्रुवो मृत्युः' इति वचनानुसारं सज्जनानामपि शरीराणि व्यतीते काले नष्टानि भवन्ति किन्तु तेषां सदुपदेशाः देशकालसीमानमतिक्रम्य जनानां मार्गदर्शनं कुर्वन्ति। तेषां सद्वचनानि सूक्तयः सुभाषितानि च दुःखत्रयतापपीडितानां जनानां तापप्रशमनाय भवन्ति। महात्मनः बुद्धस्य सद्वचनानि श्रुत्वा लुण्ठका अपि सज्जनाः सञ्जाताः। सद्वचनानां भवत्येव एतादृशः प्रभावः।

श्रीहनुमानप्रसादपोद्दारः विश्वस्य महापुरुषाणां 2500 सदुक्तीनां 'सन्तवाणी' नाम्ना सङ्ग्रहमेकं समपादयत्। तेषु वचनेषु द्विवेदिवर्येण लोकोपयोगिनां 700 सूक्तीनां संस्कृतेन अनुवादः कृतः। तस्य ग्रन्थस्य ''सदुक्तिसप्तशती इति शीर्षकं तनैव दत्तम्।''

**सौन्दर्यसप्तशती –** हिन्दीसाहित्यस्य लब्धप्रतिष्ठः कविः बिहारी 'बिहारी सतसई' इति शृङ्गाररसप्रधानं काव्यम् अरचयत्। 'बिहारी सतसई' ग्रन्थस्य चारुत्वं वैशिष्ट्यं माहात्म्यं लोकप्रियत्वं च कियद् अस्ति इति तदधिकृत्य कृताः षष्टिः टीकाः साधु विज्ञापयन्ति। श्रीमते द्विवेदिवर्याय अपि एषा रचना भृशम् अरोचत। ततः तेन अस्य ग्रन्थस्य सरलः सरसः भावपूर्णः अलङ्कारसौन्दर्यमण्डितः छन्दोबद्धः अनुवादः कृतः। 'बिहारी सतसई' इत्यस्य रसपेशलकाव्यस्य संस्कृतानुवादं कृत्वा द्विवेदिवर्येण संस्कृतज्ञानां हिन्दीकाव्यरसिकानां महान् उपकारः कृतः। यद्यपि भाषातः अपरस्यां भाषायां भावग्रहणे अर्थग्रहणे च कियत् काठिन्यं भवतीति जानन्ति एव अनुवादकर्मणि कृतपरिश्रमाः जनाः तथापि श्रीद्विवेदिनः संस्कृतानुवादे भावः अर्थेन सह सम्यग् रूपेण अभिव्यक्तः भवति। अस्मिन् अनुवादे द्विवेदिवर्यः पूर्णरूपेण बिहारिकवेः मनोभावान् अनुगच्छति तस्मात् च प्रतिपद्यं सरसता वृद्धिं गता दृश्यते। अनुवादाय अनुष्टुप् आर्या इन्द्रवज्रा उपेन्द्रवज्रा उपजाति मालिनी मन्दाक्रान्ता शिखरिणी चेत्यादिच्छन्दांसि प्रयुक्तानि सन्ति।

शुभचिन्तकानाम् आग्रहवशात् कविः द्विवेदिवर्यः इमं ग्रन्थं ''सौन्दर्यसप्तशती'' नाम्ना प्राकाशयत् किन्तु इलाहाबादतः सञ्जाते अस्य ग्रन्थस्य प्रथमे प्रकाशने ( 1970 ई. ) मुद्रणगतानि बहूनि स्खलनानि आसन्। अतस्तद्गतानि स्खलनानि संशोध्य अस्य ग्रन्थस्य पुनः प्रकाशनं विधीयते। प्रथमे प्रकाशने प्रकाशक-कवि-द्विवेदिवर्येण यत् प्राक्कथनं लिखितं तद् अस्मिन् ग्रन्थे तथैव संयोजितमस्ति।

कवेः द्विवेदिवर्यस्य धर्मपत्न्याः आशीर्वादेन, कवेः सुपुत्रस्य शुभेच्छया, सागरस्थस्य डॉ. हरीसिंह गौर विश्वविद्यालयस्य



संस्कृतविभागस्याध्यक्षायाः प्रो. कुसुमभूरियादत्तायाः सत्परामर्शेन, प्राध्यापकस्य श्रीनौनिहालगौतमस्य सत्प्रयासैः च अस्य ग्रन्थस्य प्रकाशने सौकर्यं जातम्। अतः ते धन्यवादार्हाः सन्ति।

सदुक्तिसप्तशती सौन्दर्यसप्तशती च लोकस्य सहृदयानां रसिकानां च महते उपकाराय भविष्यतीति मामकीनः विश्वासः।

ऋषभ्भारद्वाजः

# सद्उक्तिसप्तशती

# सदुक्तिसप्तशती*

श्रीगणेशाय नमः

गजेन्द्रवदनं भक्त्या गौरीपुत्रं गणाधिपम्।
सगुणं च गुणातीतं भवग्रन्थिच्छिदं नुमः ।।1।।

त्वदधीना इमे लोका त्वदधीनं च शासनम्।
त्वदधीनं च सज्ज्ञानं तस्माद् सर्वाश्रयं नुमः।।2।।

सद्भिः प्रोक्तानि वाक्यानि सन्ति लोकेषु कोटिशः।
तेभ्यो हिताय संगृह्य संस्कृते वच्मि कानिचित्।।3।।

विशुद्धा हि महात्मानस्तदाचाराश्च पावनाः।
तद्वाचोऽन्तर्विशुद्ध्यर्थं पठामि च लिखामि च।।4।।

रेखां स्पृष्ट्वा यथा क्रीडन् बालश्चौरो कथ्यते।
हरिस्पर्शात्तथा लोके बन्धनं नाप्नुते जनः।।5।।

हरिं प्राप्य मनुष्याणां न रूपे परिवर्तनम्।
न प्रवृत्तिः परं तेषां क्वचिद् वर्ज्येषु कर्मसु।।6।।

यथा धावसि वस्तूनां लाभार्थं सर्वतो दिशम्।
व्याकुलश्चेत्तथा प्राप्तुं हरिं सर्वमवाप्स्यसि।।7 ।।

---

* श्रीहनुमान प्रसाद पोद्दारस्य 'सन्तवाणी' पुस्तके सङ्गृहीतानां सत्पुरुषवचनानां संस्कृतपद्यानुवादः।



एतदबाधितं सत्यं हृद्यवधारय चिन्तय।
त्वत्तो नहीश्वरो भिन्नो न दूरे न च दुर्लभः।।8।।

येनात्र प्रेषितोऽ पारे संसारे जटिले भवान्।
पूर्वमेव व्यवस्थां स कृतवान् भोजनस्य ते।।9।।

दीपं दृष्ट्वा पतङ्गोऽत्र नान्धकारे प्रवर्तते।
हरिं वीक्ष्य हि संसारे नैव भक्तो निवर्तते ।।10।।

सुरूपेऽपि कुरूपेऽपि सज्जने दुर्जने तथा।
ईश्वरोऽस्ति समः किन्तु त्याज्या दुर्जनसङ्गतिः।।11।।

साकारो वा निराकारः सगुणो निर्गुणोऽपि वा।
ईश्वरो मधुरो नित्यमास्वादो भजनेन च ।।12।।

केचिद्धसन्ति निन्दन्ति तिरस्कुर्वन्ति चापरे।
त्यजेल्लक्ष्यं न चेत् साधुर्जीवने सफलो हि सः ।।13।।

इक्षौ रसस्तिले तैलं नवनीतं पयोगतम्।
लभ्यते सर्वगं ब्रह्म साधनैरेव नान्यथा।।14।।

कायेन मनसा वापि भजनं चेन्न जायते।
वचसैव भजेदीशं सर्वं हरिमयं ततः।।15।।

जनसेवा हरेः पूजा कीर्तनं सत्यभाषणम्।
सच्चिन्तनं हरेश्चिन्ता त्रिविधं भजनं स्मृतम्।।16।।

पापकर्माणि सन्त्यज्य मनः कृष्णे नियोजय।
आयुःस्वल्पं न तर्केषु व्यर्थं नाशय मूर्खवत्।। 17।।

विषयेषु रतिश्चित्तदोषाश्चञ्चलतादयः।
न नश्येयुर्न नैराश्यं कुरु भक्त्या हरिं भज।। 18।।

भ्रान्तानपि जनान् प्रेम्णा सत्यमार्गे नियोजय।
व्यवहारो मृदुः श्रेयान् दण्डाद् दुर्जनेष्वपि ।। 19।।

शक्यते न प्रभुर्लब्धुमसङ्ख्यातैः सुसाधनैः।
तस्यैव कृपया सोऽयं लभ्यो भक्त्यैव केवलम्।। 20।।

विविधं शास्त्रं सूक्ष्मं प्रतिपादयन् हि विचक्षणो लोके।
तार्किकदृष्टौ मतिमान् भगवत्प्राप्तावनधिकारी।। 21।।

वचनं मधुरं क्रोधे मौनं दयाऽथ सापराधेऽपि।
कुर्वन्नेवं लोकोऽत्रैव देवत्वमाप्नोति।। 22।।

परमात्मकृपा नित्यं समा सर्वेषु जन्तुषु ।
यस्तु वाञ्छति तामाशु त्यागेनाऽऽप्नोति श्रद्धया ।। 23।।

हरिं हित्वा गुणान् दिव्यानज्ञो यः प्राप्तुमिच्छति।
ताश्चेष्टा बालवत्तस्य भक्त्यैव हि गुणाः स्थिराः ।। 24।।

स्वकार्यं प्रेक्षते प्राज्ञः परदोषानुपेक्षते।
दोषाणां दर्शनात् कार्यनाशो दोषा भवन्ति च ।। 25।।

बुभुक्षितो यथाऽन्नाय पिपासुश्च जलाप्तये।
व्याकुलो यतते लोकः प्रभुं प्राप्तुं यतेत सः।। 26।।

दर्शनात् परदोषाणां हृदि द्वेषो विजायते।
अशान्तिश्च सदा चित्ते वर्धते क्षुद्रतापि च।। 27।।



स्नेहं दयां च बालेषु वृद्धेषु दुःखितेषु च।
आश्रितेषु च वा कुर्यात् कृपां वाञ्छति यो हरेः।। 28।।

विरहज्ज्वालया यावन्न ज्वलते मानसं तव।
मोहनाननमाधुर्यं दुर्लभं तावदेव हि।। 29।।

प्रकाशितानि पापानि विधायापयशो ध्रुवम्।
प्रणश्यन्ति बुधस्तस्मात् स्वयमेव प्रकाशयेत्।। 30।।

यथा पापफलं कर्तुः प्रकाशयितुरेव तत्।
तस्माच्च परपापानि बुद्धिमान् न प्रकाशयेत्।। 31।।

पापवल्लीव सा जिह्वा कृष्णकीर्तनवर्जिता।
रोगयुक्ता च सा नूनं शतधा किं न भिद्यते।। 32।।

यत्सुखं हि मनोरोधे विषयेष्विह नास्ति तत्।
आत्मानुभवहीनो यो विषयाननुगच्छति।। 33।।

दुःखितान् प्राणिनो दृष्ट्वा दयां कुर्यान् न यो नरः।
स वै परमात्मनस्तस्य जायते कोपभाजनम्।। 34।।

आत्मश्लाघाभिमानश्च स्वार्थः क्रोधोऽसहिष्णुता ।
अनिष्टाचरणं चैव प्रेमतत्त्वे न सन्ति वै।। 35।।

तुभ्यं समर्पितं तेन परसेवाव्रतं सुखम् ।
दण्डदानं हरेः कार्यं हस्तक्षेपो न युज्यते ।। 36।।

सर्वेषां च हितं कुर्यात् कृते द्वेषेऽपि तत्कुरु।
स एवोत्तरदस्तस्य वृथा चित्तं न खेदय ।। 37।।

आरोग्यं चित्तशान्तिश्च हास्यं सात्त्विकता मुखे।
सत्यमेतद्धि सौन्दर्यं नान्यद् वस्तु विशेषतः ।।38।।

धन्यवादान् प्रशंसां च फलं चान्यद् य इच्छति।
कृतस्य प्रतिकारार्थं भाग्यहीनो ह्यसौ वणिक् ।।39।।

निन्दां परस्य न करोति निजां प्रशंसा-
मानन्ददः परसुखे च सुखाभिमानी।
दीने दयां सरलतां च समादरं च
वृद्धेषु यः प्रकुरुते स हि साधुरत्र।।40।।

कपटं विहाय हृदयाद् भव सरलः प्राणिवर्गेषु।
कार्याणि तेऽप्यकस्मात्तदा भविष्यन्ति सरलानि ।।41।।

अपि विस्मृत्य शास्त्राणि पुनः स्मर्तुं जनः क्षमः।
भ्रष्टश्च यः सदाचारात् तदुत्थानं सुदुर्लभम् ।।42।।

पीडयित्वा परान् यश्च करोति धनसञ्चयम्।
रोदनध्वनिना सर्वं मेघवत्तस्य नश्यति।।43।।

दारिद्र्यं हि वरं पुंसां सदाचारेण जीवताम्।
विपुला धनसम्पत्तिरधर्मात् सञ्चिता वृथा ।।44।।

एके सन्ति जना लोके धर्मे कपटकारिणः।
वञ्चनामेव कुर्वन्ति तेभ्यः के पापिनोऽधमाः।।45।।

दुःखेषु दुःखी च सुखी सुखेषु
लौहस्वभावः पुरुषः स लोके।



दुःखे सुखी यः स सुवर्णतुल्यो
द्वयोः समो रत्नसमः प्रशस्तः ।।46।।

रूपं प्रतिभा लेखा व्याख्यानानि गृहं कुलं कीर्तिः।
इह वा महाप्रतिष्ठा विडम्बनैवोच्चसिद्धान्ते।।47।।

उपदेश्या जनाः प्राज्ञैर्नित्यं जिज्ञासवश्च ये।
अन्ये परोपदेशाय लग्नाः समयनाशकाः।।48।।

स्वीकृत्य परकार्याणि कुर्यादेव स्वकार्यवत्।
ग्लानिस्तत्र न कर्तव्या यावत् कार्यं न सिद्ध्यति।।49।।

आसक्ता ये प्रशंसासु विरक्ता अपि बन्धनम्।
आयान्ति यस्तु दोषान् स्वान् वदेद् गेहेऽपि मुच्यते।।50।।

विषयाणां हि यो दासो भूत्वा वाञ्छति निर्वृतिम्।
असम्भवं स लोकेऽस्मिन् सम्भवं कर्तुमिच्छति ।।51।।

न वाञ्छति स्वकल्याणं दुःखं पापफलं न च।
मन्यते न हरेर्भावं नोपदेशाय युज्यते।।52।।

शास्त्राण्यभ्यस्य यो मोहाद् विहितं न समाचरेत्।
सा विद्या तस्य भाराय सङ्गाल्लाभो न कश्चन।।53।।

ऐन्द्रजालिकविद्या स्यादाकाशगमनादिकम् ।
न सा सिद्धिर्हि साधूनां सन्मार्गे यदि न स्थितिः ।।54।।

पापाद् ग्लानिः पिपासा च धर्मार्थं तु निरन्तरम्।
प्राणिभ्यश्चेह साहाय्यं कल्याणाय त्रयं स्मृतम् ।।55।।

दम्भाय भक्तिहीनश्चेद् वित्ताद्यैर्हरिमर्चति।
अच्युतो न हि गृह्णाति तामर्चामिन्दिरापतिः ।।56।।

लालित्येन च भाषाया वेषेणाडम्बरेण च ।
न प्रसीदति गोविन्दो बाह्यैरन्यैश्च साधनैः ।।57।।

एकाकी जायते जन्तुरेकाकी म्रियते तथा।
एकाकी सुखदुःखानि भुङ्क्ते कर्मफलानि च ।।58।।

एकः श्रेष्ठो दयालुर्मम परमहितो बन्धुरात्मा गतिश्च
स्वामी माता पिता वा निखिलशरणदःस्वाश्रयः सर्वरूपः।
सर्वस्वं मत्प्रियोऽसौ हृदयकुवलये राजमानो रमेशः
कुर्यादज्ञाननाशं त्रिभुवनविपिने रक्षतात् सर्वभीतेः ।।59।।

मृत्योः पूर्वं महात्मानं स्वात्मानं नैव मन्यताम्।
संसारेऽनन्तगर्तानि पतनाय मनस्विनाम् ।। 60।।

कुर्यादन्यानि कार्याणि श्वो वाऽन्यस्मिन् दिनेऽपि वा।
उपकारं हरेर्ध्यानं सद्यः कुर्याद् विचक्षणः ।।61।।

कृत्वा द्वेषं जगत्सर्वं रौरवं क्रियते नरैः।
प्रेम्णा स्वर्गादपि श्रेष्ठं जायते निखिलं हि तत् ।।62।।

जिह्वावेगावरोधे हि महत्त्वं वर्तते ध्रुवम् ।
मनसो ह्यवरोधे च वर्धते तत्ततोऽधिकम् ।।63।।

आशादासा नितरां दासा इवेह च दुःखिनो मनुजाः ।
येषामाशा दासी तेषां दासो हि संसारः ।।64।।



नित्यं परिवृतो दुःखैर्विषादैः क्लेशकारणैः ।
सदा यतस्व चित्तस्य शान्तये शान्तितः सुखम् ।।65।।

जीवे दयां दुःखनिवारणं च
कृत्वा सहायो भव दुर्बलानाम्।
दुःखानि शत्रोरपि नाशय त्वं
मनः प्रसादाय हरेश्च नित्यम् ।।66।।

दुःखान्नैव विभेतव्यं दुःखादनुभवः स्वयम्।
प्रवृत्तिः परदुःखानां वारणे तेन जायते ।।67।।

दुःखानां विनिवृत्तौ हि प्राणिनां सुखसम्भवः ।
मनः प्रसादस्तस्यापि प्रकाशश्च हरेस्तदा।।68।।

जननीजठरे बालो कुरुते पादप्रचालनं ह्यज्ञः।
न च गणयत्यपराधं माता तद्वत् प्रभुर्हि जीवानाम् ।।69।।

लोके ह्यावश्यकं कर्म प्रागेव कुरुते बुधः।
तच्च कर्म हरेर्भक्तिर्दुःखान् मोक्षस्ततो ध्रुवम्।।70।।

कुसङ्गाद् विरक्तिः सुसङ्गे प्रवृत्ति-
र्निरालस्य भावोऽप्रमादः शमश्च।
दमश्चेन्द्रियाणां च गीताद्यभावः
गुणाः सात्त्विकाः साधकानां प्रसिद्धाः।।71।।

न तुभ्यं समर्थोऽस्ति दुःखं प्रदातुं
विना कारणं कर्मणां कोऽपि लोके।
अवाप्तं हि चेत् तद् विजानीहि नूनं
त्वदन्यो न कश्चिन्निमित्तं हि तस्य।।72।।

यदा कोऽपि वैरं करोति प्रसह्य
तदा पश्य का तस्य हानिस्त्वयाऽभूत्।
न चैवं यदा तर्हि दुःखं न चित्ते
कुरु प्रेम तस्मिन् दयां मित्रभावम्।।73।।

कुर्यादज्ञः पापकर्म तद्दोषो न हि गण्यते।
विद्वान् ज्ञात्वाऽपि कुर्याच्चेत् सर्वैःसर्वत्र निन्द्यते।।74।।

वित्तार्थं तु प्रयत्नात् यान् जनाः कुर्वन्ति नित्यशः।
शतांशं परमार्थाय कुर्युः सम्पत्तिरुत्तमा।।75।।

सधनस्य गुणान् दिव्यान् उभौ चौरौ विलुण्ठतः।
अभिमानो हृदिस्थो यः प्रशंसां च करोति यः ।।76।।

मुखाद् विनिःसृतं वाक्यं शरः क्षिप्तो गतं वयः।
अज्ञानं च निवृत्तं यत् प्रत्यागच्छन्ति नो पुनः।।77।।
दुरुह्यान् नगान् यात्रिणो यान् हि मार्गे
विलोक्यैव पूर्वं य उत्साहहीनाः।
त एत्यैव पारं सुखं प्राप्नुवन्ति
विपत्तीरिवोत्तीर्य धैर्येण लोके ।।78।।

रम्या न जायते मूर्तिर्विना तक्षणकर्मणा।
दुःखैर्विना तथा नॄणां चित्तं सौम्यं न जायते ।।79।।

विपत्तिर्निकषः प्रेम्णो मित्राणां च कुटुम्बिनाम्।
दुःखे समादरः सेवा विना प्रेम न जायते।।80।।

आवश्यकं हि यत् कार्यं प्रागेव कुरुते बुधः।
तत् किं शृणु हरेर्भक्तिर्जीवनं सार्थकं यया।।81।।



अहङ्कारः परः शत्रुर्यस्यान्तर्विद्यते खलः।
प्रसह्य हृद्गतान् गुप्तं यो नाशयति सद्गुणान्।।82।।

भगवत्कृपया सर्वं भवतीति सुनिश्चितम्।
इत्यवगम्य लोकेस्मिन् नाभिमानात् परं व्रजेत्।।83।।

दीनानां भगवान् बन्धुर्विश्रुतो नाभिमानिनाम्।
अभिमानमतस्त्यक्त्वा तमेव शरणं व्रज ।।84।।

इच्छाजयी दरिद्रोऽपि नृप एव मतो मम।
इच्छादासो महासम्राड् दरिद्रोऽस्ति न संशयः ।।85।।

सज्जनान् गुणिनः प्राज्ञान् दृष्ट्वा श्रुत्वा सुखी भवेत्।
तादृशो भवितुं कुर्याच्चेष्टा ईश्वरलब्धये।।86।।

अनाथान्निर्गुणान् रुग्णान् विपद्ग्रस्तांश्च प्राणिनः।
न विद्विषेज्जनः कश्चिन् न स्यात्ते तादृशी स्थितिः।।87।।

प्रसन्नो न प्रशंसासु निन्दासु न च दुःखितः।
स्वकार्यनिरतो नित्यं लक्ष्यं प्राप्नोति निश्चितम्।।88।।

साधूनामथ शास्त्राणां न वचांसि शृणोति यः।
मार्गे मार्गे च धिक् शब्दं श्रोतुं परवशो हि सः ।।89।।

षोडशांशं दशांशं वा दीनेषु दुःखितेषु च ।
स्वार्जितस्य सुवित्तस्य शुद्ध्यर्थं वितरेत् सदा।।90।।

नान्यवार्तामवच्छिन्द्यान्न ब्रूयाद् वदतोर्द्वयोः।
कुर्यान्नात्मप्रशंसां च नाप्रियं च वदेत् क्वचित् ।।91।।

तिरस्कुर्वन् जनान् वाक्यैर्न ब्रूयादनृतं वृथा।
आज्ञावाक्यं च हुं कुर्वन् नान्यस्मै प्रवदेत् खलु ।। 92 ।।

किं ते प्रयोजनं नाथ किमर्थं निर्मितं जगत् ।
कश्चिदस्ति सुखे मग्नो दुःखार्तोऽन्यश्च रोदिति ।।93 ।।

सुखदुःखे विधात्रा यन्निश्चिते प्राप्स्यसि स्वयम् ।
लब्धमन्येन यत् किञ्चित्तत्र नैव मनः कुरु ।। 94 ।।

केचित् कर्म न कुर्वन्ति वदन्त्येव हि केवलम् ।
धर्माचारं परित्यज्य तर्कान् कुर्वन्ति यत्नतः ।। 95 ।।

प्रभोः प्रसादः प्राप्तव्यो जनैश्चिन्तामणिर्महान्।
विश्वप्रसन्नतां प्राप्तुं किन्तु धावन्ति वालिशाः ।। 96 ।।
नातिश्रमेण देहोऽयं क्षीणतां प्रतिगच्छति।
चिन्ताशोकभयक्रोधैश्चिन्तया च विपद्यते ।। 97 ।।

गृहे शयानस्य सहैव शेते
गन्तुश्च नित्यं चलतीव सार्धम्।
सदोपविष्टस्य सहैव तिष्ठे-
च्छायेव लोके खलु भाग्यमेतत् ।। 98 ।।

शेते भाग्यं शयानस्य सार्धं तिष्ठति तिष्ठतः।
गन्तुश्चलति लोकेस्मिन्नुद्योगी जयते सदा ।।99 ।।

सा विद्या या सदाचारे नियुङ्क्ते मानवान् सदा।
अधीत्य यद्यनाचारे प्रवृत्ताश्चेद् वृथा श्रमः ।। 100 ।।



यदा मे प्रयास्यन्ति दुःखानि नाशं
समस्ता अभीप्साश्च पूर्णा यदा मे।
तदा पूजयिष्ये हरिं राघवेन्द्र-
मिदं स्वात्मनो वञ्चनं केवलं ते ।। 101 ।।

द्वौ कर्णौ द्वे नेत्रे जिह्वात्वेकैव निर्मिता धात्रा।
श्रुत्वा दृष्ट्वा भूयः सारं वचनं वदेद् धीरः ।।102 ।।

निःसृतं न वचो यावन् मुखात्तावद् वशे तव।
यदा हि निःसृतं तस्य त्वमेव वशगो ध्रुवम् ।। 103 ।।

प्रभुं चिन्तामणिं त्यक्त्वा सर्वदा सर्वकामदम्।
जगत्तोषयितुं श्रान्ता वृथा धावथ वालिशाः ।। 104 ।।

ज्ञानं तद् यत् सदाचारे धर्मे वा योजयेज्जनान्।
विषयेषु रतिर्येन तदज्ञानं स्मृतं बुधैः ।। 105 ।।

न ब्रवीत्यधिकं प्राज्ञो न च निन्दां शृणोति च।
धैर्यात् करोति कार्यं स्वं यावल्लक्ष्यं न विन्दति ।। 106 ।।

ज्ञात्वा स्वल्पं पापं करोति किञ्चिदसत् कार्यम्।
पूर्वं भीतः पश्चान्निर्भयो भवति पतति शीघ्रम् ।। 107 ।।

प्रतिष्ठार्थं यशो लब्धुं शुभं कर्म करोति यः।
शीघ्रं भवति कर्तव्याच्च्युतो नात्मा प्रसीदति ।। 108 ।।

कृते कर्मणि कर्तव्य बुद्ध्या लोके सुखं भवेत् ।
तत् कृतं यदि कृष्णस्य प्रीत्यर्थं परमं सुखम् ।। 109 ।।

सद्गुणैः सुखमाप्नोति दुःखं दुर्गुणैर्नरः।
तस्मात् स्वदुर्गुणान् हित्वा यत्नं कुर्याद् गुणेष्विति।। 110।।

यो हि संन्यस्य संसाराल्लोके हस्तौ प्रसारयेत् ।
स पतत्युभयभ्रष्टो जनाः श्रद्दधते न तम् ।।111।।

औदार्यं विनयं भक्तिमानन्दं परमं पदम् ।
साधुसङ्गात् समाप्नोति निःशुल्कं सर्वदा नरः ।। 112।।

आवश्यकानि शस्त्राणि पराञ्जेतुं न चात्मनः।
सर्वा विद्या प्रतिष्ठार्थं हरेः प्राप्त्यै तु तज्जपः ।। 113।।

न शास्त्रपठनैर्लेखैः समालोचनयापि न।
लभ्यो विष्णुः परेशानो विना शुद्धिं निजात्मनः।। 114।।
उपदेशं वचोभिर्यः कुर्यान्नहि समाचरेत्।
तं हि धूर्तं विजानीयात् परान् भ्रंशयतीह सः।। 115।।

निरहङ्कारिणः प्राज्ञा धनिनो विनयान्विताः।
साधवश्चैव तत्वज्ञा बुधैः कृष्णप्रिया मताः।। 116।।

धीमान् को हरिभक्तिमान् सुचरितो बाह्ये रतिं यस्त्यजेत्
को वासौ धनवान् सदा नृहरिणा दत्तेन यस्तुष्यति।
दक्षः कस्तरणाय यः प्रचलितः संसारवारांनिधेः
नूनं कः कृपणो ददाति न हि यो दीनेभ्य इष्टं धनम्।। 117।।

प्रवासे परमं दुःखं निजदेशे सुखं महत् ।
तथा संसारतो दुःखं परात्मनि परं सुखम्।। 118।।



विविधा लालसा यस्य वर्धन्ते हृदये सदा।
क्व मैत्री क्व दया तस्य क्व भक्तिः क्व च सद्गुणाः।। 119।।

जीवनार्थे जलं स्वन्नं निवासार्थं गृहं लघु।
मर्यादार्थं च वासांसि रक्षेदन्यत् परित्यजेत् ।। 120।।

न निन्दां न स्तुतिं कुर्यान्नेच्छेत् किञ्चित् क्वचित् परात् ।
दूरी कुर्यात् स्वकान् दोषान् एष मार्गः स्वशान्तये।। 121।।

उदासीनः परहिते सोत्साहः स्वहिते च यः।
स कथं प्राप्नुयादीशं दीनबन्धुं दयानिधिम् ।। 122।।

अल्पाहारः स्वल्पनिद्रा संयमो मनसस्तथा।
उपकारो मितभाषित्वं कल्याणाय स्मृता बुधैः।। 123।।
संपूज्य विदुषो वृद्धान् सन्तो हृष्यन्ति मानसे।
कृत्वा निन्दां तथा मूर्खाः प्रसीदन्ति हसन्ति च।। 124।।

सज्जनान् निर्धनान् दृष्ट्वा तिरस्कर्तुं न युज्यते।
वस्तुतो धनवन्तस्ते नेतरे रत्नसाधकाः।।125।।

जायन्ते कोमलाः सिद्धास्तण्डुला मधुरा यथा।
तथैव पुरुषाः सिद्धा भक्तेः सिद्धौ भवन्ति हि ।। 126।।

अपकारप्रतीकारो नापकारेण संभवः।
यतितव्यमतस्तेषामुपकाराय मानवैः।। 127।।

नरो नार्चति लक्ष्मीशं सर्वदा सर्वकामदम्।
मर्त्यान् परवशो लोके धनिनोऽर्चति दम्भिनः।।128।।

विपत्तौ दारुणे दुःखे रोगे वान्नस्य संकटे।
भक्तः श्रीकृष्णचन्द्रस्य न धैर्याच्चलति क्वचित् ।।129।।

आचारशुद्धिः सद्बुद्धिः संसाराद् विरतिस्तथा।
पश्चात्तापः कृते पापे साधनान्युन्नतेर्ध्रुवम्।। 130।।

अन्यायार्जितं वित्तं करोति मलिनं मनः।
न्यायार्जितं च तन्नूनं निर्मलं चोन्मुखं हरेः।। 131।।

यस्त्वनित्यानि वस्तूनि प्राप्य गर्वेण माद्यति।
आत्मानमुन्नतं चान्यान् नीचान् यो वेत्ति सोऽधमः।। 132।।

सर्वज्ञो यः सहस्राक्षो हितं पश्यति ते यथा।
तथा द्रष्टुं न शक्नोषि स्वल्पज्ञस्त्वं द्विनेत्रवान्।। 133।।

स्वर्गःलब्धुं सुखार्थं वा हरिमर्चति यो नरः।
स्वपूजकः स विज्ञेयः परमार्थो न कश्चन।।134।।

सम्प्राप्तिरिह वस्तूनां कठिना न हि विद्यते।
यतस्व प्राप्तये तस्य येनेदं निर्मितं जगत्।।135।।

ज्ञानवैराग्यगर्वोऽयमुपहासाय ते सदा।
न तज्ज्ञानं न वैराग्यं नात्मलाभश्च कश्चन।।136।।

धर्मस्य लक्षणं सर्वैर्ज्ञेयं प्रेम परस्परम्।
न विरोधो न संघर्षो हिंसा द्वेषो भयं न हि।।137।।

समृद्धिर्विज्ञानं वसनमशनं ज्ञानमतुलं,
प्रसारः कार्याणामनवरतमाश्चर्यजनकः।
न सौहार्दं लोके जनयति जनानां हृदि यदा,
तदा सर्वं ज्ञेयं कृतमपि वृथा तद् विलसितम्।।138।।



उत्पन्ने तु फले पुष्पं पृथिव्यां पतति स्वयम्।
संवर्धिते च देवत्वे पशुत्वं नश्यति स्वयम्।।139।।

यावद् धर्मरसास्वादं न हि विन्दति मानवः।
कुतर्कान् कुरुते तावत् पश्चाच्छान्तिं समश्नुते।।140।।

नामान्यनन्तानि च तस्य रूपा-
ण्यनन्तभावाश्च हरेर्भवन्ति।
येनैव रूपेण च येन नाम्ना
य आह्वयेत्तं स शृणोत्यनन्तः।।141।।

रोदनं रुष्टता धाष्ट्र्यं हरेरग्रे बलं महत्।
बालस्येव हि भवेत्तस्य मातुरग्रे स्वभावतः।।142।।

वासनापवनो यावद् वाति ते हृत्सरोवरे।
तावन्न दर्शनं शौरेर्भविष्यति कदाचन।।143।।

प्रमोदन्ते यथा मत्स्या अगाधे हि सरोवरे।
प्रसीदति तथा नित्यं समाधौ संस्थितं मनः।।144।।

कामिनी संगतः कामः सावधानेऽपि वर्धते।
को गत्वा कज्जलागारे निष्कलङ्को निवर्तते।।145।।

स्वच्छे तु दर्पणे स्पष्टमाननं दृश्यते जनैः।
तथैव मानसे स्वच्छे दृश्यते भगवान् हरिः।।146।।

अतिसूक्ष्मीकृतं सूत्रं याति सूचीमुखे यथा।
तथा ह्यकिञ्चनं दीनं हरौ विशति मानसम्।।147।।

न हानिश्चेज्जले नौका नौकायां चेज्जलं न हि।
जगत्यस्तु जनः किन्तु जगत्तस्मिन् भवेन्न हि।।148।।

नास्ति भित्तावहङ्काररूपायां दर्शनं हरेः।
लोपे च सति तद्भित्याः प्रपञ्चोऽपि विलीयते।।149।।

यथा स्पष्टं मषीचिह्नं श्वेतवासःसु दृश्यते।
पवित्राणां तथा नॄणां स्वल्पो दोषोऽपि लक्ष्यते।।150।।

कामिनीकाञ्चनं माया यद्वशः परतन्त्रताम्।
जीवः सरति संसारे निबद्धो मोहबन्धने।।151।।
प्रेरिता येन सत्कार्ये विशन्ति बहवो जनाः।
नरे तस्मिन् विजानीयाद् विभूतिः परमात्मनः।।152।।

वित्तार्थं च सुताद्यर्थं रुदन्ति व्याकुला जनाः।
को रोदिति हरिं प्राप्तुं येनाऽसौ दृष्टिगोचरः।।153।।

जीवनं यौवनं स्वप्नः स्वल्पकालाय दृश्यते।
तस्माद् विद्वानहङ्कारं दूरतः परिवर्जयेत्।।154।।

विस्मृत्य बाह्यवस्तूनि हरिस्नेहरतः पुमान्।
स्वशरीरस्मृतिं त्यक्त्वा जायते तन्मयः शनैः।।155।।

ज्ञानोदये कृतं कर्म न कर्म खलु तत् स्मृतम्।
तत्कर्ता भगवानेव नह्यतःफलभागसौ।।156।।

पठ श्लोकसहस्राणि तावन्ति पुस्तकानि वा।
यावत्तं व्याकुलो भूत्वा न स्मरिष्यसि नाप्स्यसि।।157।।



आप्तवाक्येषु विश्वस्य कृत्वा कर्म च तादृशम्।
व्याकुलो मनसा प्रार्थ्य नियतं प्राप्यसेऽच्युतम्।।158।।

गमिष्यसि यथा प्राचीं प्रतीची दूरमेष्यति।
दूरं यास्यति संसारो धर्ममार्गं यथैष्यसि।।159।।

ज्ञानदीपं समुज्ज्वाल्य चिन्ताकज्जलवर्जितम्।
कृत्वार्तिक्यं च देवस्य भेदहीनोऽस्मि चिन्मयः।।160।।

पापानि तापांश्च निवारयन्ती
गङ्गा समुद्रं मिलनाय याति।
संसारबद्धांश्च विमोचयन्तः
सन्तः प्रसन्ना नृहरिं प्रयान्ति।।161।।

स्थूलं यदिह तत्सूक्ष्मे व्यक्तमव्यक्तमेव तत्।
दृश्यं बहिरदृश्यं तत् सगुणो यः स निर्गुणः।।162।।

गेहे द्वारे बहिश्चान्तर्वाचि कर्मणि मानसे।
हरिभक्तिं विना नान्यत् सतां किञ्चिद्धनं खलु।।163।।

ज्ञानं कर्म च भक्तिश्च सर्वं हरिमयं यतः।
शान्तिः क्षमा दया सत्यं वसन्ति हृदये सताम्।।164।।

सिद्धयो रञ्जनायैव न मोक्षाय कदाचन।
अहङ्काराच्च सम्मानात् साधकान् पातयन्ति ताः।।165।।

क्रीत्वा मदिरां मलिनां पीत्वा
नृत्यति यदि च जनो मत्तः।
भगवत्प्रेम्णो दिव्यां मदिरां
पीत्वा भवेत् कथं मौनः।।166।।

दृश्यते शर्करा यत्र माधुर्यं समवेहि तत्।
यश्चिदात्मा स लोकोऽयं हरेर्भिन्नं न किञ्चन।।167।।

यदत्र सुन्दरं किञ्चित् कृष्णांशात् तद्धि निश्चितम्।
विचिन्त्य लोचने लग्ने केकिपिच्छेऽतिसुन्दरे।।168।।

श्रीकृष्णमेकदा वीक्ष्य न हि दृष्टिर्निवर्तते।
तस्य रूपरसे स्नात्वा तत्रैव प्रविलीयते।।169।।
कुलकर्म कुलं चैव जगद् वा जीवमेव वा।
लोप्तुमिच्छसि चेद् भ्रातः कृष्णं वरय निर्भयः।।170।।

नवनीतस्य चौरस्त्वं मनो मे सर्वदा नवम्।
नयसे न कथं नाथ येन तत् त्वन्मयो भवेत्।।171।।

आलिङ्ग्य चरणौ नाथ परमानन्दमयं जगत्।
सेव्यसेवकभावोऽपि गतस्तत्र करोमि किम्।।172।।

मानाद् दूरतरं प्रयाति च सतां सङ्गे स्थिरं यन्मनो,
न स्थानं न पदं धनं च सदनं यो वा क्वचिद् वाञ्छति।
वृत्त्यर्थं न हि दीनता न वचनं दीनं श्रुतं यन्मुखान्,
नार्यो मातृसमाश्च यस्य नितरां साधुः स पूज्यो जनैः।।173।।

अयाचितं स्वतो लब्धं प्रसादं च हरेः सदा।
मत्वाऽऽनन्दमयं ध्यात्वा भुञ्जीतानन्दमाश्रितः।।174।।

आचारसहिता भक्तिरुत्तमो योग उच्यते।
सारं तत् सर्वसिद्धीनां वेदान्तस्य च सर्वदा।।175।।



रेखा अनन्ताश्च कृताः प्रवाहे
दृग्गोचरा नैव यथा भवन्ति।
तथैव बुद्धेर्मनसश्च शुद्धि-
र्विनात्मज्ञानं न हि चर्चया च।।176।।

प्राचीं प्रयाते खलु चित्रभानौ
तारागणो याति यथा विलोपम्।
भक्तेः प्रबोधे हृदये तथैव
कामादिदोषा न पुनर्भवन्ति।।177।।

यत्र भक्तिनिवासोऽस्ति सुखमय्यो दिशः खलु।
सुखं वर्षति धाराभिर्हरिस्तिष्ठति तत्र च।।178।।

धनलोभे नरो मग्नः कल्पान्तेऽपि न मुच्यते।
सर्वदा प्रमदासक्तः स्वात्मबोधं न विन्दति।।179।।

यः कृष्णशरणं प्राप्तो बलं प्राप्नोति सर्वतः।
कम्पते कलिकालश्च भवभीतिः पलायते।।180।।

भक्तानां पादयोः सर्वा विलुठन्ति हि सिद्धयः।
साधुर्भक्तिरसे मग्नो न हि पश्यति ताः खलु।।181।।

भक्तो यदा गच्छति यद्दिशायां
प्रयाति शान्तिः सह तद्दिशायाम्।
प्रसारयन्ती वसनानि मार्गे
नीराजनं चास्य समाचरन्ती।।182।।

दमः शमो द्वारि च सेवकाविव
निबद्धहस्तौ सततं च तिष्ठतः।
ऋद्धिश्च सिद्धिश्च सदा सुसेविके
विवेकदासो हरिभक्तिसद्मनि।।183।।

सर्वं निबद्धं मनसा चलेन
मनश्च बद्धुं कठिनं नरेण।
पराजिता देवगणा अनेन
तिष्ठन्तु नूनं कथमिन्द्रियाणि।।184।।

मनो गृह्णीत तेनैव मणिना भिद्यते मणिः।
भवितुं तच्च शक्नोति कृपया परमात्मनः।।185।।
मनसो बोधकं नित्यं साधकं मनसो मनः।
बाधकं त्वन्मनश्चैव घातकं चैव तत्सदा।।186।।

विरक्तो बाह्यतो दृष्टो हृदये धर्मवर्जितः।
कामद्वेषवशो यश्च दुष्टसङ्गो मतो बुधैः।।187।।

बाह्यतः सात्त्विको दृष्टः सतां दोषांश्च पश्यति।
हृदये मलिनोऽत्यर्थं ज्ञेयो दुष्टो न सज्जनः।।188।।

दुःसङ्गः कामसङ्गोऽत्र नान्यसङ्गो हि तादृशः।
तं समूलं परित्यज्य सर्वं सुखमयं कुरु ।।189।।

सामान्यवार्ता उपदेशरूपा
भवन्ति नित्यं हि सतां विशुद्धाः।
दुर्ग्रन्थयो ये हृदयस्य सर्वे
भवन्ति नष्टाः श्रवणेन तेषाम्।।190।।

करौ स्यातां लग्नौ कुसुमचयने तेऽर्चनविधौ,
प्रभोर्ध्यानं चित्ते भवतु रसना कीर्तनरता।
ध्वनिः श्रोत्रद्वारे ननु हरिकथाया भवतु मे,
मुरारेः सा मूर्तिःस्फुरतु च ममाक्ष्णोर्मधुमयी।।191।।



अस्पष्टैर्विविधैर्वाक्यैः शिशवो निजमातरम्।
आह्वयन्ति च तद्भावं माता जानाति केवलम्।।192।।

वत्से निजे यथा भावो धेनोर्भवति सर्वदा।
तेन भावेन सर्वज्ञः पाति मां परमेश्वरः।।193।।

नामसङ्कीर्तने विष्णोर्गुणगाने च सर्वदा।
अखण्डानन्दमग्नोऽस्मि न किञ्चिदवशिष्यते।।194।।

पुत्रादिभ्यो धनं त्यक्त्वा गच्छन्ति बहवो जनाः।
भगवद्भक्तिसम्पत्तिं हित्वा गच्छन्ति केचन।।195।।

बालो न मातरं ब्रूते सा स्वभावेन रक्षति।
नाऽहं शोचाम्यतो मातस्त्वत्कार्ये चिन्तया नु किम्।।196।।

मातुः स्नेहादधिकः स्नेहोऽस्ति मयि परमात्मनस्तस्य।
मम चिन्तनेन किं वा स जानातु यच्छिरसि भारः।।197।।

धेनुर्याति वनं नित्यं वत्से चित्तं च सर्वदा।
मातः पालय विश्वं च पुनर्मा न हि विस्मर।।198।।

दुःखागारो हि संसारो जन्ममृत्युभयावहः।
योऽत्रागतोऽतिथिर्जातो दुःखानां निरपायिनाम्।।199।।

व्यापारा हरिसङ्कल्पाज्जायन्ते जगतोऽखिले।
पापिनो दुःखयन्त्रेषु चूर्ण्यन्ते न हि सज्जनाः।।200।।

वैराग्याञ्जनलेपनाद्भवति वै दृष्टिः सुतेजोयुता
क्षीयन्तेऽतिविनश्वरस्य जगतः कामादिभेदाश्च ये।

बद्ध्वा तांश्च मुदार्पयन्ति निखिलान् नन्दस्य तत्सूनवे
स्नाति प्रेमपयोनिधौ च रसिका भक्ता हरेः पादयोः ।।201।।

अटितं बहु सर्वत्र भूयो विलपनं कृतम्।
दीनबन्धो दयासिन्धो प्रतिज्ञां रक्ष नाम च।।202।।

कालग्रस्तं जगत् सर्वं नश्वरं दुःखरूपि च।
व्यर्थमस्य घटाटोपः सार्थकं हरिभक्तितः।।203।।

सुखं सर्षपसङ्काशं दुःखं पर्वतसन्निभम्।
तस्मादानन्दरूपं तं भजात्मनि स्वयम्भुवम्।।204।।

मृत्युभस्त्रेव देहोऽयं क्षयार्थमायुषः कृतः।
दुःखे सहायका नैव बान्धवाः सुखसङ्गिनः।।205।।

चक्षुरुन्मीलनं दुःखाद् विद्धि दुःखमनुग्रहम्।
अयं मिथ्या हि संसारो निःसारः सारवान् हरिः।।206।।

मत्कुणव्याप्तखट्वायां निद्रा यद्वदसम्भवा।
संसाराश्रयणात् तद्वत् सुखं नूनमसंभवम्।।207।।

मनोभूमिर्हि वैराग्याच्छुद्धा भवति निश्चितम्।
ज्ञानबीजं च तत्रोप्तं भवत्यङ्कुरितं द्रुतम्।।208।।

सत्सङ्गः सच्छास्त्रं कृपा गुरूणां तथात्मलाभश्च।
एष क्रमोऽस्त्यनेन संसारान् मुच्यते जीवः ।।209।।

प्रारब्धाद् यत्र जातो वस प्रसन्नः कुरु च निजं कर्म।
गोविन्दं भज हृदये तरिष्यसि सुखेन संसारम्।।210।।



सारमेयोऽप्यसौ श्रेष्ठो द्वारे तिष्ठति यः सताम्।
हरेः प्रसादमश्नाति शृणोति च गुणान् हरेः।।211।।

आडम्बरेण बाह्येन वञ्चितो न हरिर्भवेत्।
वसन्ते साधनारण्ये भावरूपे स दृश्यते।।212।।

भावुकानां तु हृद्देशे प्रादुर्भवति माधवः।
आत्मानं पण्डितं मन्यो नाप्नोति यत्नवानपि।।213।।
प्रस्तरस्यैव सोपानं देवानां प्रतिमापि च।
एकः प्राप्नोति पद्घातं भावेनान्यश्च पूज्यते।।214।।

परनारीं परनिन्दां परवित्तं विहाय भज हरेर्नाम।
विश्वासं मुनिवचने कृत्वा वद सत्यमाप्स्यसे कृष्णम्।।215।।

मा भव पण्डितमानी मनसस्त्यज तादृशं मनोभावम्।
निन्दावादविवादाहङ्कारेभ्यो विदूरगो भगवान्।।216।।

गङ्गास्नानं विष्णोः पूजा तुलसीपरिक्रमा भक्त्या।
हरिचिन्तनं च सततं सतां स्वभावाद्भवन्ति लोकेऽस्मिन्।।217।।

नित्यं सज्जनसङ्गो नामोच्चारणमहर्निशं चैव।
सततं कीर्तनघोषो रमेतैवं नु हरेर्भजने।।218।।

भगवानेव जानाति भावं हृदयङ्गमं सदा।
स्वयं प्रकटयेत् तस्मात् सर्वं शुद्धेन चेतसा।।219।।

भगवन्तं यदि वाञ्छसि गायतु गीतं तस्य न परदोषान्।
कुरु सत्सेवां नृमः परोपकारं यथाशक्यम्।।220।।

लोका जानन्त्विति ध्यात्वा परमार्थं करोषि चेत्।।
न कुरुष्व वरं तद्धि वृथा तेऽयं परिश्रमः।।221।।

मालाकारो जलं यत्र नयेत् तत्रैव याति तत्।
तद्वद् रामेच्छया कार्यं कर्तव्यं न निजेच्छया।।222।।

वेदान्तार्थो ह्येकः स च निगमागमपुराणसिद्धान्तः।
यद्ध्येयः परमात्मा निरन्तरं सर्वभावेन।।223।।
संसारः कालपाथेयः सुखी कोऽत्र भविष्यति।
अनासक्तो हरौ मग्नः सुखममृतमश्नुते।।224।।

शर्करा तु पुनर्नेक्षुर्जायते यत्नकोटितः।
भक्तः प्राप्य हरिं जन्ममृत्युचक्रे कथं पतेत्।।225।।

जलार्थं व्याकुलो मीनो वियोगे जायते यथा।
तादृशः स्वात्मलाभार्थं भव मुक्तो भविष्यसि।।226।।

अतिशयकठिनं काष्ठं भिनत्ति भृङ्गास्तथापि दृष्टोऽसौ।
सरसिजकलिका बद्धस्त्यजत्यसून् प्रेमबन्धनं कठिनम्।।227।।

बन्धा अनन्ताश्च भवन्ति लोके
स्नेहस्य बन्धस्तु विलक्षणोऽयम्।
बालःप्रगृह्णाति पितुः सुवस्त्रं
यातुं न शक्नोति न दुर्बलोऽसौ।।228।।

धनिनो बालो दीनो दुःखी लोकेकृशश्च यदि दृष्टः।
कृपणं हसन्ति धनिनं न तु बालं कोपि वै मतिमान्।।229।।



स्पर्शात् कृपाकटाक्षात् सङ्कल्पमात्रात् खलु महात्मानः।
सिद्धाः हरिस्वरूपाः जीवं कुर्वन्ति कृतकृत्यम्।।230।।

सन्तो हि दुर्लभा लोके न चालभ्याः कदाचन।
महार्घं चन्दनं किन्तु जनः प्राप्नोति यत्नवान्।।231।।

परिपक्वे फले कीरोऽनाहूतोऽप्युपगच्छति।
तद्वत् साधकबोधाय शीघ्रं गच्छति सद्गुरुः।।232।।

सर्वाः स्त्रियो मातृसमास्तथापि
या स्वस्तनं पाययतीह सैका।
सर्वेऽपि सन्तोऽत्र गुरुस्वरूपाः
सत्योपदेशाय गुरुः स एकः।।233।।

क्षुधया रोदनं श्रुत्वा बालाम्बा याति सत्वरम्।
मुमुक्षुं व्याकुलं ज्ञात्वा शीघ्रमायाति सद्गुरुः।।234।।

अहं ध्यायामि गोपीशं मनो ध्यायति वै जगत्।
आवयोर्मिलने बाधां हरस्वायाहि मे हृदि।।235।।

कथं कुञ्जिकां वामतस्तालिकायां
परिभ्रामयस्यत्र नो दक्षिणेन।
ततः पेटिकाया गृहाणाशु रत्ना-
न्यहो बाह्यतोऽभ्यन्तरे पश्य शीघ्रम्।।236।।

तिस्रो हि खनयो लोके धनं स्त्री मान एव च।
एता उत्तीर्य सद्भावाल्लभ्यते ब्रह्म शाश्वतम्।।237।।

ब्रुवन्त्येतादृशं लोकास्तादृशं वा वदन्ति ते।
द्विजिह्वानिव तान् ज्ञात्वा सङ्गं त्यक्त्वा हरिं भज।।238।।

लुप्ता लोकेषणा मेघा भक्तिसूर्योदये सति।
नाहङ्कारो न सम्मानो वित्तं वा बाधतेऽधुना।।239।।

नूतनजलदश्यामः शोभासिन्धुः स कीदृशो भाति।
मङ्गलसुखनिधिसारो ह्यागारः सर्वसिद्धीनाम्।।240।।

अभिन्ने नाम नामी च माधुर्यञ्चाथ शर्करा।
माधुर्यं लभते भोक्ताऽनुभवेनैव नेतरः।।241।।

जराजन्मभयव्याधिरूपा रोगा भयावहाः।
नश्यन्ति भवपाशाश्च नामस्मरणतोऽखिले।।242।।

सर्वे मार्गाः सुसङ्कीर्णा नष्टानि साधनानि च।
कलौ तु सुलभः पन्था हरिभक्तिर्हि केवलम्।।243।।

दीपः प्रज्ज्वलितो हस्ते गृहं सर्वं समुज्ज्वलम्।
ध्याने स्थिता हरेर्मूर्तिश्चैतन्यं सर्वतो दिशम्।।244।।

प्रवाति पृथगिव पवनो गगनाद् यदानुभूयतेऽत्र लोकैः।
वपुषा विदधन् कर्म भक्तो निजात्मनि चिद्रूपः।।245।।

नेत्राभ्यां किल दर्शनाच्च भजनाद्भक्त्याऽर्चनाच्चिन्तनात्
नाम्नां कीर्तनतस्तथैव मननान्मूर्त्यां हरेर्भावतः।
ध्याने खेलति माधवो दिशति वा स्वप्ने च मार्गं निजं
पश्चाद् व्याकुलितं मनो हि लभते प्रत्यक्षतो दर्शनम्।।246।।



व्यथा विकलता रुदितं प्रगाढप्रेम्णो भवन्त्यनुभावाः।
प्रेमाश्रूणि शुभाशीः शोकाश्रूणि च ततो नूनम्।।247।।

दृष्टे वाऽत्र रमापतौ रसमये सर्वं जगत्तन्मयं
पृथ्व्यां वा गगनेऽनलेऽथ सलिले वायौ च भूतेषु वा।
ब्रह्माण्डेषु पयोनिधौ स्वनिकटे दूरेऽथवा स्वात्मनि
बाह्यन्तः करणेष्वसौ नरहरिः सच्चिन्मयो राजते।।248।।

अरूपो भव तस्मै त्वं यस्त्वरूपं हि काङ्क्षति।
इच्छामि रूपवन्तं त्वां रूपमान् भव हे प्रभो।।249।।

माता शिशुं रक्षति वै निजाङ्के
समुन्नतं तं विदधाति दूरे।
हरिर्यथा रक्षति बालभक्तं
विवेकिनं ध्यायति नैव तद्वत्।।250।।

त्वद्रूपं हि यदा दृष्टं गते बुद्धिस्मृती उभे।
त्वदर्चा सा च पूजा ते भावपुष्पैः कृताऽधुना।।251।।

गवां वा गोपगोपीनां धन्यं भाग्यं हि पक्षिणाम्।
ये पश्यन्ति व्रजे ब्रह्म ब्रह्मादिभ्योऽपि दुर्लभम्।।252।।

जातः कुले यत्र च कुत्रचिद् वा
आचारवान् यः स हि वन्दनीयः।
न श्रेष्ठताया निकषो हि जाति-
र्वित्तं न वर्णो न कुलादिकं च।।253।।

मित्रत्वं किल यान्ति ये च रिपवो शुद्धे स्वचित्ते सदा
हिंसां वापि परित्यजन्ति पशवो हिंस्राश्च सिंहादयः।

आघातोऽपि हितं विषं खलु सुधा वह्निश्च शीतायते
दुःखं वै परिवर्तते निजसुखे प्राणन्ति जीवाश्च तम्।।254।।

भवत्ययोघनं स्वर्णं स्पर्शात् स्पर्शमणेर्यथा।
दुष्टास्तथा सतां स्पर्शात् भवन्त्याशु च सज्जनाः।।255।

विपरीते गतो मार्गे मनोगत्या प्रवञ्चितः।
मृगतृष्णाजले भ्रान्तो निवृत्तः कृपया तव।।256।।
नद्यो यथा यान्ति महासमुद्रे
नामानि रूपाणि विहाय सर्वाः।
सतां तथा बोधमहाब्धिमध्ये
सुखानि दुःखानि लयं प्रयान्ति।।257।।

मालिन्यं मनसः सदा चपलतां दम्भं च निन्दां सताम्
आलस्यं जडतां च कामपरतां जानीहि सर्वं मलम्।
एकत्रीक्रियते कथं स्वहृदये बुद्ध्या च कृत्वा बहिः
सञ्जाते विमले प्रियं गिरिधरं तत्रैव संस्थापय।।258।।

वस्त्रैर्निजोदरं बद्ध्वा यथा गर्भवती सुतम्।
न प्राप्नोति तथा बाह्यैर्वेषैर्दम्भी जनार्दनम्।।259।।

रागाः पृथक् पृथङ्नऽणां तथैवोपदिशन्ति ते।
नानुगन्तुं हि शक्तस्त्वं तस्मादेकं दृढं कुरु।।260।।

सत्येन मनसा पूजां कुरु तस्य न बाह्यतः।
ज्ञातुमिच्छसि यं सर्वं स जानाति मनोगतम्।।261।।

ज्ञानिनस्तार्किकाः प्राज्ञा ये च पण्डितमानिनः।
तेभ्यो निरक्षराः श्रेष्ठाः सरला ये हरिप्रियाः।।262।।



अयं देहो हि देवानां कुबेरस्य धनं त्विदम्।
किमस्ति तव संसारे धर्ता दाता हरिःसदा।।263।।

मूर्ध्नि धृत्वा महाभारं शीघ्रं धावति यत्नतः।
बलीवर्द इवाथापि गर्वाद् गर्जति मूढधीः।।264।।

चक्षुर्हीनाय चक्षुष्मान् यथा मार्गं प्रदर्शयेत्।
दर्शयन्ति तथा मार्गं सर्वान् धर्मस्य साधवः।।265।।

प्रवृद्धप्रचण्डप्रवाहा नदी वै
जनान् कर्षतीयं भ्रमिं प्रत्यधीरा।
न्यमज्जन् सुदक्षा न शक्तास्तरीतुं
निवर्तस्व सूच्चे निजे मन्दिरे त्वम्।।266।।

बृहस्पतिसमो भूत्वा कुर्याद्गर्वं न कश्चन।
न कीर्तिं न गुणान् गायेन्न श्रूयाद् बुद्धिमान् नरः।।267।।

चले देहेऽपि साधूनां ध्रुववत् सुस्थिरं मनः।
न धावति महाकाशो मेघैः सह कदाचन।।268।।

कुलाङ्गनाऽङ्गानि यथा हि लोके
वाराङ्गना चैव निजं वयश्च।
वत्साय गोपायति गौश्च दुग्धं
गोपाय तद्वन्निजपुण्यकर्म।।269।।

पद्मे षडङ्घ्रिर्लघुभिः स्वपद्भि-
र्हानेर्भयात्तिष्ठति केसराणाम्।
अवेत्य सर्वत्र तथैव जीवान्
सन्तः पृथिव्यां शनकैश्चलन्ति।।270।।

सन्तः स्वभावतः सर्वं सहन्ते न स्मरन्ति च।
न निजो न परस्तेषां हितं सर्वस्य कुर्वते।।271।।

अनिलः सरलो वाति स्वभावो हि सतां तथा।
शङ्काभयच्छलादीनां तत्र लेशो न विद्यते।।272।।

बिभेति बालो न कदापि गन्तुं
विश्वासभावान्निकटे स्वपित्रोः।
नरो न शङ्कां विदधाति तद्वत्
सतां समीपे गमनाय काञ्चित्।।273।।

साधवो भगवद्रूपा भजन्तेऽथाप्यहर्निशम्।
मिलित्वाऽब्धौ हि गङ्गाया मिलन्त्यापः पुनः पुनः।।274।।

तीर्थेषु तीरेषु जलाशयानां
गुहासु रम्येषु तपोवनेषु।
नित्यं हरौ यस्य मनो रमेत
ज्ञानावतारं तमवेहि नूनम्।।275।।

कर्मबद्धो भ्रमत्येष देहोऽयं पाञ्चभौतिकः।
कालाग्नियज्ञकुण्डे च घृताहुतिरिवोन्नता।।276।।

परानुकरणार्थं यो धर्ममार्गमुपेक्षते।
स्वीकरोत्युत वाऽधर्मं दौर्बल्यं मनसो हि तत्।।277।।

वृक्षाश्छायां च मूलं कुसुममथ फलं वल्कलं पत्रजातं
यच्छन्त्यर्थिभ्य एवं पथिकजनहितायाथ वा श्रान्ति शान्त्यै।
तद्वद् धान्यादि वासः फलमथ सलिलं वस्तुजातं तथान्यद्
दातव्यं गेहिभिश्चातिथिजनहितायाथ दीनाय नित्यम्।।278।।



स्वार्थाय हि धनं व्यर्थं तद्धि दानाय सार्थकम्।
परार्थमौषधेर्जन्म स्वयं शुष्यति वा वने।।279।।

मिथ्याभयं यथा बाल्ये न तद् भवति यौवने।
मृत्योर्भयं तथाज्ञानां ज्ञानिनां न भयं क्वचित्।।280।।
पुष्पं नष्टं फलं दत्वा फलं पक्वं पतत्यधः।
दत्तानन्दं गतं गीतं तृप्तिं दत्वा रसो गतः।।281।।

गताः सन्तो हितं कृत्वा वह्नौ हुत्वा करः स्थिरः।
दर्शयित्वा परं ब्रह्म सच्छास्त्रैर्मौनमाश्रितम्।।282।।

गजे पदातिर्वाश्वे वा गच्छारूढो मनोगजे।
तदैव सफला यात्रा यदा लक्ष्यमवाप्स्यसि।।283।।

नदीव दानशीलो य उदारश्च रविर्यथा।
पृथिवीव सहिष्णुश्च प्रसन्नस्तस्य केशवः।।284।।

लक्ष्मीपतिः समीपेऽस्ति न्यूनता तत्र का भवेत्।
स सर्वैश्वर्यसम्पन्न आनन्दाब्धिः सुधामयः।।285।।

आडम्बरः शब्दकृतो ममत्वं
वादा विवादा अहमादिकं वा।
बाह्ये च सर्वं प्रतिभाति लोके
स्थैर्यं च शान्तिश्च तदा निजान्तः।।286।।

लोका दद्युर्यदैश्वर्यं जगतो न मदं कुरु।
निर्धनत्वमपि प्राप्य प्रभोः कार्यं न विस्मर।।287।।

निर्मलं हि सतां स्वान्तः काचभाण्डप्रदीपवत्।
प्रकाशयति सर्वत्र निर्भयं कुरुते जगत्।।288।।

तारा असंख्या हि विनिर्मिता वै
नभः स्थले येन स सर्वदर्शी।
कार्याणि सर्वाणि निरीक्षतेऽत्र
शुद्धं विचार्यैव कुरुष्व कर्म।।289।।

न हि वद न शृणु व्यर्थं न च व्यर्थमिह पश्य सर्वत्र।
अन्धो बधिरो मूको भूत्वा निज हृदि पश्य सर्वेशम्।।290।।

मालिन्येन विहीनो मनसा संसारजालनिर्मुक्तः।
लौकिकतृष्णाविमुखो विद्वद्भिर्गण्यते साधुः।।291।।

माता स्वाङ्कात् कदाचिन्निजमपि तनयं कोपयुक्तावतार्य
तिष्ठेद् दूरं तदासौ श्वसिति च निकटं याति शीघ्रं रुदित्वा।
आशां तत्रैव बद्ध्वा विलपति विकलश्चेष्टते वै तदङ्कं
गन्तुं ह्येवं ममाशा त्वयि वसति सदोपेक्षसे किं मुरारे।।292।।

पतिव्रतां कोऽपि तिरस्करोति
पतिर्जनानां यदि वा समक्षम्।
त्यक्तुं समर्था न कदापि सा तं
प्रभो तथाहं बहुतर्जितस्त्वाम्।।293।।

बलाहको वा यदि विस्मरेत्तं
कृषीबलं किन्तु स निर्निमेषम्।
पश्यत्यमुं त्वामहमेकदृष्ट्या
पश्यामि विष्णो भव मे दयालुः।।294।।



अशेषसौन्दर्यनिधेर्मुरारे-
र्भृङ्गायते यस्य मनः पदाब्जे।
नारीस्वरूपे स कथं रमेत
संसारमिथ्याविषयेषु वापि।।295।।

आवश्यको वन्यमृगं गृहीतुम्
अन्यो मृगो यो गृहपालितः स्यात्।
आयान्ति सन्तस्तद्वद् वनान्तात्
जनान् समुद्धर्तुमितो जनेषु।।296।।

एकः करुणाबिन्दुः पतित-
स्त्वयि यदि च तस्य करुणाब्धेः।
जगति तदास्मिन् कोऽन्यं किं वा
वस्तु याचिष्यते दीनः।।297।।

न मलेन मलं शक्तः कोऽपि मार्ष्टुं यथा क्वचित्।
भोगप्राप्तिसुखेनैवं दुःखहानिस्तथा न हि।।298।।

ज्ञानी कविश्च शूरो गुणी तपस्वी सुपण्डितश्चैव।
कोऽसौ यो न भ्रान्तो मोहे कामेन नर्तितः को न।।299।।

पापारम्भे भयं त्वीशात् कृतेऽस्मिन् प्रार्थयेत् प्रभुम्।
तत् पापं साधनं ज्ञेयं हरिं प्राप्तुं न संशयः।।300।।

यस्यारम्भे त्वहंभावोऽभिमानोऽन्ते च तत्तपः।
सर्वदा बाधकं ज्ञेयं हरिप्राप्तौ न संशयः।।301।।

यावन् ममत्वं लोकेऽस्मिन् तावद् दुःखं हि केवलम्।
दूरीभूते च वा तस्मिन् आत्मवज्जायते जगत्।।302।।

मित्रमूल्यं विना शत्रुं न जानाति यथा नरः।
स्नेहशक्तिं विना स्नेहं कथं ज्ञातुं तथा क्षमः।।303।।

प्रेम्णः परिचयो नैव स्तुतिभिर्नान्यसाधनैः।
दुःखानां मर्षणात् स्वार्थत्यागाच्चैव परीक्ष्यते।।304।।

येषां प्रसङ्गात् प्रशमो दमः श्रीः
कीर्तिः क्षमा धीश्च पवित्रता ह्रीः।
सत्यं तपो वा प्रतियान्ति नाशं
तेषां प्रसङ्गः खलु वर्जनीयः।।305।।

मोहामर्षौ स्मृतिभ्रंशो बुद्धिनाशो भ्रमस्तथा।
दुःसङ्गादेव जायन्ते तस्मात्तं परिवर्जयेत्।।306।।

भूखनिं स्वर्णशुद्धिं श्मशाने च मन्त्रसिद्धीर्वा।
नृपसेवां जलयात्रां कृत्वाप्यहो न शाम्यति जनतृष्णा।।307।।

असन्तुष्टो दरिद्रोऽत्र कृपणश्चेन्द्रियानुगः।
निर्विषयः स्वतन्त्रो वै सुखी चात्मरतिः सदा।।308।।

स्वीकरोति निजान् दोषान् परदोषान्न पश्यति।
आत्मवान् दृढसङ्कल्पो नरो नारायणप्रियः।।309।।

त्यक्त्वा हि प्रथमं ग्रामं द्वितीयं याति मानवः।
तद्वत्त्यक्त्वा च संसारं सन्तो गच्छन्त्यधोक्षजम्।।310।।

नम्रताकवचं धृत्वा कस्यचिन्न क्षतेर्भयम्।
कः समर्थो नरो लोके तूलं खड्गेन कर्तितुम्।।311।।

मन एव महाशत्रुर्न जितं चेत् कुमार्गगम्।
पातयिष्यति गर्ते त्वां तच्च जित्वा वशे कुरु।।312।।



विशुद्धं निश्छलं यत्र मनः स्यात् परिवर्तितम्।
प्रभावयति कार्याणि व्यवहारान् रिपूनपि।।313।।

प्रश्नकर्ता क्षणात् प्रश्नान्
सामान्यो विदधाति यान्।
वत्सरैरुत्तरं दातुं
विद्वान् शक्तो न पूर्णतः।।314।।

इच्छां स्वराज्ञीं कुरु वाच दासीं
फलं त्वमेवाप्स्यसि दुःखगर्ते।
राज्ञीं विधायाशु पतिष्यसि त्वं
कृत्वा च दासीं बहुला सुखाप्तिः।।315।।

न कुरुष्व तथा प्रेम हरौ हरिजने यथा।
हरिर्ददाति सम्पत्तिं तज्जनास्तु परं हरिम्।।316।।

सूत्रे ग्रन्थिर्यदा सूक्ष्मो याति सूचीमुखे न तत्।
स्वल्पापि कामना नॄणां बाधिका हरिदर्शने।।317।।

लोभो महापापखनिश्च मन्त्री
मिथ्यैव तृष्णास्ति च यस्य पत्नी।
जनो न जानाति यया विमूढो
निजोन्नतिं वा पतनं च काले।।318।।

ऋणानुबन्धमोक्षार्थं पुत्राद्याः सन्ति बान्धवाः।
भवबन्धनमोक्षार्थमात्मैवास्ति न चेतरः।।319।।

दुर्बलमतयो लोका विपद्गता हि मनसो वशं यान्ति।
आत्मबलेन च युक्ता सन्तः कुर्वन्ति पादतले।।320।।

लोका सुखाशया नित्यमटन्ति विषयाननु।
अहो प्राप्तुं मणिं, छायां तस्य गृह्णन्ति ते वृथा।।321।।

चिन्तामग्ना भयत्रस्ता क्रोधयुक्ता नरा हि ये।
अर्धरुग्णा मतास्तेषां भक्षितान्नं न जीर्यते।।322।।

रज्जुवज्जनसङ्घो ऽस्ति बद्ध्यते चानया जनः।
पुण्यात्मा त्रोटयित्वा तां मुच्यते खलु नेतरः।।323।।

प्रयच्छति सुगन्धं वै कर्तितश्चन्दनद्रुमः।
सङ्कटेषु विकासस्तु गुणानां जायते ध्रुवम्।।324।।

इतिहासं स्वशत्रूणां दुःखशोकमयं पठ।
हृदयाच्छत्रुभावोऽपि स्वयं विलयमेष्यति।।325।।

मार्गे मिलन्ति वै पान्थाः क्षणाद् विश्रम्य यान्ति च।
एवं सम्बन्धिनः सर्वे मिलित्वा यान्ति कर्मगाः।।326।।

यथा तारागणा रात्रौ प्रकाशन्ते नभःस्थले।
तथा विपत्तिपुञ्जेषु ज्योतिः प्राप्नोति मानवः।।327।।

कुटुम्बविद्याधनदानकर्म-
रूपैर्बलैश्वर्यमदैर्मदान्धाः।
भक्तापमानं महतां हरेश्च
कुर्वन्ति नित्यं प्रहसन्ति तांश्च।।328।।

आद्ये निशायाः प्रहरे हि सर्वे
द्वितीयके जाग्रति भोगिनो ये।
चौरास्तृतीये खलु योगिनो ये
चतुर्थके जाग्रति चात्मसंस्थाः।।329।।



श्वेतवर्णं हि कर्पूरं लवणं चैव तादृशम्।
अस्त्येतयोर्महान् भेदः पापिपुण्यात्मनोर्यथा।।330।।

भक्षितेऽपि घृते जिह्वा न हि स्निग्धा मुखे सती।
तादृशस्त्वमनासक्तो संसारे वस सर्वदा।।331।।

असङ्ख्यातान् जनान् जित्वा जयी युद्धे न कश्चन।
जित्वात्मना निजात्मानं वस्तुतो विजयी भवेत्।।332।।

मृत्तिकाघटयोर्भेदो वाचिको न तु वस्तुतः।
घटं जानन्ति ये भिन्नं मृदस्तेऽ ज्ञानिनो ध्रुवम्।।333।।

कामी तु कृपणो ज्ञेयः सन्तुष्टश्च महाधनी।
इन्द्रियाण्यरयो ज्ञेया रागश्च विषयेषु यः।।334।।

ध्यायती स्वपतिं पत्नी वसति मातृगृहे यथा।
जगत्यस्मिन् हरिं ध्यायन् भक्तो वसति सर्वदा।।335।।

विनौषधं हि रोगस्य सहनं कठिनं यथा।
विना ज्ञानं तथैश्वर्यव्यवस्था न सुखाय ते।।336।।

चिकित्सां रोगिणां वैद्या रोगस्पर्शविवर्जिताः।
अनासक्ता हि कुर्वन्ति तद्वत् कर्म मनस्विनः।।337।।

जिह्वास्वादाय जीवानां वधं कृत्वा वृथा तनुम्।
श्मशानं कुरुषे कस्मात् पवित्रं राममन्दिरम्।।338।।

मनः कठोरतां धिक् ते त्वं गच्छसि बहिः कथम्।
विना तच्छ्यामलं रूपं कथं जीवस्यहर्निशम्।।339।।

न हि येन कृतं प्रेम जितः कामो न येन च।
न दृष्टो भगवान् येन तस्य जन्म निरर्थकम्।।340।।

व्याधिसर्पेण संदष्टो संसारः शोकपीडितः।
अन्यचिन्तां परित्यज्य रामनामामृतं पिब।।341।।

वदन्ति चलितुं सर्वे कश्चित् प्राप्नोति भाग्यवान्।
कामिनी काञ्चनं नाम्ना गह्वरे द्वे भयावहे।।342।।

भजनाच्च हरेर्यदि भक्तिमान्
हरिमाप्य गतः परमं पदम्।
न विशिष्टमिदं बहुशः सता-
मुपदेशमुपास्य हरिं गताः।।343।।

सकामभजनात् कामाः प्राप्यन्ते न जनार्दनः।
कामान् प्राप्य हरिर्दूरे निष्कामे हृदये हरिः।।344।।

भोगैर्न तृप्तानि ममेन्द्रियाणि
सर्वा अपूर्णा अभवन् ममाशाः।
मार्गे न कश्चिच्च मयास्ति सार्ध-
मित्थं हि मृत्युं विषयी प्रयाति।।345।।

असाध्यो लोभरोगोऽस्ति क्रोधो वैरी महानयम्।
हितं च साधुता ज्ञेया निर्दयत्वमसाधुता।।346।।

यदोत्तमा उत्तमकार्यलग्ना-
स्तत्कार्यमेषां लघु कुर्वतेऽन्ये।
यथा च लक्ष्यं प्रति यान्ति तेऽग्रे
स्वयं हि कार्याणि भवन्ति तेषाम्।।347।।



यया न वर्धते शक्तिर्जीवने च पराक्रमे।
चरित्रेऽन्यहिते चैव न सा विद्या मता बुधैः।।348।।

साधकाः कोटिशः किन्तु ते सत्यास्तत्र वा हरिः।
निःस्वार्था ईश्वराद् भीता ये च सन्ति हिते रताः।।349।।

ये दासाः सन्ति सर्वेषाम् आशादासा हिते सदा।
जिताशा ये हरेर्दासा न ते दासा हि कस्यचित्।।350।।

सम्मानेच्छा यशोवाञ्छा मृत्योरिच्छा समा यया।
साधवोऽपि च्युतास्तस्माद् यशोमूर्तिं हरिं भज।।351।।

जगत्प्रभुत्वं धनरत्नकोशः
स्वप्नेषु लब्धः क्षणमात्रमेव।
निद्रा निवृत्तौ न हि किञ्चिदस्ति
ज्ञाने प्रभुत्वं च मृषा विभाति।।352।।

पुत्रादिमृत्युना मूढा रुदन्ति हृदि ताडनैः।
ज्ञानवैराग्ययोर्वृद्धिर्वियोगेन विवेकिनाम्।।353।।

केशाः कूर्मस्य पृष्ठे यदि मृदु कुसुमानां वनं चान्तरिक्षे
यद्वा शान्तिस्तृषाया भ्रममृगसलिलान्नाशयेद्वा तमोऽर्कम्।
प्रादुर्भावश्च वह्नेर्यदि हिमनिचयात् स्याच्च वान्यद् विचित्रं
नास्मिन् भ्रातः सुखं ते गिरिधरविमुखायास्ति लोकेषु किञ्चित्।।354।।

क्षणमपि युगमिव विरहे नीलोत्पलश्यामस्य कृष्णस्य।
वर्षर्तुर्मम नयने शून्यमिव मम जगत् सर्वम्।।355।।

जीवनं त्विह संसारे जलबुद्बुदवत् क्षरम्।
एक उत्पद्यते यत्र लीयतेऽन्यश्च सत्वरम्।।356।।

जगदिदं सुविस्तृतं महद् भगवतोऽस्ति रूपमात्मवत्।
सुमुनयो ह्यभेदवादिनः प्रकथयन्ति नैव चान्यथा।।357।।

रागसमं न हि कारणमन्यद्
दुःखदमत्र नराः शृणुतेदम्।
त्यागसमं न हि सुखदं भो
मा कुरु रागमतो भज रामम्।।358।।

धनं चोरितं ते कथं रोदिसि त्वं
स नान्योऽस्ति कश्चिद् धनं येन नीतम्।
अनेकैर्मिषैश्चोरयत्याशु चित्तं
स गोपीदुकूलस्य दध्नश्च चौरः।।359।।

पारसस्पर्शतो लोहतः स्वर्णता
यो हि विन्दुः समुद्रे स सिन्धुर्भवेत्।
आपगा प्राप्य गङ्गां हि गङ्गा यथा
मोक्षमापुः सतां सङ्गताः सज्जनाः।।360।।

परेषां वृत्तिहन्तारो गृहाणां ध्वंसकाश्च ये।
भेदका दम्पतीनां च के ते सन्ति न वेद्म्यहम्।।361।।

धान्यं न भर्जितं यावत् तावत् क्षेत्रे प्ररोहति।
जीवो ज्ञानाग्निना तप्तः संसारे न हि जायते।।362।।

यस्य तु हृदये नात्मा भगवान् षडैश्वर्यसम्पन्नः।
स च सम्राडपि भूत्वा दरिद्रो निर्धनोऽनाथः।।363।।
परनिन्दासु रसज्ञो मित्रत्वकलास्वपण्डितो मूढः।
दूरीकरोति मित्राण्युप्त्वा स हि भेदबीजानि।।364।।



एकच्छिद्रान्विते कुम्भे सलिलं न हि तिष्ठति।
एकेन्द्रियस्य चाञ्चल्ये सर्वा बुद्धिर्विनश्यति।।365।।

मूर्खोऽसौ यः सुखमिति विषयान्
कृत्वा भुक्त्वा मनसि च मुदितः।
सर्वं तेजः स्वहृदयभवनाद्
दूरं कृत्वा पतति तमसि सः।।366।।

यः परेषां सदा वञ्चने मन्यते
स्वं समर्थं हरेर्वञ्चने ऽसावपि।
चिन्तनं तद् वृथा तस्य सर्वाः क्रियाः
पश्यतीशः सदा शासकोऽन्तःस्थितः।।367।।

हृदये सरले विमले च हरि-
र्मुदितो वसतिं विदधाति निजाम्।
सरणिं प्रदिशन् किरणैर्विमलै-
रखिलं कुरुते सुखदं सरसम्।।368।।

सत्ताप्रकाश आनन्दो नामरूपे च सर्वतः।
अत्र सन्ति त्रयो ब्रह्म द्वे शिष्टे तु जगत्तथा।।369।।

ज्ञातं न यावद्धि निजं स्वरूपं
तावत्त्वविद्याऽथ जगद्विलासाः।
ज्ञाते च तस्मिन्न हि जीवभावो
ब्रह्मात्मकं सर्वमिदं विभाति।।370।।

शोकश्च मोहश्च सुखं च दुःखं
जनिर्मृतिर्वा प्रतिभाति माया।
बुद्धेर्विकारेण जगच्च सर्वं
स्वप्नो यथा वास्तविकं न किञ्चित्।।371।।

परोपकाराद् विरतिर्हि मौर्ख्याद्
ग्राम्येषु भोगेषु रतिश्च नित्यम्।
अयं हि धर्मो न हि मानवीयः
संसारगर्ते पतनं तवैतत्।।372।।

गेहस्थितेन दीपेन यथा मार्गः प्रकाशितः।
भासयतीन्द्रियाण्यन्तः प्रकाश्य भगवाँस्तथा।।373।।

न जानाति मालां यथा गौर्गले स्वे
स्थितां वा च्युतां नैव चिन्तां करोति।
निजानन्दमग्नस्तथा कर्मबद्धं
विवेकी न जानाति देहं स्वकीयम्।।374।।

भोगान् प्राप्य जनो न योऽत्र विविधान् गृह्णाति पूर्णो ह्यसौ
नीत्वा चाथ ददाति योऽन्यपुरुषेभ्योऽर्धो नरः कथ्यते।
मूर्खोऽसौ मधुमक्षिकेव कृपणस्त्वादाय दत्ते न यो
यो गृह्णाति बलाच्छठतमः कोऽसौ न जानीमहे।।375।।

इमे यन्त्रभूता अनेके महार्हान्
पदार्थांश्च भुक्त्वा वृथा नाशयन्ति।
अधर्मं न धर्मं च जानन्ति किञ्चित्
सदाचारहीनाः पशुभ्योऽपि हीनाः।।376।।

वासनाव्योमगं तावन् मन उड्डीयते ध्रुवम्।
ज्ञानश्येनेन नो यावद् गृहीतं प्रबलेन हि।।377।।

तण्डुलेच्छा हि सर्वेषां तण्डुलेभ्यो न तण्डुलाः।
न केचित्तुषमिच्छन्ति सतुषेभ्यो हि तण्डुलाः।।378।।



निर्दयौ कालवत् क्रोधकामौ सदा
सर्पवद् व्याघ्रवद् घातकौ बाधकौ।
वह्निपानीयशस्त्रैर्विना सर्वदा
दाहकौ मज्जकौ मारकौ प्रोद्यतौ।।379।।

नरे जीविते तच्छरीरं मनुष्या
नृदेवं तथा भूमिदेवं वदन्ति।
मृते तद्धि वह्नौ द्रुतं दाहयन्ति
ध्रुवं भक्ष्यते वाथ कीटैर्विहङ्गैः।।380।।

न धर्मं विना भ्रातृपुत्रादिवर्गाः
परासोर्हि मार्गे सहाया भवन्ति।
सुबद्धं च तं काष्ठवन्मृत्तिकावत्
पृथिव्यां जले वानले पातयन्ति।।381।।

ग्रामसुप्तान् नदीनां प्रवाहो यथा
मज्जयत्याशु मृत्युस्तथा मानवान्।
कोऽपि रक्षां विधातुं समर्थो न हि
रक्षितारं हरिं नाश्रयस्याशु किम्।।382।।

यदद्यास्ति दिनं श्वो न कथं सुप्तोस्यचेतनः।
मृत्युर्भ्रमति घातार्थं सावधानो भवाधुना।।383।।

धाविष्यसि क्व यावत्त्वं धावनान्तो न विद्यते।
लक्ष्यं विना वृथा सर्वं समाप्तिर्हरिपादयोः।।384।।

लोके वियोगसंयोगौ प्राणिनां यत्र कुत्रचित्।
प्रवाहादिव वेणूनां यथा विच्युति-संचयौ।।385।।

प्रसन्नता चाथ जितेन्द्रियत्वं
कर्त्तव्यनिष्ठा सरला च वृत्तिः।
विनम्रभावो गुरुवृद्धसेवा
मोक्षाय लोकाभ्युदयाय चैव।।386।।

अग्नेः समीपे कथमन्धकारः
शैत्यं स्वभावादिव याति दूरे।
लोको हरिं यः शरणं प्रयाति
क्वाज्ञानबाधाऽथ कुतो जडत्वम्।।387।।

वत्सो नवो गोर्धरणौ पतित्वा
बलात् समुत्थाय पुनः स्थिरोऽसौ।
प्रयत्नशीलस्य सुसाधको यो
भूयः पतित्वाप्युपयाति सिद्धिम्।।388।।

बाणस्य तीक्ष्णभागोऽपि मद्वक्षो न भिनत्ति चेत्।
न दोषो हृदि लोहोऽपि प्रेमाग्नौ भस्मसाद् भवेत्।।389।।

यद्यपि वाणी मधुरा सरसाऽथ मनोहरा च नारीणाम्।
असिधारावत्तीक्ष्णा वैराग्यवतामसहनीया।।390।।

सुखं वाञ्छसि चेद् भ्रातर्विषयांस्त्यज सर्वथा।
विषयेषु च यल्लभ्यं तत् पश्यात्मनि संस्थितम्।।391।।
मृत्योरङ्कस्थितानन्यान् दृष्ट्वा जर्जरितानपि।
युवाऽस्मि मन्यते लोको मरिष्यामि न कर्हिचित्।।392।।

मिथ्याशावशगो देहमुत्तमं न विनाशय।
श्वासेषु नास्ति विश्वासः कालो नृत्यति मूर्धनि।।393।।



याचनं चैव मृत्युश्च समौ किन्तु वरं मृतिः।
याचमानश्च लोकेशोऽप्यहो वामनतां गतः।।394।।

बीजं हि संसारतरोः कलत्रं
कामादिवर्गा विततश्च शाखाः।
पत्राणि सर्वे विषयाः सुताद्याः
फलानि सेकाय जलं च तृष्णा।।395।।

कश्चिल्लोहमयाद् बन्धान्मुक्तः काष्ठमयादपि।
न स्त्रीपुत्रादिबन्धेभ्यः स्वात्मानं मोक्तुमर्हति।।396।।

नायं त्यजति संसारं यावच्छक्तो ऽस्ति कर्मणि।
तुषवद् विधाय निःसारं लोका एनं त्यजन्ति च।।397।।

वित्तध्यानसुखं मिथ्या दुःखदं क्षणभङ्गुरम्।
ध्यानं मृत्युञ्जयस्याथ सुखमोक्षप्रदं कुरु।।398।।

उत्प्लुत्य चोत्प्लुत्य लघुः प्रयाति
गुरुश्च गम्भीरतया महान् यः।
क्षुद्रा हि वेगेन वहन्ति नद्यः
सदा स्थिरो भाति महान् समुद्रः।।399।।

वर्तस्व शान्त्यैव पवित्रभावैः
क्रोधञ्च मानञ्च मदञ्च हित्वा।
नद्यः प्रवृद्धा बहुशः प्रशान्ताः
शुष्कानि पुष्पोपवनानि भूरि।।400।।

न हि गणयति कञ्चिन् मानवो योऽभिमानी
जनधनमदमत्तो याति घूर्णन्निवासौ।

इममिह खलु मृत्युर्दुर्बलं चेन्न कुर्यात्
सकलभयविहीनः किं न कुर्यात् स कर्म।।401।।

तद्भक्ता यदि दुःखार्ताः परमात्माऽपि दुःखितः।
आगत्य तानि दुःखानि विनाश्यैव प्रसीदति।।402।।

भानौ न कश्चिद् दिनरात्रिभेदो
न बन्धमोक्षौ च निजात्मनि स्तः।
आश्चर्यमेतत् खलु नित्यमुक्तं
मोक्तुं यतन्ते च यथा सुबद्धम्।।403।।

त्यक्ता स्वनौका हि मया पयोधौ
जीर्णा विहीना ऽखिलसाधनाद्यैः।
जानात्वसौ योऽस्ति हि कर्णधारः
करोतु रक्षामथ मज्जयेद् वा।।404।।

गुरुर्वै दिव्यदीपोऽस्ति दीप्तो ज्ञानगभस्तिभिः।
येन दीपा असङ्ख्याता ज्वलन्तीहैव तत्समाः।।405।।

सहस्ररश्मावुदिते प्रभाते
स्वयं विकासो मृदुपद्मिनीनाम्।
कुतो भयं तत्र च कोऽन्धकारः
स्फूर्तिः स्वभावाच्च जनेषु लक्ष्या।।406।।
प्रसन्नानि कर्तुं परेषां मनांसि
ह्यधीरं कथं जायसे धिङ् मनो मे।
अमूल्योऽस्ति चिन्तामणिस्त्वत्समीपे
परित्यज्य रे दीनवद् धावसि त्वम्।।407।।

जना यात्रिशालामरिक्तां विलोक्य
परावर्त्य गच्छन्ति पान्था निराशाः।



छविर्नेत्रयोर्यस्य कृष्णस्य रम्या
कथं तत्र रे विश्वरूपप्रवेशः।।408।।

न स्थानं धर्मशालासु वीक्ष्य गच्छन्ति यात्रिणः।
नेत्रयोः कृष्णमूर्तिं च वीक्ष्य कामाः प्रयान्ति च।।409।।

त्यजानुगमनं मनसो धूर्तेनानेन वञ्चिता बहवः।
भ्रमन्त्यरण्येऽपारे न पारं यान्ति दुःखानाम्।।410।।

सूर्योऽस्ति दीपवन्नूनं प्रेरितः कालवायुना।
कदा नश्येन्न हि ज्ञातं बुधैरन्यस्य का कथा।।411।।

यास्यत्यदृश्यतां लोको बहुसौन्दर्यभूषितः।
प्रभातकालतारावत् सर्वेषां पश्यतामपि।।412।।

कुर्वन्ति पापमनिशं निजजीवनाय
मूर्खाः परार्तिनिरताः क्षणभङ्गुराय।
आयुर्नरस्य खलु चेदिह वत्सराणां
लक्षं तदा स न करिष्यति किं न जाने।।413।।

आयुर्मृल्लोहपाषाणवस्तूनामपि विद्यते।
किमायुस्ते निरीक्षस्व कुरु पापं न जीवने।।414।।
अहो स राजा च महासभा सा
सेना च सामन्तमुखाश्च शूराः।
चन्द्राननास्ता ललना गताः क्व
कालेन सर्वत्र कृतं हि शून्यम्।।415।।

श्रुतो वाद्यध्वनिर्यत्र हर्म्येषु च निरन्तरम्।
तानि शून्यानि दृश्यन्ते ध्वांक्षास्तिष्ठन्ति तत्र च।।416।।

अङ्गेषु सर्वेषु यथैक आत्मा
कुत्रापि घातः स निजात्मनो हि।
व्याप्तः स सर्वत्र जगत्सु तस्माद्
दुःखं च जीवेषु तदात्मदुःखम्।।417।।

आरोग्यपूर्णं हि शरीरमद्य
रुग्णं भवेद्वा मरणं व्रजेद्वा।
दत्तावधानो भव गन्तुमद्य
सन्मार्गमाप्तुं कुरु सुप्रयत्नम्।।418।।

हिंस्राणां न हि जीवानां मारणे वीरता तव।
अभिमानं मनश्चैव मारयाप्तुं यशो महत्।।419।।

कुध्वांक्षवत् स्वोदरपोषणाय
मुखानि रे पश्यथ किं परेषाम्।
अहो दिदृक्षा यदि, वीक्षणीयं
हरेः सहास्यं हि मुखं सुखाय।।420।।

जरा निर्बलं शक्तिहीनं कुरूपं
विधत्ते शरीरं शिरस्थश्च मृत्युः।
उपायोऽस्ति दुःखाद् विमुक्तेर्न दूरे
भजानन्दकन्दं मुकुन्दं हृदिस्थम्।।421।।
यमैः संयमैर्वेदशास्त्रैः पुराणैः
कथाख्यानकैः सेतिहासैः सहस्रैः।
जलैस्तीर्थसङ्घैश्च किं, चेन्न चित्ते
स्थितश्चिन्मयश्चित्तचौरो मुरारिः।।422।।

धनस्य हानिर्नहि कापि हानिः
स्वास्थ्यस्य हानिर्यदि सास्ति काचित्।



चरित्रहानिर्यदि जायमाना
ज्ञेया तदासौ खलु सर्वहानिः।।423।।

विषया अस्थिराः सर्वे चपला इव चञ्चलाः।
अनिलोच्छिन्नमेघाप इवायुर्विद्यते चलम्।।424।।

ज्ञेयाश्चला हि विषयाश्चपला सदृक्षाः
खे प्रेरिता हि जलदा इव वायुनायुः।
नो यौवनं स्थिरमिहास्ति शरीरिणां च
ब्रह्माक्षरं निरुपमं भजसे कथं न।।425।।

जन्मना सह मृत्युस्ते पश्चाद् धावति धावति।
ईक्षतेऽवसरं प्राप्य व्याघवद्धन्ति निर्दयः।।426।।

शरीरं शीर्यते शीघ्रं शर्करेव पयोनिधौ।
लोकेऽस्मिन् न स्थिरा लक्ष्मीरञ्जलौ सलिलं यथा।।427।।

मध्यस्थानमिवैतद्धि सर्वेषां यात्रिणां जगत्।
विश्राम्य क्षणं किञ्चिद् यान्ति मोहो निरर्थकः।।428।।

बालुकानिर्मिते गेहे निःशङ्क इव तिष्ठसि।
अहो मोहो न जानासि पतिष्यति कदा त्विदम्।।429।।

तावन्मधुरता दुग्धे यावत् सर्पो न हि स्पृशेत्।
पुरुषे च गुणास्तावत् यावत्तृष्णा न संस्पृशेत्।।430।।

वीचीः पयोनिधेः कश्चिद् गणयेद् यदि धैर्यवान्।
मनसो हि तरङ्गान् स शक्तो गणयितुं न हि।।431।।

उत्तमं ज्ञानमासाद्य कुर्याज्जीवनमुत्तमम्।
अन्यथा तु श्रमस्तस्य तुषकुट्टनवद् वृथा।।432।।

उन्नत्यवनती नाङ्कैरक्षरैर्वा विचारयेत्।
तयोर्हिताहितैः कार्यैर्विधेयो निश्चयो बुधैः ।।433।।

प्रच्छन्नेषु पदार्थेषु तिमिराच्छादितेषु च।
वृथा वादं परित्यज्य स्वप्रकाशं हरिं भज।।434।।

निजा विचाराश्च निजेन्द्रियाणि
सदैव लोकान् खलु वञ्चयन्ति।
शास्त्रैर्मुनीनां वचनैर्विना च
न तानि सत्यस्य विनिर्णयाय।।435।।

यथा यथान्तःकरणं मनुष्यः
समीक्षते तत्सरलं पवित्रम्।
श्रमं विना तस्य तु सत्पदार्थाः
हरेः प्रकाशेन हि सुप्रकाशाः।।436।।

सदाचारे दुराचारो मानवोपरि दानवः।
आस्तिके नास्तिको न्यायेऽप्यन्यायो विराजते।।437।।

सङ्ख्या चाद्य निरन्तरं द्विजगतः संवर्धते यादृशी
तद्गत्यैव ततोऽधिकं च नितरां दृष्टो गुणानां क्षयः।
आदर्शो गुरुता शमः सरलता मूल्यं मनुष्यस्य च
लुप्यन्ते हि शनैः शनैः प्रतिदिनं वैज्ञानिकेऽस्मिन् युगे।।438।।

न जीवनं नाम शरीरपोषः
सञ्चालनं वा सततं कराङ्घ्र्योः।
यन्त्राणि भोगा अथ सद्विलासा
वृथैव चेल्लोकहिताय न स्युः।।439।।



सङ्कटेष्वप्यसङ्ख्येषु यस्यान्तःकरणं स्थिरम्।
स धीरो बुद्धिमान् वीरो वर्षायां नगवत् स्थिरः।।440।।

हृदयेषु स्थिता नित्यमनन्ता वासना यदि।
कोऽन्योऽसाविह संसारे योऽधिकं पीडयिष्यति।।441।।

बुद्धिमान् न परापेक्षी स्वयं निश्चिनुते नरः।
इदं कार्यमकार्यं वा सत्यं वाऽसत्यमेव वा।।442।।

यथोत्पाटितुं शक्तो वायुर्वृक्षं न पर्वतम्।
क्लिश्नन्ति वासनास्तद्वद् दुर्जनं न हि सज्जनम्।।443।।

न युद्धं कठिनं लोके न किञ्चित्कार्यमेव वा।
यथात्मदमनं पश्चाज्जेतुं किमवशिष्यते।।444।।

वादे विवादे च धनार्जने च
यथा हि लग्नो मनुजस्तथा चेत्।
लग्नो भवेद् दुर्गुणनाशनाय
हानिर्भवेन्नेह जनस्य काचिद्।।445।।
न विद्वत्तानुरूपं चेज्जीवनं विदुषां भवेत्।
व्यर्थमध्ययनं तेषां तेभ्यः कः किं ग्रहीष्यति।।446।।

पठनात् पतिता एके कीदृशं पठनं हि तत्।
आचाराश्च विचाराश्च तेषां नैव हितावहाः।।447।।

विस्तृतो यस्तडागोऽसौ क्षुद्रं यत् तत्तु पल्वलम्।
उदारो हि महागाधः कृपणः सङ्कुचितोऽ परः।।448।।

क्षुद्रे देहेऽभिमानार्थं किमस्ति स लघुः सदा।
नाभिमानमतः सन्तः कुर्वन्ति प्राकृता यथा।।449।।

न कुरु न कुरु गर्वं यद् धनं भूरि मेऽस्ति
नहि नहि कुरु गर्वं मित्रवर्गो बली मे।
स्वमनसि कुरु गर्वं तस्य येनैव तुभ्यं
वितरितमिह सर्वं वस्तुजातं सुखाय।।450।।

न चिन्तनीयं केनोक्तं यदुक्तं तच्छुभं यदि।
मत्वा भगवतो वाक्यं स्वीकुरुष्व हिताय ते।।451।।

ईर्ष्याक्रोधादिकुण्डेषु प्रज्ज्वलन्त्यभिमानिनः।
विनम्राः शुचयो नित्यं स्नान्ति शान्तिसरोवरे।।452।।

उदेति सूर्यः सुखयन् हसंश्च
हसन्निवासौ च यथैति चास्तम्।
कुर्वन्त एवं नु हिताय सन्तः
प्रयान्ति लोकाच्च तथा हसन्तः।।453।।

ईश्वरार्पितया बुद्ध्या स्वानन्दानुभवः सदा।
विषयार्पितबुद्ध्या तु दुःखमेवानुभूयते।।454।।

अर्पयन्ति परेभ्यो ये स्वविचारान् स्वयं जनाः।
आकर्णितुं न वाञ्छन्ति त्यागिनां विदुषामपि।।455।।

न्याय्यमावश्यकं ब्रूहि ब्रूहि नान्यत् कथञ्चन।
स्वयं गौरवयुक्तः स्या अन्यस्य च हितं भवेत्।।456।।

पूर्णसौन्दर्यमाधुर्यप्रियत्वगुणवानसौ।
सच्चिदानन्दरूपोऽस्ति श्रीकृष्णः परमं धनम्।।457।।

यद्यपि दुःखदो लोभः परमोत्साहदायकः।
न किञ्चिद् दुष्करं चास्य दुःखाद् विरतिकारकः।।458।।



वयं पतामो यदि वा विपत्ता-
वन्तःप्रवेशावसरस्तदानीम्।
दुःखानुभूतिर्हृदये परेषां
जगत्परीक्षा च जनिर्गुणानाम्।।459।।

छिनत्तु मूलानि हि वासनानां
महाकुठारेण विवेकजेन।
निर्बाधमार्गो भविता तवेत्थ-
मात्मानमाप्तुं परमं धनं तत्।।460।।

कृते प्रयत्नेऽपि यदा यशो न
कुर्वन्ति निन्दां मनुजा घृणां च।
कार्या न चिन्ताऽवसरस्तवायं
दम्भस्य नाशाय हरिं च लब्धुम्।।461।।
दुःखावृतो यश्च हि लोभयुक्तः
सहायतां वाञ्छति यस्य कस्य।
नावाप्य तां गच्छति दीनभावात्
स दीनबन्धोः शरणं निराशः।।462।।

यावद् वयं हि संसारे तावल्लोभः स्मयो भयम्।
दुःखं चान्तःस्ववासाय परमात्मनि मतिं कुरु।।463।।

जले शैवालवल्लोभो ह्यपि मज्जयितुं सतः।
आवृणोति जनान् तूष्णीं तस्माद् धूर्तं निवारय।।464।।

पूर्वं लोभे गताः सन्तो दुःखेष्वपि ततो गताः।
ततो विजित्य तं यत्नाद् विमुक्ता आप्नुवन् हरिम्।।465।।

सम्प्रदाया न चैकान्ता न नराः सन्ति तादृशाः।
लोभा विपत्तयो दुःखं न स्युर्यत्र प्रबाधकाः।।466।।

किं विधातुं वयं योग्या न जानीमः कदाचन।
किं वयं वस्तुतश्च स्मस्तत्तु लोभैः प्रतीयते।।467।।

विपत्तौ हेमवद् वह्नौ वस्तुतः सुपरीक्ष्यते।
जनः समुज्ज्वलो भाति सद्गुणैर्गृह्यते जनैः।।468।।

स्वतो निरीक्षस्व निजं स्वरूपं
निर्णायकोऽन्यस्य न कर्मणां त्वम्।
श्रमो वृथाऽन्यस्य हि कर्म वेत्तुं
ज्ञात्वा शुभं कर्म कुरुष्व शान्त्यै।।469।।

सौन्दर्यं यौवनं भोगा नश्यन्ति क्रमशः परम्।
आसक्तिर्वर्धतेऽत्यर्थं वार्धके दुःखदां त्यज।।470।।

कार्यस्य मात्रा न परीक्ष्यते सा
विश्वेश्वरेणेह तु मानवानाम्।
प्रेम्णोऽस्ति कोंशो हृदये नु तेषां
ज्ञात्वा प्रसीदत्यखिलान्तरात्मा।।471।।

अन्येषां दुर्गुणान् दोषान् दौर्बल्यं च सहस्व भो।
दौर्बल्यं बहुदोषांश्च सहन्तेऽन्ये जनास्तव।।472।।

स्वेच्छानुरूपमात्मानं विधातुं चेन्न हि क्षमः।
अन्ये कथं तवेच्छाया गमिष्यन्त्यनुकूलताम्।।473।।

यदभिवाञ्छसि चान्यजनं समं
हितकरं परिपूर्णतमं तथा।
भवसि किं न तथा यतसे न किं
त्वमपि किं न हि यासि च पूर्णताम्।।474।।



स्वच्छन्दताऽन्यस्य न भाति किञ्चिन्
मनस्यतुष्टिं कुरुषे विलोक्य।
स्वेच्छावरोधं न कथं विधाय
स्वच्छन्दभावं न कथं जहासि।।475।।

कठिनैर्नियमैर्बद्धानन्यान् मनुजान् वाञ्छसि चेद् द्रष्टुम्।
कथं न नियमनिबद्धो निजकार्यं साधयसि नितराम्।।476।।

दोषैर्विहीनो न हि कश्चिदत्र
पूर्णः स्वयं वा न हि चास्ति कश्चित्।
परस्परं प्रेम सहिष्णुतां च
प्रवर्ध्य साध्यं कुरुतात् सुखाय।।477।।

का शक्तिर्वा कियान् धर्मः किं धैर्यं मयि विद्यते।
इति ज्ञापयितुं नूनमागता हि विपत्तयः।।478।।

किं वा धार्मिकवेषेण शिरसो मुण्डनेन वा।
योगेनाचारशुद्ध्या च धार्मिकत्वमवाप्यते।।479।।

सेवार्थं जन्म मानुष्यं शासितुं न हि विद्यते।
कष्टं दातुं न जन्मास्ति कष्टं सोढुं च वर्तते।।480।।

साधकानां परीक्षापि भूयो भूयोऽभिजायते।
ज्वलिताग्नौ यथा स्वर्णं निकषे च परीक्ष्यते।।481।।

यावन्न प्रेम गोविन्दे विनम्रे हृदये सति।
सिद्धिमार्गे न वै तावद् गतिर्लोकस्य जायते।।482।।

वित्तासक्तौ बुद्धिमोहस्ततो धर्मच्युतिर्ध्रुवम्।
निश्चितो हि ततः पातः पतितो निन्दितो जनैः।।483।।

तन्तुनाभस्तु कौशेयो म्रियते स्वपरिग्रहात्।
अशक्तो म्रियते लोको वित्तादीनां परिग्रहात्।।484।।

यथार्थदृष्ट्या पश्यन्ति संसारं ये जनाः सदा।
न रुदन्ति च ते तस्मान् मानवाः प्राकृता यथा।।485।।

शुक्लादनन्तरं कृष्णः शुक्लश्च तदनन्तरम्।
आगच्छतो यथा पक्षौ तद्वद् दुःखं सुखं तथा।।486।।

दृष्ट्वा दीपशिखाभं नारीदेहं पतङ्गवत्तत्र।
गत्वा चाथ पतित्वा न भवत जना भस्मसादाशु।।487।।

अमावस्याघनध्वान्ते निशायां च पिपीलिका।
यथा ह्यसितपाषाणे न दृश्या तद्वदीश्वरः।।488।।

दारिद्र्यमाधिश्च सुखानि रोगा
आयान्तु वा यान्तु कथं बिभेषि।
प्रियश्च सर्वस्य तु यो हि तस्मा-
ल्लब्धं त्वयैतद्धि हिताय सर्वम्।।489।।

करोषि कार्यं यदि किञ्चिदेव
सहस्रनेत्रः स्मर पश्यतीशः।
ब्रवीषि यत्तत्तु शृणोति सर्वं
मौने च जानाति स चिन्तितं ते।।490।।

संसारधूर्तेन नरा असङ्ख्या
मायाविनाऽनेन विनाशिता वै।
तवैव नाशो न भवेत् यथा च
भजस्व मायापतिमेव तस्मात्।।491।।



पुरस्कारं समर्हन्ति निन्दकाः सज्जना इव।
निवारयन्ति पापेभ्यः सावधानाःसदैव ये।।492।।

केनापि धूर्तेन छलार्थमेव
नन्वापणोऽयं प्रवितानितोऽस्ति।
वस्तुक्रयश्चात्र सदैव दृष्टो
धर्मस्य मूल्येन न चान्यथा स्यात्।।493।।

रम्यामिव स्त्रीं जगतीं य इच्छे-
दवेहि तज्जीवनमेव तस्य।
नष्टं च रत्नादिकसंचयेन
तस्माद् विरक्तोऽत्र सुखेन शेते।।494।।

प्रसादितो हरिर्येन मृत्योः पूर्वं च तत्परः।
विरक्तो यश्च संसाराद् बुद्धिमन्तस्त्रयो नराः।।495।।

स दरिद्रो नरो योऽत्र वस्तुसञ्चयकारकः।
यः सदा हरिसम्पत्तिं चिनुते स महाधनी।।496।।

स्मरणं भोजनं ज्ञेयं, पेयं हरिप्रशंसनम्।
नामानि सन्तु वासांसि सर्वदा मम जीवने।।497।।

नित्यं य ईश्वराद्भीतो जनास्तस्माद्धि बिभ्यति।
यश्च नास्ति हरेर्भीतस्तस्माद् भीता न केचन।।498।।

सावधानैः सदा भाव्यं संसारादैन्द्रजालिकात्।
अन्येषां खलु का वार्ता विद्वांसोऽपि वशीकृताः।।499।।

अस्ति लोचनसम्बन्धः केवलं बाह्यवस्तुभिः।
हरिणा हृदि सम्बन्धो जायते ज्ञानचक्षुषा।।500।।

अहमहमिकया ते तत्र धावन्त्यभीक्ष्णम्।
विषयसुखमवाप्तुं भूर्यसूनां पणेन।
विषफलमिव भुक्त्वा ते समन्तात् प्रमत्ता
जननमरणमार्गे नेत्रहीना भ्रमन्ति।।501।।

सतां सङ्गान्नूनं हरिगुणकथा तत्र च रुची
रुचौ विश्वासः स्यात् तदनु विवेकोऽस्य नितरां।
विवेकाद् वैराग्यं भवति दृढभक्तिश्चरणयो-
स्तदाऽऽस्वादो भक्तेरनुपमसुधाया रसमयः।।502।।

विलीने हि चित्ते विशुभ्रप्रकाश-
श्चिदानन्दरूपः स आत्मा च दृष्टः।
शिवो निर्मलं ब्रह्मलक्ष्यं सतां तद्
गतिश्चामृतं तद् रसोऽसौ रसज्ञः।।503।।

बाह्यं न जीवनं यस्य यथाऽभ्यन्तरजीवनम्।
त्याज्यो हि तस्य संसर्गो विश्वासार्हो न सर्वथा।।504।।

क्षीणशक्तिर्यदा मन्दबुद्धिश्च ते
नैव चिन्त्यं सखे दीनबन्धुर्हि सः।
त्वत्समीपं सदाप्यर्चनीयो हरिः
प्राप्यते तद्दया शुद्धभक्त्या च सः।।505।।

ईश्वरं यदि जानासि पर्याप्तः स हि ते सुहृत्।
अथ चेन्नहि जानासि तज्जनैर्मित्रतां कुरु।।506।।

यदा हि शिशुरिव चेष्टां विधास्यसि नु विस्मर्तुमात्मानम्।
जगदम्बा हि निजाङ्के दास्यत्युत्थाय ते शरणम्।।507।।



दिवसे तु श्रमं घोरं रात्रौ ध्यानं परात्मनः।
सन्तः कुर्वन्ति चानन्दं प्राप्नुवन्ति क्षणे क्षणे।।508।।

सन्तस्त्यक्त्वा पदं मानं सम्पत्तिं सुहृदस्तथा।
अङ्गीकुर्वन्ति चान्नादि जीवनायैव केवलम्।।509।।

संसारदृष्ट्या तु महादरिद्रा
गुणे चरित्रे धनिनो महान्तः।
अभावपूर्णे खलु जीवनेऽपि
प्रसन्नमन्तःकरणं हि तेषाम्।।510।।

अस्माद् विरक्ताश्चरणाब्जरक्ताः
श्रीकृष्णभक्ता विषयेष्वसक्ताः।
स्वयं न गण्याश्च सदग्रगण्या
अत्राप्रसिद्धा अपि ते हि सिद्धाः।।511।।

सदा विनम्राः सरलाश्च घोरा
नित्योन्नताः संयमिनः प्रशस्ताः।
आचारवन्तश्च सुवृत्तिशीला
श्रद्धालवो भक्तियुता महान्तः।।512।।

पठ लिख कुरु वा ध्यानं श्रीहरेः कुरुष्व कार्यं वा।
सततं लोकहितार्थं नालस्यं शोभते किन्तु।।513।।

खला अनेके विचरन्ति तेषां
सोढुं प्रहारान् सततोद्यतः स्याः।
जित्वा समूहं निजवासनानां
गरुडध्वजं धारय वै निजान्तः।।514।।

नान्वेषणं येन कृतं सुखानां
नास्मिन् पदार्थेषु मनः कृतं च।
निरर्थका येन धृता न चिन्ता
स्थितः सुखी पूर्णतया स एव।।515।।

हृदयस्यान्तः कोष्ठे शून्ये मनसाहूय तमेकान्ते।
मिलतु हरिं विश्वेशं कथय सखे त्वं निजा व्यथाः सर्वाः।।516।।

पाखण्डिनो ये विविधान् हि वादान्
कुर्वन्तु वार्ता अपि सारहीनाः।
आज्ञां हरेर्मूर्ध्नि निजेऽवधार्य
जपाङ्ग तन्नाम सुखेन शान्त्यै।।517।।

पश्चात्तापाद् यथा शुद्धिर्मनसो न तथाऽन्यथा।
प्रसन्नात्मा तदात्मानं गृह्णाति परमेश्वरम्।।518।।

यथा मनसि संकीर्णो भूत्वा शोचति मानवः।
तथा तथा ह्युदासीनो जायते व्यथितो हृदि।।519।।

भोजनं स्वाद्वमूल्यानि वासांसि तु मृदूनि च ।
सङ्गश्च धनिनां त्रीणि द्वाराणि निरयस्य वै।।520।।

यद्वृक्षमूलान्यतिनिर्बलानि
पत्राणि पुष्पाणि फलानि तस्य।
कथं भविष्यन्ति हि सुन्दराणि
स्वादूनि हृद्यानि सुखावहानि।।521।।

स्वं निर्बलमुदासीनं यदा दीनं च मन्यसे।
तदा स्मर परात्मानं मायेशं बलिनां बलम्।।522।।



इह निजपरभावान् द्वेषरागादिजातान्
मृदमिव कनकं चेत् त्वं विहातुं समर्थः।
स्वमनसि न हि हर्षं नैव खेदं करोषि
गुणरहितमनन्तं त्वं तदाप्तुं समर्थः।।523।।

क्षमः स्वदोषान् हि समीक्षितुं कः
कस्मै स्वकार्याणि न हि प्रियाणि।
स्वं मन्यते यो हि लघुं विनम्रं
दृष्टुं समर्थः स निजान् हि दोषान्।।524।।

कथं बद्धोऽसि मूर्ख त्वमिच्छाकृत्रिमबन्धनैः।
तस्मै समर्प्य ताः सर्वाः स्वतन्त्रो भव निर्भयः।।525।।

भवाब्धिं यः समुत्तीर्णः स सुखी कुशलो नरः।
आप्नोति दिव्यमानन्दमनुत्तीर्णः कथं सुखी।।526।।

असाफल्यं हि सोपानं साफल्याय विचार्यताम्।
तदारूढो प्रयाह्यग्रे तदग्रेऽवश्यमाप्स्यसि।।527।।

दिनान्यनेकानि वृथा गतानि
मत्वा दिनं श्रेष्ठतमं ततोऽद्य।
कल्याणकार्याय यतस्व शीघ्र-
मद्यैव मृत्युर्न समापतेच्चेत्।।528।।

व्यवस्था या कृता तेन ज्ञेया सा परमोत्तमा।
यथा सुखानि दुःखानि कल्याणायैव केवलम्।।529।।

धनिनो हि धनेच्छा चेद् वर्धते नित्यमेव हि।
महादरिद्रो विज्ञेयो न मूर्खः सुखमर्हति।।530।।

उप्त्वा निरयबीजानि फलानीच्छस्यहो सखे।
स्वर्गकल्पतरोर्नूनमेषा तव विडम्बना।।531।।

व्याप्तोऽस्ति सर्वत्र हरिर्मनुष्या-
स्तथापि सन्मार्गकुमार्गगा वै।
केचित्तु सर्वं हरयेऽर्पयन्ति
सर्वं तथाऽन्ये च निजेन्द्रियेभ्यः।।532।।

लौहं कुरुते स्वर्णं स्पर्शमणिर्हि न मणिं निजस्पर्शात्।
गुरुर्हि परमदयालुः करोत्यात्मसमं चात्मसम्पर्कात्।।533।।

स्रष्टा च यो रक्षति सर्वतो मां
तं वै प्रसन्नं न करोमि कस्मात्।
तस्य प्रसादेन किमस्त्यलभ्यं
कं कं प्रसन्नं विदधामि चात्र।।534।।

साध्यं साधय रे मूर्ख निन्दया किं हि लभ्यते।
समयो मूल्यवानेष व्यर्थं तन्न विनाशय।।535।।

सुशान्तिर्हृदये यस्य जीवन्मुक्तः स उच्यते।
हरिः सुधामयः पूर्णो महानन्दपयोनिधिः।।536।।

संसारे रङ्गमञ्चेऽस्मिन् कृत्वा वेषान् विलक्षणान्।
जीवा यत्राभिनेतार एतत् कुर्वन्ति नाटकम्।।537।।

विकाराश्च विषादाश्च विश्वासाश्च भयानि च।
हृदि यावद्धि वर्तन्ते तावद् भक्तिर्न जायते।।538।।



आश्रोत्रदीर्घे सखि ते विलोचने
हस्तौ समर्थौ च कथं निमीलने।
मन्यस्व राधे प्रियमत्र वाप्रियं
क्रीडा न योग्याक्षिनिमीलने त्वया।।539।।

देहः सन्धिशतैर्युक्तो दुर्गन्धिर्निर्बलः क्षरः।
शोकात् किं? रोगनाशार्थं पिब कृष्णरसायनम्।।540।।

ललिता मधुरा वाचो धारवाहिकं च सुव्याख्यानम्।
दातुं शक्ता भुक्तिं न च मुक्तिं हन्त संसारात्।।541।।

अहोरात्रं घटिकाश्च षष्टिर्गच्छन्ति नित्यशः।
घटिकाद्वयं हरिं ध्यातुं न यस्य कथमुन्नतिः।।542।।

आस्वाद्य शर्करां स्वच्छां क इच्छेन्मलिनं गुढम्।
आस्वाद्य भगवत्प्रेम संसारः कस्य वा प्रियः।।543।।

सन्तो वै भूर्जवृक्षा इव तु परहितार्थं विपत्तीः सहन्ते
दुष्टा नित्यं परेषां सन इव कुटिला दुर्जना बन्धनाय।
दुःखायैवोद्यतास्ते त्वचमपि च निजां ते समर्प्य प्रसन्नाः
सर्पा वा मूषका वा विदधति हि विना कारणं हानिमेव।।544।।

धावन् कृष्णं चलन् कष्णं पिबन्नश्नन् हसन् रुदन्।
कृष्णं वद हृषीकेशमुत्तिष्ठन् संविशन्नपि।।545।।

हरेर्भक्ता नित्यं मधुरवचनैर्नाम नृहरे-
र्गृणन्तो ध्यायन्ति प्रमुदितमुखं तं व्रजपतिम्।
प्रणामं देहेन विदधति सदा तच्चरणयोः
प्रतीक्षन्ते मार्गं नयनसलिलैः स्नान्ति सततम्।।546।।

पिबन्तः पीयूषं हरिचरणदुग्धाब्धिनिसृतं
हसन्तो गायन्तः शिशव इव नृत्यन्ति मुदिताः।
अहो हर्षोद्रेकान्न हि किमपि जानन्ति जगतः
सदोन्मत्ता भक्ता ननु मधुपतेः प्रेम्णि नितराम्।।547।।

घृतं भवेद् वा मथितेऽपि नीरे
तैलं कथञ्चित् सिकतासु वा स्यात्।
भक्तिं विना किन्तु महाभवाब्धिः
शक्यो तरीतुं न कथञ्चिदेव।।548।।

वेदांश्च शास्त्राणि तथा पुराणा-
न्यन्यानि वा ग्रन्थशतान्यधीत्य।
सङ्गं च कृत्वाप्स्यसि रामनाम
न जप्यते तद्धि कथं न पूर्वम्।।549।।

त्यक्ता यदीच्छा हि गृहस्य सर्वा
त्यागेन किं वास्ति तदा तवार्थः।
इच्छावशो योऽस्ति वनेन किं स्यात्
तत्रापि तस्यास्ति महाननर्थः।।550।।

न रागेण समो वह्निर्दैत्यो द्वेषसमो न हि।
तृष्णासमा नदी नास्ति न मोहेन समो भ्रमिः।।551।।

अज्ञाय लोकाय विलासभूमि-
रियं च सर्वा जगती विशाला।
विवेकिने चास्ति नियुद्धभूमि-
राजीवनं यत्र च युद्ध्यतेऽसौ।।552।।



आवेगाद् यः स्वकार्याणि करोति न च संयमात्।
प्राप्नोति न सुखं किञ्चिद् व्यत्यस्तं तस्य जीवनम्।।553।।

दृष्टं सकृद् येन च कृष्णरूपं
क्षणाय नेत्रे चलतो न तस्मात्।
आलिङ्ग्य रूपं रुचिरं तदेव
तस्मिन्निमग्ने भवतोऽनुरागात्।।554।।

प्रधावितं यत्र च दिक्षु दृष्टः
प्राचीप्रतीच्यादिषु वा त्वमेव।
अतीत्य मार्गं च गतो हि यत्र
ह्यासीत् स्थितिस्तत्र तवैव नाथ।।555।।

निन्दनीयं निजं कर्म पतने सति सर्वदा।
उत्थाने च हरेरेव गुणा गेया न चात्मनः।।556।।

हत्यां स्तेयं छलं वार्तां गुप्तं कार्यं गतिं तथा।
उत्थानं शयनं चापि सर्वं जानाति माधवः।।557।।

हरे रूपं यथा प्रेम प्रेमरूपो हरिस्तथा।
एकं ह्युभयरूपेण भासतेऽर्कप्रकाशवत्।।558।।

न कोऽपि शत्रुर्न सुहृच्च कश्चित्
क्रुध्यन्ति लोका रिपवे तथापि।
एवं जनास्ते न हि तस्य हानिं
कुर्वन्ति मूढा हि निजात्मनश्च।।559।।

अर्थे कामे च पापे च त्याज्ये कर्मणि चासुरे।
या नियुङ्क्ते कथं विद्या सा त्वविद्यैव कीर्तिता।।560।।

कथं दीनो भूत्वा भ्रमसि मलिनस्त्वं प्रतिगृहं
अहो स्वल्पैरन्नैस्तवजठरपूर्तिः किमधिकैः।
हरिर्यच्छत्यन्नं जलमुदधये योजनशतं
पिपीलीं नागं वा भरति स कथं त्वां न सततम्।।561।।

अहं ममेति शब्दाभ्यां दुःखमापूरितं महत्।
अभावस्तु तयोर्यत्र दुःखाभावोऽपि तत्र वै।।562।।

नष्टे च यद्वस्तुनि दुःखमेव
तत्प्राप्तिपूर्वं न सुखं न दुःखम्।
ध्यात्वा ह्यवस्थामत एव पूर्वां
कुर्वीत कार्यं न हि दुःखमस्ति।।563।।

पर्वतो न यथा कोऽपि वायुना प्रेरितः क्वचित्।
चलति स्तुतिनिन्दाभ्यां तद्वद् विद्वान् न कश्चन।।564।।

हरिर्हरति दर्पं च दर्पस्तस्यास्ति भोजनम्।
पतिता हि जना दर्पान्महान्तः प्रथिता अपि।।565।।

सच्छिद्रात् सलिलं पात्राद् यथा क्षरति सत्वरम्।
सकामस्य मनस्तद्वज् ज्ञानिनो न कदाचन।।566।।

असहिष्णुर्नरो विद्वांस्तपस्वी बुद्धिमानपि।
न सुखं लभते जातु नेश्वरं न परां गतिम्।।567।।

उपदेष्टि यथा चान्यांस्तथा स्यात् स स्वयं जनः।
इन्द्रियाणि वशे यस्य सोऽन्यान् जेतुं समर्हति।।568।।



शत्रुष्वपि प्रेम कुरुष्व तात
प्रयच्छ चाशीरहिताय वापि।
हितं कुरुष्वाथ शुभं च तस्य
ध्यायेः सदा यश्च तिरस्करोति।।569।।

न हि कश्चित् सुखी लोके दृष्टो यश्च मृतो न हि।
सुखान्यपि च लब्धानि यावज्जीवं न केनचित्।।570।।

रतेः सुखं हि बालाय कोऽत्र बोधयितुं क्षमः।
ब्रह्मानन्दप्रसक्ताय बोधयेत् को विदांवरः।।571।।

विमुक्ताः क्रोधकामाभ्यां लग्ना ये हरिसेवने।
पश्यन्ति तन्मयं सर्वं क्रुद्ध्येयुः कं नरं हि ते।।572।।

मनोगजं मदोन्मत्तं पूर्वं निजवशे कुरु।
पश्चाद् गच्छ तमारूढ इन्द्र ऐरावतं यथा।।573।।

अविचार्यैव पापानि कृतान्यन्यानि कुर्वते।
बुद्धिभ्रष्टा नरा किञ्चिल्लभन्ते न सुखं क्वचित्।।574।।

आश्रित्यैव ध्रुवं सन्तो हरिममृतमीश्वरम्।
प्राप्ता अमरतां चान्ये मर्त्या मृत्युं गता इह।।575 ।।

देहरक्ते यथा क्षीणे वायुर्भवति दूषितः।
बुद्धिक्षये त्वहङ्कारो वर्धते या हि मूर्खता।।576।।

ज्ञानवार्तां प्रकुर्वन्ति हृदये च दया न हि।
किं तया वार्तया तेषां हानिरेव हि केवला।।577।।

धन्या ये हि दयाशीलाः प्राणिनः प्रति सर्वदा।
जगत्पितुरनन्तस्य दयाया भागिनो हि ते।।578।।

स्वमौर्ख्यं वेत्ति यो मूर्खो मन्यते न स तादृशः।
जानाति बुद्धिमन्तं स्वं मूर्खः कोन्योस्ति तत्समः।।579।।

दुःखानुभूतिर्न हि यस्य काचिद्
ध्रुवं च तं दुःखिनमेव मन्ये।
योऽसौ च जीवेषु दयाविहीनो
देवः सदा तं प्रति निर्दयोऽस्ति।।580।।

युवानं हसन्तं प्रियाचित्तचौरं
स्वमातुः प्रियं सुन्दरं वापि बालम्।
जरापीडितं रोगिणं चापि वृद्धं
समं हन्ति मृत्युर्निरीहो जगत्याम्।।581।।

नोच्चैस्तिष्ठति पानीयमधस्तादेव तिष्ठति।
नम्रः पातुं क्षमस्तस्माद् यथेष्टं नोन्नताननः।।582।।

एकाकिन्येधते प्रीतिवल्लरी हरिपादपे।
तत्र विस्तीर्णतामेति नान्या वल्ली कदाचन।।583।।

पराजयं वरं मन्ये विन्देत् सर्वं जगज्जयम्।
पराजितो हरिं याति विजयी यममन्दिरम्।।584।।

यो नास्ति काञ्चनासक्तः कामासक्तश्च यो नहि।
हरिश्च हृदये यस्य साधूनां स शिरोमणिः।।585।।

भवाम्भोधेर्महापोतं श्रीरामं शरणं व्रज।
नान्यः कश्चिदुपायोऽत्र समुद्धाराय संसृतेः।।586।।



सर्वान् क्षमस्व संत्यज्य प्रतिशोधस्य भावनाम्।
अन्धकारात् प्रकाशे च गमनं हि सुखप्रदम्।।587।।

निराश्रयं निराधारं विपन्नं सेवते तु यः।
सर्वाधारं च सम्पन्नं स नूनं सेवते परम्।।588।।

मातुर्गृहं मे न हि भाति किञ्चिद्
रम्यं श्रुतं तन्नगरं प्रियस्य।
तत्रैव गन्तुं रमते मनो मे
यत्रैव गत्वा न पुनर्निवृत्तिः।।589।।

न शीघ्रतायां विदधाति विद्वान्
कार्यं कदाचित् स हि मौनमास्ते।
समागते तत्र च धर्मकार्ये
करोति सद्यो न विलम्बते च ।।590।।

महत्सङ्गं सदा कुर्यात् सुखार्थमिह बुद्धिमान्।
महावृक्षे खगाश्छायां लभन्तेऽथ फलानि च।।591।।

अविश्वासी चलो भीरुश्चिन्तावानिन्द्रियानुगः।
संशयात्मा कदाचित् किं स्वप्नेऽपि सुखवान् भवेत्।।592।।

स्वयं मत्वा हि निर्दोषमात्मानं न निरीक्षते।
तस्य दोषाः प्रवर्धन्ते सोऽहङ्कारेण नश्यति।।593।।

दुःखिनं मनुजं वीक्ष्य न भवेद् यो दयापरः।
नूनं भवति कंसारेः स हरेः कोपभाजनम्।।594।।

बाह्यतो यः शुचिर्नित्यं मलिनो हृदये च यः।
स धत्ते निजवासार्थं हस्ते निरयकुञ्जिकाम्।।595।।

सद्द्वेषैर्हि जगत् सर्वं क्रियते निरयं यथा।
स्नेहात्तथैव तत्स्वर्गसमं कर्तुं हि शक्यते।।596।।

नरः पश्यति संसारं विषयी सुमनोहरम्।
तमेव प्रेक्षते साधुर्दुःखाकीर्णं भयावहम्।।597।।

दीर्घसूत्री सदा निन्द्यः कालस्तेयी मतो हि सः।
श्वः करिष्ये परश्वो वा साफल्यं लभते न हि।।598।।

विधातुं नाहितं कोऽपि नापि साधयितुं हितम्।
समर्थस्तव लोकेऽस्मिन् सर्वं प्रकुरुते हरिः।।599।।

दुर्वृत्तजीवनाद् दीर्घाद् वरं तत् स्वल्पजीवनम्।
उपकारे रतस्येह सद्वृत्तस्य विवेकिनः।।600।।

मृते सति नरो नेर्ष्यां कुर्वीत जीविते तथा।
विदधाति यथा मृत्युर्द्वयोः किमपि नान्तरम्।।601।।

विषयान्वेषणे घोरं न श्रमं कुरु साधय।
अन्तःशान्तिं पदार्थेषु न सुखं वर्तते क्वचित्।।602।।

उत्तिष्ठ जागृतो भूया इदानीं सुप्यते कथम्।
पादौ प्रसार्य कस्मिंश्चिद् दिने स्वप्स्यसि सर्वशः।।603।।

शुभस्य बन्धो हि सदाऽशुभेन
बीजं द्वयोर्नश्यति नैव जातु।
रात्रिर्न चेत् स्याद् दिवसोऽपि सत्यं
त्रासाय नित्यं हि भवेज्जनानाम्।।604।।



शान्तेर्महत्त्वं तु नियुद्धकाले
ज्ञातं जनैर्वा भवति प्रवृत्ते।
असत्यमध्याच्छुचयो मयूखा
भवन्ति सत्यस्य रवेरिवाभ्रात्।।605।।

ज्ञानवाप्यां मनस्तीर्थे ध्यानवारिणि येन वै।
मलं प्रक्षाल्य सुस्नातं स तीर्णो भवसागरात्।।606।।

विषयेषु च यः सक्तः स बद्धो नित्यमेव हि।
तेभ्यो मुक्तः सदा मुक्तः स्वतन्त्रः स च राजराट्।।607।।

निरयोऽयं ध्रुवं देहस्तदासक्तिःसुखाय न।
तृष्णाक्षयस्तथा स्वर्गः सर्वदा निश्चितं बुधैः।।608।।

यथैव दुःखिनो जीवान् सुखिनस्त्वं करिष्यसि।
तथैव सुखवृद्धिस्ते हृदये सम्भविष्यति।।609।।

न मूल्यं समयस्यात्र दातुं कश्चित् समर्हति।
अमूल्ये समयः कार्ये देयस्तद्धरिचिन्तने।।610।।

महोर्मय इवाम्भोधेरायान्तीह विपत्तयः।
नगा इव स्थिता धीराः प्रणश्यन्ति विपत्तयः।।611।।

अहं वार्पयेयं धनं निर्धनेभ्यः
स्वदेहं तु दाहाय दद्यांश्च तेभ्यः।
विना प्रेम सर्वं परं त्वर्थहीनं
हरिः पूज्यते प्रेमतत्त्वेन नित्यम्।।612।।

नैश्वर्यं सहते परस्य मलिना बुद्धिश्च यस्यास्ति वै
नित्यं यो हरते नरः परधनं यः प्राणिनां हिंसकः।
मिथ्या वक्ति च यः सदा परुषवाक् चित्तं न यस्य स्थिरं
वासस्तत्र हरेर्भविष्यति कथं कीर्णे मलैर्मानसे।।613।।

हृदयान्तःप्रकोष्ठेऽपि शुद्धमेव विचिन्तय।
वाक्शुद्धिश्च ततः कर्मशुद्धिर्मुक्तिस्ततो ध्रुवम्।।614।।

प्राणवत्सु दया यस्य शुद्धे चित्ते निरन्तरम्।
धर्माय पीडितो योऽन्यैः स च स्वर्गे महीयते।।615।।

हरेरिच्छानुसारं यो नरो गच्छेत् सुखं तदा।
स्वेच्छानुरूपं यो गच्छत्यात्मानं वञ्चयत्यसौ।।616।।

यावत् प्रेम च यस्मिन् स्यात्तावत् स हरिसन्निधौ।
तावच्च तन्मयः स स्याद् यतो प्रेममयो हरिः।।617।।

दुःखस्य नाशो हि ममत्वनाशा-
दज्ञानतस्तत् प्रभवेन्ममत्वम्।
अज्ञाननाशाय जना यतध्वं
ज्ञानेन भक्त्या च महेश्वरस्य।।618।।

हृदये च दया यस्य यश्च धर्मरतः सदा।
नम्रो मधुरवाग् यश्च स एव पुरुषोत्तमः।।619।।

त्वामेव वाञ्छामि सदा ममात्मन्
त्वत्तो हि नान्यत् प्रियमस्तु किञ्चित्।
यान्येव वस्तूनि नयन्ति दूरं
तान्येव नूनं विषवत् त्यजामि।।620।।



चाण्डालोऽपि स्वकार्यं चेन्मार्गसम्मार्जनादिकम्।
ज्ञात्वा नरहरेः पूजां कुरुतेऽसौ प्रसीदति।।621।।

शुद्धश्चरित्रवान् भूया व्यभिचाराद् विदूरतः।
मिथः प्रेम सदा कुर्या इति नूनं हरेर्मतम्।।622।।

दुष्कार्येभ्यः सदा दूरे दुर्भावेभ्यस्तथैव च।
दिवसे चेन्नरो नूनमारात्रिभजनाद् वरम्।।623।।

इच्छानां मनसश्चापि प्रतिकूले चलन्ति ये।
विरलाः पुरुषा लोके शिक्षकास्तु गृहे गृहे।।624।।

नासौ वीरसहस्राणां हन्ता वीरः कदाचन।
कथितः स महावीरो जितं येन निजं मनः।।625।।

पापी जनः सुखी तावद् यावत् पापं करोत्यसौ।
परिपाकेऽथ पापानां दुःखै रोदिति पीडितः।।626।।

नावलोकय सम्पत्तिं पश्य लक्ष्मीपतिं सदा।
जगन्नाथं दयासिन्धुं कृतकृत्यो भविष्यसि।।627।।

दुःखेभ्यो न हि भेतव्यं प्रेरको भगवान् स्वयम्।
तिरस्कारापमानेषु सुखं मत्वा हरिं भज।।628।।

तावद्धि सफलं जन्म यावत् प्राणैर्धनैरपि।
बुद्ध्या वाण्या विष्णुबुद्ध्या प्राणिपूजां करोति वै।।629।।

यावन्न जानाति नरश्च कोस्मि
कार्याय कस्मै च समागतोऽस्मि।

लोकेषु सर्वेषु जयोऽपि तावद्
वृथा श्रमायैव च तद्धि सर्वम्।।630।।

आनन्द आत्मशान्तिश्च जीवनस्य फले त्विमे।
हृदि यस्य हरिर्नास्ति न हि प्राप्नोत्यसावुभे।।631।।

न हि यन्मनसि क्रोधो हृदये त्वहर्निशं च हरिर्यस्य।
विज्ञेयः स हि पुरुषः साक्षात् परात्परो भगवान्।।632।।

यः प्राणिनः पीडयते न किञ्चित्
करोत्यसौ श्रेष्ठतरं हि दानम्।
त्यागं च कृत्वाऽखिलकामनानां
महत्तपोऽसौ कुरुते विपश्चित्।।633।।

पितृदेवातिथिभ्यो वै स्वाश्रितेभ्यस्तथैव च।
दुःखितेभ्यो न यो दद्याज्जीवन्नपि मृतो हि सः।।634।।

जीवनं तरलं नित्यं कमले जलविन्दुवत्।
पारं यातुं च संसारात् साधुसङ्गं समाचर।।635।।

शत्रुणा सह शत्रुत्वं खलु शत्रुत्ववर्धनम्।
उपायस्तद् विनाशाय त्वेकं प्रेम सुनिर्मलम्।।636।।

मांसादना मनुष्या ये प्रत्यक्षा इव राक्षसाः।
तेषां सङ्गो न कर्तव्यः सङ्गात् पापरुचिर्भवेत्।।637।।

जागर्तुं येऽभिवाञ्छन्ति शीघ्रं जाग्रतु ते जनाः।
कालो जागरणायैष सुप्ते जागरणं न हि।।638।।



दुःखिनां हृदयं नैव नैव पीडय नैव च।
रोदिष्यति स तद्दुःखादनर्थश्च महांस्तव।।639।।

साहाय्यं दुःखिनां नित्यं भ्रान्तेभ्यो मार्गदर्शनम्।
यच्छेद् बुभुक्षितेभ्योऽन्नं जनधर्मो ह्ययं मतः।।640।।

सा हानिश्च तदन्धत्वं सोऽपराधश्च मूर्खता।
जडत्वं च क्षणे यस्मिन् न कृतं हरिचिन्तनम्।।641।।

स्वमनो यद्वशे नित्यं स एव हि जगद्गुरुः।
कामा अज्ञानिनश्चित्ते सञ्चिता ज्ञानिनां न हि।।642।।

न रत्नलब्धिः प्रथमावगाहे
रत्नाकरोऽतः किमु रत्नहीनः।
धैर्येण तस्मात् कुरु साधनानि
कालात् प्रयत्नेन तथाच्युताप्तिः।।643।।

द्रष्टुं वाञ्छसि चेत् प्रभुं यदुपतिं राधापतिं माधवं
भक्त्या कीर्तय तद्गुणान् रसमयान् ध्यायस्व तं मानसे।
साधूनां चरणाब्जकेशरकणान् मूर्ध्ना मुदा धारय
त्यक्ताऽथो परनिन्दनं हितपरः स्याः प्राणिनां सर्वदा।।644।।

यावत् कामाः प्रबाधन्ते तावन्नास्ति सुखं क्वचित्।
यावन्नास्ति हरेर्ध्यानं तेषां नाशोऽप्यसम्भवः।।645।।

निर्भयो निश्छलः शान्तो बाह्याभ्यन्तरनिर्मलः।
योऽस्ति साधुःस विज्ञेयस्त्यागी वा यदि वा गृही।।646।।

मोहं विहाय संसारात् तस्मै तद्वस्तु दीयताम्।
भोगेभ्यः केवलं दुःखं जायते मृत्युरेव च।।647।।

धनमाश्रित्य वाञ्छन्ति राज्यं ये परमात्मनः।
निष्कासयितुमिच्छन्ति सूचीछिद्रात् क्रमेलकम्।।648।।

दुःखसिन्धुर्हि संसारः श्रीरामसुखसागरः।
अज्ञाःसुखाम्बुधिं हित्वा मज्जन्ति दुःखसागरे।।649।।

परनिन्दासु पाण्डित्यं स्वकार्येषु ह्यनुद्यमः।
गुणज्ञेषु च यो द्वेषो विपन्मार्गास्त्रयो मताः।।650।।

कठोरतपसो जातेः कृतानां शुभकर्मणाम्।
नास्ति कश्चिदहङ्कारो यस्यासौ भगवत्प्रियः।।651।।

युगान्धकारो युगपत् प्रणाशं प्रज्ज्वालिते याति गृहप्रदीपे
जन्मान्तरैरर्जितपापराशिः कृपावलोकेन हरेस्तथैव।
पतन्ति वह्नौ शलभा न विज्ञा मत्स्याः प्रणश्यन्ति च मांसलोभात्
ज्ञात्वा विपत्तीर्विषयेषु नित्यं वयं पतामः खलु विस्मयोऽत्र।।652।।

जलं प्रसिञ्चन्ति च ये फलानि
चिन्वन्ति ये तेष्वपि पादपा वै।
समा ध्रुवं सत्पुरुषास्तथैव
हिताहितेष्वत्र हि वर्तमानाः।।653।।

कामे क्रोधे मदे लोभे रता दुःखगृहेषु ये।
पतिता भवकूपे ते कथं ज्ञास्यन्ति माधवम्।।654।।



तिष्ठेज्जनो वापि शयीत कोऽपि
मृत्युः सदा मार्गयतीव चैनम्।
प्राप्यावकाशं च निहन्ति शीघ्रं
चिन्ताविहीनोऽसि कथं विमूढ।।655।।

यो निजात्मगतं क्रोधं सन्निधत्ते निजात्मनि।
स रक्षति परक्रोधात् स्वात्मानं खलु सर्वदा।।656।।

कृते प्रयत्नेऽपि हि काष्ठनौका
गन्तुं न शक्नोति विना जलेन।
सन्तोषभावेन विना त्रिलोक्यां
शान्तिर्नराणां हृदये कथं स्यात्।।657।।

रागद्वेषविमुक्तः कर्तव्यपरः फलेष्वनासक्तः।
द्वन्द्वसहिष्णुर्नित्यं सुखी सदा यो हरेर्भक्तः।।658।।

पश्यति वासनादृष्ट्या यः संसारं नराधमः।
लुप्यते हृदयाज्ज्योतिः स्नेहस्य परमात्मनः।।659।।

मृत्युः परिजनासक्तानपक्रामति तांस्तथा।
यथा सुप्तान् नदी रात्र्यां नयेत् कोऽपि न रक्षति।।660।।

हृत्तुलायां तोलयित्वा मुखेन वद सूनृतम्।
अमूल्यं वस्तु तल्लोके वक्तुं जानाति कोपि चेत्।।661।।

यावद्धि वासनाधीनो नरो लोके प्रवर्तते।
असन्तुष्टश्च रोगी च तावद् दुःखैः प्रपीड्यते।।662।।

सुहृद् दर्पणवद् दोषान् नित्यं दर्शयितुं क्षमः।
न दर्शयति यो मोहाच्चाटुकारो मतो हि सः।।663।।

देवा सहायकास्तेषां ये सत्कर्मपरायणाः।
असन्मार्गेण ये यान्ति भ्रातरोऽपि त्यजन्ति तान्।।664।।

अन्धकारे कथं किं वा संस्पर्शेण परीक्ष्यते।
प्रेमज्योतिः प्रकाश्यैव हृद्यन्तः स मिलिष्यति।।665।।
जले दर्पणे हीरके वापि चन्द्रे
समानं रवे रश्मयः संपतन्ति।
विभेदः प्रकाशे यथा पात्रभेदाद्-
धरेः साधकानां तथान्तःप्रकाशे।।666।।

स्नेहज्योतिर्हृद्यन्तस्त्वं प्रज्वालय भो येन भवेयुः।
रागद्वेषा ममत्वदोषाः क्षणेन सर्वे भस्मीभूताः।।667।।

नह्यवलोकय परदोषान् भो निजे चक्षुषी मा कुरु मलिने।
मनश्च मलिनं भवत्यनेन पश्य शिवं सर्वत्र शिवं ते।।668 ।।

प्रसीद दृष्ट्वा सुखिनं लोकं
साहाय्यं कुरु सदा दुःखिनाम्।
दुर्जनसङ्गं त्यज विषतुल्यं
कुरु सत्सङ्गं मुक्तिसाधनम्।।669।।

निन्द्यजीवने त्यजानुरक्तिं
भगवद्रूपे कुर्वनुरक्तिम्।
सदा सुखी यो पश्यति नित्यं
वासुदेवमयमखिलं विश्वम्।।670।।



क्षुद्रा जीवा अपि ते मान्या
भगवद्रूपा न ह्यपमान्याः।
चर्मचक्षुषा न ह्यवलोकय
ज्ञानचक्षुषा सदावलोक्य।।671।।

निजं कार्यं स्वयं कुर्यान्न कदाचित् पराश्रितः।
निजार्जितस्य पात्रेषु दानं दद्याद् धनस्य च।।672।।

विना त्यागं न सत्कारो न तेजो न प्रसन्नता।
न ह्यानन्दो न वा शान्तिर्न मुक्तिर्भवसागरात्।।673।।

गेहस्त्रीपुत्रवित्तानां किं त्यागेन फलं तव।
क्रोधालस्यस्मयोद्वेगान् सर्वांश्च विषयांस्त्यज।।674।।

दर्शयसि यथात्मानं तादृशो भव मानसे।
यथासि हृदये नित्यं बहिर्दर्शय तादृशम्।।675।।

अशान्तं हि मनो यर्हि जानीहि विस्मृतो हरिः।
अतो ध्यात्वा परेशं तं परमां शान्तिमाप्नुहि।।676।।

श्रुताः संक्रामका रोगा सर्वदैव भयंकराः।
दुराचाररता ये तु नरास्तेभ्योऽपि भीतिदाः।।677।।

लोकेऽस्मिन् सुलभं सर्वं विशुद्धं प्रेम दुर्लभम्।
तत्प्राप्य सद्गुणैःसार्धं हृदि विष्णुर्विराजते।।678।।

नाधिकारेषु कुर्वन्ति सृष्टिवस्तूनि कानिचित्।
नाधिकारे च ये तेषां ते सन्तः सन्ति नेतरे।।679।।

यदासौ मन्यते लोकः किञ्चिज्जातोऽस्मि ज्ञानवान्।
ज्ञानद्वाराणि रुद्धानि तदा जानीहि तस्य वै।।680।।

यदा साधुसङ्गात् प्रभोः प्रेममेघा
भविष्यन्ति वृष्टिस्तदाऽनुग्रहस्य।
हरेः सङ्गमः सर्वदा ते हृदन्तः
समृद्धास्तरङ्गास्तदानन्दसिन्धोः।।681।।

हरिर्ददाति तद्वस्तु तस्मै यः शरणं गतः।
सर्वो नश्यति तद्भारो भक्तिर्नामावशिष्यते।।682।।

स्वच्छजीवनदीपोऽयमुत्साहेनैव दीव्यति।
उत्साहादेव दुःखानि तरति सर्वाणि मानवः।।683।।

लौहः सुदृढतां याति प्रहारैः शुद्धतां यथा।
आपतितैर्महाकष्टैस्तथा धीरो दृढव्रतः।।684।।

पन्थास्तस्यैव शुद्धो भवति हि सुगमो दर्शयेद्यस्य मार्गं
सर्वज्ञः सर्वनाथो निखिलभुवनपो दिव्यदृष्टिं समर्प्य।
अन्यो गच्छत्यरण्ये भ्रमति च निविडे कण्टकाकीर्ण एको
नेत्रान्धो निःसहायः प्रचलति नितरां नैव पादं च याति।।685।।

दीर्घः मार्गः स एकोऽस्ति भक्ताद् याति हरिं प्रति।
भक्तं प्रति हरेरन्यो ज्ञेयोऽति सुगमो लघुः।।686।।

कृत्वैव प्राप्यते सर्वं यथा कर्म तथा फलम्।
पूर्वं कृत्वाद्य सम्प्राप्तमन्यत् प्राप्तुं श्रमं कुरु।।687।।



धनं चेत् तर्हि जीवानां सेवार्थं शीघ्रमर्पयेत्।
तच्च वित्तस्य सार्थक्यं हरेश्चैव प्रसन्नता।।688।।

अवश्यं कुरु कर्माणि समाश्रित्य हरिं परम्।
नाकर्मण्यः क्वचिद् भूया धनासक्तिं समाश्रितः।।689।।

न कर्तृत्वाभिमानेन कुर्यात्कर्म कदाचन।
निमित्तमात्रमात्मानं मत्वा कुर्याद्धरिं स्मरन्।।690।।

श्वासैः सार्धं विजानीहि श्वासा एते हि मेऽन्तिमाः।
जागृतोऽभूः सदा ह्येवं मृत्युकालो न निश्चितः।।691।।

भ्रातरः साधुवेषेण दर्शनं वो हरेर्न हि।
एषा साधनसामग्री तद्गर्वान्महती क्षतिः।।692।।

भवकण्टकवृक्षाधो हरेर्ध्यानं भवेद् यदि।
त्यज कल्पतरोर्मूलं हरिविस्मृतये यदि।।693।।

व्याकुलता जिज्ञासा निर्मलता हरिगुणकीर्तनं सततम्।
तत्परता तन्मयता चक्षुर्भ्यां दर्शनं पश्चात्।।694।।

पवित्रः स्याः पवित्रोऽसौ परमात्मा स्वयं विभुः।
प्रेमवृष्टिं पवित्रात्मा पवित्रात्मसु वर्षति।।695।।
साधुर्हसति हर्यङ्के स खेलति मुदान्वितः।
बालवद् गतसङ्कोचस्तत्र गायति कूर्दति।।696।।

न दृष्टः स जनैस्तस्माद् धावन्ति विषयान् प्रति।
वीक्ष्य तं कः श्रुतः साधुर्धावन् वै विषयाननु।।697।।

ध्रुवं वर्षाकाले वहति पवनो वर्षति जलम्
नभोभागे विद्युद् विलसति च नृत्यन्ति शिखिनः।
हरौ दृष्टे तस्मिन् कमलनयने साधुपुरुषा
हसन्तो नृत्यन्तः सलिलमिह वर्षन्ति नयनैः।।698।।

स्वप्रशंसां समाकर्ण्य वारयन् बाह्यतः स्वयम्।
प्रसीदत्यात्मना शान्तो मूढोऽसौ वञ्च्यते जनैः।।699।।

यावन्मात्रमहङ्कारस्तावद् दुःखानि विन्दति।
क्षुद्राहंवर्धनं तस्मादुन्मादः किल मानसः।।700।।

अन्यान् निन्दति यो नित्यं समक्षं तव विद्धि भो।
निन्दिष्यति स तस्मात्त्वामवश्यं चान्यसन्निधौ।।701।।

नित्यस्नानैर्यथा देहः शुद्ध्यतीह मनस्तथा।
शोधयेत्स्वच्छपानीये कृष्णनामसरोवरे।।702।।

लोकदृष्ट्या महान् यस्तु स विज्ञेयो महाधमः।
हरिभक्तं जना मूढं जानन्ति किन्त्वसौ महान्।।703।।

पापानि वापराधांश्च कुर्वतः पापिनो जनान्।
यदि पश्यसि न श्रेष्ठस्तेभ्यस्त्वं न सुरक्षितः।।704।।

यद्यपि दुर्बलाः सर्वे प्राणिनः सन्ति सर्वतः।
मत्तस्तु दुर्बलो नान्य इत्यवेहि न चान्यथा।।705।।

सताममृतकल्पानि वाक्यान्यादाय संस्कृते।
लिखितान्यात्मतोषाय सुखाय तद्विदामपि।।706।।

*।। सम्पन्नेयं प्रेमनारायणद्विवेदिकृता सदुक्तिसप्तशती।।*

# सौन्दर्यसप्तशती

# प्राक्कथनम्*

श्रीमन्तो विद्वद् वरेण्याः काव्यामृतरसाम्भोधिमर्मज्ञाः सहृदयधौरेयाः। न किलैतत् कस्यापि निगूढं यदेकमेव शृङ्गाररसप्रधानं ''विहारि सतसई'' नामानं मुक्तककाव्यग्रन्थं विधाय हिन्दीभाषायां साहित्यक्षेत्रे यादृशी ख्यातिर्महाकविना विहारिणा ( 1600-1650 ई. स्थितेन ) समुपलब्धा न तादृशी केनचिदन्येन।

स एक एव ग्रन्थोऽस्य कवेः कीर्त्याधारः। कवेर्यशः काव्य-गुणानामियत्तयैव निर्धार्यते न रचनापरिमाणेन। मुक्तकपद्यानां सम्भाव्या गुणा विहारिणो लघुष्वपि पद्येषु चरमोत्कर्षेण समुपलभ्यन्ते। यद्यपि मुक्तकेषु प्रबन्ध- काव्यवत् निरन्तरं रसधारा न प्रवहते तथापि पदे पदे तत्र रसानां बहून् लघुनिर्झरान् समुपलभ्य तदास्वाद्य च सहृदया जना लोकोत्तरमाह्लादमाप्नुवन्ति हिन्दीसाहित्येऽस्य कवेरेकैकमपि पद्यं स्फुरत्तेजोमयं महर्घं रत्नमस्ति।

एवं माधुर्यातिशयात् काव्यगुणाधिक्याच्च सहृदयेषु विहारिकवेर्ग्रन्थस्याधिकतरं सम्मानं दृश्यते। अतएव चास्य ग्रन्थस्य पञ्चाशद- धिकाष्टीका हिन्दीभाषायां प्राप्यन्ते। छप्पय-कुण्डली-सवैया-रोला- आदि विविधेषु छन्दःसु च पद्यानां भावा बहुभिः कविभिः पल्लविताः प्रेक्ष्यन्ते। पण्डितप्रवरेण परमानन्देन च ''शृङ्गारसप्तशतीति'' नाम्ना संस्कृतपद्येषु ''विहारि-सतसई'' ग्रन्थस्यैकः संस्कृतपद्याऽनुवादोऽपि समुपस्थापितो वर्तते उर्दूपद्येष्वपि चास्यानुवादो लभ्यते।

यद्यप्यस्मिन् ग्रन्थे कतिपयानि पद्यानि नृपतिसातवाहन हाल ( 72 ई. ) सङ्गृहीताया ''गाथासप्तशत्याः'' गोवर्धनाचार्यस्य

*कविना लिखितं प्रथमसंस्करणस्य प्राक्कथनम्।



''आर्यासप्तशत्याश्च' ( 12 शताब्दी ) छायामाश्रित्य निर्मितानि परं तत्रापि स्वप्रतिभाबलेनाधिकतरं सौन्दर्यं निष्पादितं कविना।

तत्सुधासरोवरसं च स्व संस्कृतभाषामाध यमेनानुभवितुमनुभावयितुं च तद् ग्रन्थरत्नं ''सौन्दर्यसप्तशतीति'' नाम्नानूद्य मयाप्येष प्रयत्नः कृतोऽस्ति। यदि सहृदयानां हृदये तच्चित्ताह्लादकं किमप्यापतेत् तत् कृतार्थोऽहम्।

अस्य ग्रन्थस्य सटीकं प्रामाणिकं संस्करणं जगन्नाथदासरत्नाकरेण समुपस्थापितं विद्यते तदेवाश्रित्य डा. गणपतिचन्द्रगुप्तेन ''लघुसंस्करणं हिन्दी टीकया समेतं'' राजकमल प्रकाशन संस्थया प्रकाशितमस्ति। तत्क्रमसंख्ययैव अस्या ''सौन्दर्यसप्तशत्याः'' श्लोकसङ्ख्या मया निर्धारिता। ग्रन्थाकारविस्तरभयाद् ''विहारिणः पद्यानि'' नोपस्थापितानि। श्लोकानामर्थश्च स्वयमेव ज्ञेयो विद्वद्भिः ।

**अन्येऽपि संस्कृतभाषायामनूदिता ग्रन्थाः-**

श्रीतुलसीदासमहाकवेः - ( 1 ) वैराग्य संदीपनी, ( 2 ) दोहावली ( श्लोकावलीनाम्ना ), ( 3 ) श्रीमद्रामचरितमानसम् ( 4 ) रहीमकवेः, कबीरस्य, दादूदयालस्य, नारायणकवेः, बुद्धस्य कन्फ्यूसिसमहोदयस्य अन्येषां च बहूनि पद्यानि च। ( 5 ) सूक्तिरत्नाकरः - बहूनां महात्मनां हिन्दीभाषाया वाक्यानि सङ्गृह्य संस्कृतश्लोकैः ग्रथितः ( 6 ) पद्यकादम्बरी - विन्ध्याटवीवर्णनपर्यन्ता।

**लघुकाव्यबन्धाः-**

ऋतुवर्णनम्, प्रकृतिसौन्दर्यम्, स्तोत्राणि, महापुरुषाः, मातृभूमिः, मातुर्हृदयम्, सर्वं जगत् सुखमयम् इत्यादि विविधविषयानाश्रित्य कृता लघुप्रबन्धाः सन्त्यनेके। समये प्राकाश्यमायास्यन्ति। प्रथमं तावत् सौन्दर्यसप्तशतीमेव प्रकाश्य विदुषामाशीर्वादमीहे।

भावत्कः

प्रेमनारायणद्विवेदी

## मङ्गलाचरणम्

ज्ञप्तिरूपं ज्ञानगम्यं वाङ्मनोबुद्ध्यगोचरम् ।
विघ्नेशं विघ्ननाशाय नमामि गणनायकम् ।।

नत्वा हृषीकेशमनन्तमाद्य- मन्तः स्थितं स्वात्ममनः प्रशान्त्यै।
विहारिणः संस्कृतभाषयाहं बध्नामि तां सप्तशतीं प्रसिद्धाम्।।

नारायणो नाम तदंशभूतः प्रेम्णा समेतस्त्विव सिन्धुविन्दुः।
करोमि यत्तस्य कृपालवेन सम्प्रेरितस्तस्य पदं हि लब्धुम् ।।

यतो बुद्धिर्यतो ज्ञानं तनुर्वा पाञ्चभौतिकी ।
तं गुरुं परमानन्दं भक्त्या नौमि शुभ-प्रदम्।।

## सौन्दर्यसप्तशती

गौराङ्गप्रभया यस्याः श्यामोऽपि हरितायते।
नागरी राधिका सेयं भवबाधां हरेन्मम ।।1 ।।

गच्छन्ति वृद्धिं नवयौवनायाः स्तनौ नितम्बौ नयने मनश्च।
प्राज्ञेन कामेन नृपेण मन्ये दत्ताभिवृद्धिस्त्ववगम्य पक्षे ।।2।।



उल्लासो हृदये तथा चतुरता चेष्टासु संलक्षिता
बालाया अतिदीर्घयोर्नयनयोर्दैर्घ्यं च सन्दृश्यते।
कन्दर्पेण समेरिता ध्रुवमिमे स्पर्धामिवातन्वते
नो कश्चिद् विनिवर्तते निजहठात् संवर्धते यत्नतः ।।3।।

कनीनिकेऽस्या रमणीय एते
प्रेम्णः स्वपत्युः किल तौ मणी द्वौ।
याभ्यां सपत्नीषु शिरोमणिः सा
सुपक्ष्मलज्जावरणावृताभ्याम् ।।4।।

जन्मलग्ने स्नेहशिशो – रक्षिमीने गते शनौ।
कज्जले किं न नृपवद् देह देशं स भोक्ष्यति ।।5।।

स्नेहशिशोर्जन्मलग्ने, अक्षिरूपे मीने – मीनराशौ
कज्जले शनौ कज्जलरूपे शनौ स्थिते सति,
स स्नेहशिशुः किं न नृपवत् देहदेशं भोक्ष्यति
कर्णावतंस कोटिं वा भल्लाग्रं मन्मथस्य तम्
मन्ये निखातं हृदये नह्युत्खातुं कदाचन ।।6।।

इयं विलीनेव सुचन्द्रिकायां
न दृश्यतेऽस्याः सखि किञ्चिदङ्गम् ।
सुगन्धसूत्रग्रथिता अथापि
गच्छन्ति सख्यो मधुपाश्च सार्धम् ।।7।।

सौम्य प्रमुग्धाऽस्मि छविं विलोक्य
तस्यास्त्वमेवैष्यसि चेह मोहम् ।
तदङ्गकान्त्या नवमल्लिकाया
माला विभातीव सुवर्णजात्याः ।।8।।

रूपेण तृप्ते नयने मदीये
जाते प्रमत्ते नहि पश्यतस्ते।
स्थानं क्षणं वा हृदयस्य वार्ता
सर्वत्र देशे ब्रुवतः प्रसह्य ।।9।।

भूयो गच्छति तत्रैव लज्जारज्जुविखण्डिता ।
अङ्गसौन्दर्यपाथोधि-भ्रमिनौकेव मे मनः ।।10।।

न श्रुत्वा मद् वचो नाथ याच्ञा मे व्यर्थिता त्वया।
मोचयित्वा गजेन्द्रं तं कृतकार्यं हि मन्यसे ।।11।।

विरम्य किञ्चित्तु सतृष्णाया मां
दृष्ट्यापटान्तर्गतया क्षणं सा ।
वीक्ष्याथ संस्पर्श्य छलात्स्वच्छायां
बालाऽतिरम्या त्वरितं प्रयाता ।।12।।

विशाले नयने त्वस्याः सेवेते कर्णकाननम् ।
कामेन मुनिना मन्ये युक्तिर्योगस्य दर्शिता ।।13।।



श्रुत्वैव शङ्कां कुरुषे सखि त्वं
न शोभनीयः खलु ते स्वभावः।
नवप्रफुल्लां नलिनीं विहाय
नहि द्विरेफो रमतेऽर्कपुष्पे ।।14।।

पत्युर्वियोगोत्थमसह्यदुःखं
पितुर्गृहं गन्तुमतीवहर्षः।
प्राणांस्तु दुर्योधनवन्न जह्या-
दाकृष्यमाणोभयतः कथञ्चित् ।।15।।

सूक्ष्मेऽचलेऽन्तः ससुवर्णहारः
समुज्ज्वलो भाति चलस्तथैव।
यथा पयोधौ परिशोभमाना
सपल्लवा कल्पतरोर्हि शाखा ।।16।।

सौन्दर्य - धूर्तोजन-नेत्र - पान्थान्
कान्त्या चमत्कृत्य सुहासपाशे।
दृढं गृहीत्वाथ निहत्य निम्ने
न्यपातयत्तांश्चिबुकस्य गर्ते ।।17।।

कृष्णास्य रूपे मिलितं मनो मे
ह्यगाधसिन्धाविव सैन्धवीयम्।
त्वयैव नूनं सखि चिन्तनीयं
पृथक् प्रयत्नैः क्रियते कथं तत् ।।18।।

मनस्त्वदीयं यदि वाद्य पुष्पितम्
अवश्यमेतत्सफलं भविष्यति।
निवार्य धर्मं तु रुषं पुनः पुनः
विसिञ्च सुस्नेहजलेन वाटिकाम् ।।19।।

न मुक्ते कुण्डले तस्या श्रुतिसेवा परे सदा।
मुक्तानां समुदायस्तु नासिकाऽश्रयमागतः ।। 20।।

यमहस्तिमुखे ज्ञात्वा स्वात्मानं नृहरिं भज।
विषयाशां परित्यज्य चित्तं तस्मिन्नियोजय।।21।

अहो ते ताम्बूलं नयनपटयो राजत इव
ह्यलक्तं ते भालेऽप्यधरफलके कज्जलमिह।
कथं शोभा वाच्या नटवर तवेयं निरुपमा
तथाप्यद्यैवं ते मिलनमभवन्मेऽतिसुखदम्।।22।।

सलज्जे सगर्वे महोल्लासपूर्णे
तथाऽलस्ययुक्तेऽपि नेत्रे सहास्ये।
त्वदीये रतिं रात्रि - कालस्य तूर्णीं
प्रसह्याहतुस्ते वशे नैव किञ्चित् ।।23।।

कथयन्तं रतेर्वार्तां पतिं दृष्ट्वा स्मिताऽभवत् ।
उक्त्वान्यत्र ततः सख्यः सहास्याः सुखिता गताः ।।24।।



उरसि वससि राधे हारवल्लीव मे त्वम्
अत इति कथनीयं ह्युर्वसी त्वं ममेति ।
अनुचितमथवैतत्क्षम्यतां मेऽपराधः
क्व हि भवति समाना साप्सरा देवदासी ।।25।।

पयोधराद्र्योः प्रथमं हि गत्वा
श्रान्ता तु दृष्टिश्चलिता मुखेऽस्याः।
विरम्यतर्षात्तु सुरूपलुब्धा
गर्तेहनोः सा पतिता प्रसह्य ।। 26।।

निवारयैते नयने सुतीक्ष्णे
वेधं मदीये हृदये दधाते।
आश्चर्यमेतत्तव नासिकाया
बेधोऽपि वेधं कुरुते प्रसह्य ।। 27।।

कज्जलं मस्तके दत्तं चिह्नं दृष्टिनिवारकम्।
अहो द्विगुणिता भूत्वा मुखदीप्तिः प्रकाशते ।।28।।

नेत्राभ्यामति - रूक्षाभ्यां मानं प्रकटितं तया।
ज्ञातं प्रियेण तत्सर्वं तस्या गूढस्मितेन च ।। 29।।

क्षणं विलोक्य तान् सर्वान् दृष्टिःसद्यो निवर्तते।
तत्र तिष्ठति यत्रास्ते तत्प्रियः सातिचञ्चला ।।30।।

कथं प्रशस्तिस्तव सा मुरारे
भवेत्स्थिरा नाथ न सोऽस्मि गृद्धः।
यं तारयित्वा हि वृथाभिमानी
पश्यामि शक्तिं मम सम्मुखश्चेद् ।।31।।

मयि ब्रुवाणे नहि सा ब्रवीति
स्नेहे कृते कुप्यति दृष्टिपाते।
विलज्जमाना हसतीव मुग्धा
गेहे जने सत्यपि नेत्रवार्ता ।।32।।

तस्यां मनोऽस्यातिचलं च शीघ्रं
तत्रैव पादौ स्खलितौ दधाति ।
अथागमोऽस्याः कुटिलस्य तस्य
प्रशामयत्येव वियोगवह्नि म् ।।33।।

दृष्ट्वा गुरुजनमध्ये शिरसि सरोजं स्पर्शयति श्यामः।
कृत्वा हरेः समक्षं दर्पणमर्पयति हृदये सा।।34।।

पादौ रञ्जयितुं तस्या दासी तत्र समागता।
रञ्जितौ च विनालक्तं दृष्ट्वा स्पृशति सा पुनः।।35।।

नान्यत्र रमते चित्तं लग्नं त्वय्ययि निर्मम ।
नायात्यनागते नूनमायाति त्वयि चागते ।।36।।



स्नेहश्च नायं हि महाविपत्ति-
र्जाताद्य तस्या नव नेत्रयोर्वा ।
यतः प्रपूर्णेऽश्रुजलेन नित्यं
तृषाकुले ते भवतो न तृप्ते ।।37।।

अये षडङ्घ्रे न विकासकालो
न वा परागो मधुरो रसो वा।
तथापि लग्नः कलिकामसित्व-
मग्रे गतिस्ते नहि कल्पनीया ।।38।।

त्वद्विरहानलः श्याम वर्ततेऽतिविलक्षणः।
नीरं वर्षति नेत्राभ्यां ज्वालात्यन्तं प्रवर्धते ।।39।।

वध्वा यथा द्युतिर्देहे यौवनस्य समेधते ।
सपत्न्याननमालिन्यं वर्धते हि तथा तथा ।।40।।

यः प्रभुर्दत्तवान् ज्ञानं सर्वं जानासि तं नहि ।
जगद्दृष्टवाऽपि वा नेत्रे स्वात्मानं नहि पश्यतः।।41।।

विदौ भौमो मुखे चन्द्रस्तिलकेऽस्या बृहस्पतिः।
एकतस्त्रिग्रही सर्वं करोति रसवज्जगत् ।।42।।

कज्जलाङ्कं मुखे वीक्ष्य स्मित्वोवाच प्रियः प्रियाम् ।
युक्तमेतत्त्वया नूनं मुखमिन्दुसमं कृतम् ।।43।।

जपापुष्पारुणौ तस्याः पादौ वीक्ष्यानुशोचती ।
निरुपायाऽथ सैरङ्ध्री तस्थौ यावकलेपने।।44।।

कर्णारण्यचरे दक्ष-काम-व्याध-प्रशिक्षिते ।
तन्नेत्र उद्यते हन्तुं मन्ये पौरान् मृगान् सखे ।।45।।

शृङ्गारसुस्नेहरसप्लुतेयन्
नेत्रे विदूरीकृत पद्मशोभे।
विनाञ्जनं खञ्जनं गञ्जने ते
मन्मानसं रञ्जयतः प्रसह्य।।46।।

सुसज्जिते पूर्णतयैव पूर्वं
विलोचने मोहनमोहनाय।
रूपेन्द्रजालेन विमोहितेऽथ
भाग्याद्धि सर्वं विपरीतमेव।।47।।

हृदि लग्नो वियोगाग्निर्वर्धते गन्धिवारिणा।
प्रियवार्तासमीरेण शाम्यतीति विलक्षणम् ।।48।।

न कुरु न कुरु हासं भो सखे वार्तया त्वं
शृणु शृणु मम वाक्यं त्यज्यतां कार्यमेतत्।
बहुल शपथपूर्वं सा स्मिता किञ्चिदेव
नहि नहि खलु सम्यग् येन रुष्टा भवेत्सा।।49।।



शाखासु गुप्तः खलु चित्र को यद्
वने मृगं हन्ति न विस्मयोऽत्र।
नेत्रे निमग्ने नव - नील - शाट्यां
मनो मृगं मारयतस्तवैते ।।50।।

श्वासा न योग्याः प्रवलेऽपि दुःखे
सुखेऽपि रामस्मरणं न हेयम् ।
दैवं हि दैवं विफलं ब्रवीषि
दैवेन दत्तं हि सदा प्रशंस्यम् ।।51।।

ग्रीष्मस्य काले प्रहरे द्वितीये
छायापि छायेच्छुरितीह मन्ये ।
सा वा विलुप्ता सघनेष्वरण्ये-
ष्वथवा प्रविष्टा भवनेषु राज्ञाम् ।।52।।

मुखं समुद्घाट्य च दर्शयैतन्
नेत्राणि नृणां सफलीभवन्तु ।
सङ्कोचमायान्तु नवां नलिन्यः
प्रहास्यतां गच्छतु पूर्णचन्द्रः।।53।।

अये ध्रुवं त्वन्मिलनाशया सा
जुहाव सर्वाणि सुखानि धैर्यात् ।
सुस्नेहवह्नौ स्वयमेव पश्य
ज्वालामुखीवज्ज्वलितुं प्रवृत्ता ।।54।।

नयने पश्य समाये त्रिरङ्गरक्ते सायकतीक्ष्णेस्याः ।
दृष्ट्वा लीनाः मीनाः सलिले कमलानि लज्जन्ते ।।55।।

स्थित्वाऽत्र किं चल नु पश्य सखीं विपन्नां
भीताऽथवा प्रचलिताऽथ गतव्यथा सा ।
दीर्घं च नोच्छ्वसिति नैव च हेति शब्दः
संश्रूयते सखिभवेन्न मृता कदाचित् ।।56।।

मनस्त्वया गच्छति मे सहैव
हानिर्वियोगेन हि का ममात्र ।
उड्डीयते यद्यपि खे पतङ्गः
सूत्रं करे तिष्ठति धारकस्य ।।57।।

तवाङ्गसौन्दर्यरसाभिषिक्ते
भविष्यतः कस्य विलोचने वा।
को वा कृतार्थोऽद्य भविष्यतीह
कस्मै प्रसन्नो रतिराजदेवः ।।58।।

कर्पूरं वेत्ति विक्षारं नासारोगी विलोक्य चेत्।
तत्-शैत्यस्य सुगन्धेश्च महिमा नहि हीयते ।।59।।

सन्देशकथने लज्जा लिखितुं च न शक्यते ।
कथयिष्यति मद्वार्तां हृदयं ते हृदिस्थिताम् ।।60।।



कस्य दीनस्य बन्धुस्त्वं कस्त्वया तारितो जनः ।
मिथ्योपाधिं दीनबन्धुरिति धृत्वाऽभिमन्यसे ।।61।।

यदा यदा त्वत्स्मरणं करोमि
तदा स्मृतिः सा परिलुप्यते मे।
दृष्टिश्च लग्ना तव चक्षुषोर्मे
निद्रा विलुप्ता क्वचिदेव नाथ ।।62।।

ज्ञात्वेव नाथेन सुविस्मृताऽहं
नन्वत्र कः श्रोष्यति कं वदेयम् ।
गर्जन्ति मेघा गगने प्रसन्नाः
मन्ये खलास्ते प्रतिशोधवृत्या ।।63।।

योगेन दीप्तिर्मम नेत्रयोः स्या-
दतस्तथेवाचरितं मया तु ।
प्रपीडनायैव हि भाग्ययोगा-
ज्जातः परं चेह ममाश्रुरोगः ।।64।।

सोल्लासेव तु पूर्वं वार्तायां सारताऽभवत् किन्तु।
पत्युः सरुषे नयने विलोक्य तस्थावधोमुखी रुष्टा ।।65।।

उक्ता मया त्वं कति वारमेवं
विश्रम्भयोग्ये न विलोचने ते ।
श्रुतं न किञ्चिन्नमतं त्वयैते
समर्प्य नेत्रे परिदह्यसेऽन्तः ।।66।।

कन्दर्पबाणौ विजितौ तु याभ्यां
नैतादृशे वा नयने हरिण्याः ।
मया न पूर्वं क्वचिदन्यतो वा
दृष्टेऽद्य नेत्रे सफले ममापि ।।67।।

त्वया प्रतिज्ञा खलु विस्मृता किं
स्वल्पैर्गुणैर्यद् भवसि प्रसन्नः।
दृष्ट्वा जनान्वा कृपाणाँस्तु लोके
जातोऽसि किं वा कलिकालदानी ।।68।।

कलेवरे दीपशिखा सदृक्षे-
ऽलङ्कारदीप्तिः प्रविराजतेऽस्याः।
अङ्गेषु सौन्दर्यनिकेतनेषु
शान्तेऽपि दीपे भवने प्रकाशः।।69।।

बाल्यत्वकान्तिर्न गता तथापि
प्रकाशर्तेऽगेषु च यौवनश्रीः।
सम्मेलनाद् यौवनबाल्ययोः सा
शोभा तु छायातपयोर्जिताऽस्ति ।।70।।

आर्तस्वरेणात्र रटामि कालात्
कस्मात्सहायं न करोषि नाथ ।
जगद्गुरो नायक विश्वभर्त :
प्रभावितः किं भव-मारुतेन।।71।।



सुतीक्ष्णवाक्यैर्न बिभेहि कृष्ण
सङ्कोचमायाहि न वा तयोक्तैः।
स्नेहाप्लुतेऽस्या नयने सनृत्ते
वक्तुं प्रवृत्ते हृदयस्य भावम् ।।72।।

आननप्रभया तस्याः सर्वदा परितो गृहम्।
पूर्णिमा वर्तते तत्र पञ्चाङ्गे तिथिनिर्णयः ।।73।।

सङ्कोचलङ्केशवशेन बाला
ध्रुवं न पूर्वं मिलितुं समर्था।
ज्वालासु तत्स्नेहभवासु तप्त्वा
स्थिताद्य सीतेव विशोध्यदेहम् ।।74।।

मुक्त्या तया किं सखि मेऽतिलाभः
युक्तिर्न यत्र प्रियसङ्गमस्य ।
लब्ध्वा निजं जीवननायकं तं
सुखप्रदो मे निरयेऽपि वासः।।74।।

श्वसिति हसिति विकम्पते कुप्यति झटिति च लतेव वेष्टयति ।
एवं रतिरपि मुक्तिर्मुक्तिर्ज्ञेयाऽन्यथा हानिः।।75।।

श्वसिति हसति बाला कम्पते कुप्यतीव
झटिति नवलतावद्वेष्टयित्वा प्रगाढम् ।

इति रतिरपि मुक्तिर्येन लब्धा स मुक्तो
भवति भवति हानिर्वाऽन्यथा मुक्तिलाभे ।।76।।

क्षणेन रूपमाधुर्यं मामास्वाद्य गतश्छलात्।
ममाक्षिणी तु मां हित्वा तन्मार्गमेव धावतः।।77।।

कुवलयनयना सा मज्जनं संविधाय
मृदुलकुटिलकेशाँल्लालयन्त्यङ्गुलीभिः।
परिजनगणदृष्टिं वञ्चयित्वाथ मध्ये
किमपि किमपि पश्यत्यच्युतं नन्दसूनुम् ।।78।।

अनल इव तु नूनं नेत्रयोर्दह्यते मे
न च मयि कुपितः स्यास्त्वं वृथा नाथ शीघ्रम् ।
कमलनयन पश्यत्वाननं दर्पणे स्वं
खलु विलसति भाले चन्दनं यावकं वा।।79।।

कर्तुं समर्था नहि यस्य साम्यं
लक्षाधिका चेत्समितौ चमूः स्यात् ।
गृह्णन्ति तस्माज्जयसिंहतस्ते
नरा उदाराद् बहुलक्षमुद्राः।।80।।

मत्वा प्रभोः प्रेममयं प्रसादं
गृहाण सर्वं तु समादरेण।
यस्मात्सुखं वाञ्छसि तेन दत्तं
दुःखं त्वया नैव निवर्तनीयम्।।81।।



रक्तौ कपोलौ सखि मध्यतः किं
सुवर्णकर्णाभरणावघट्टात्।
मया त्विदानीं नहि दृश्यमानौ
मन्ये विलुप्तौ तनुकान्तिमध्ये ।।82।।

मह्यं समर्पितं चित्तं मत्प्राणैः सह तत्स्थितम् ।
तद् बद्ध्वा च सपत्नीभ्यः प्रार्थये नाथ नार्पयेः।।83।।

चलतु चलतु गेहं तत्परित्यज्य कुञ्ज
व्रजविपिनविहारिन् श्रूयतां प्रार्थना मे।
स्थलकमल-दलानां स्फोटनादत्र शब्दो
वदति किमपि मन्दं सूचयन्नत्र कर्णे।।84।।

वदति कुलवधूः सा नैव किञ्चित्कथञ्चित्
गृहकलहविभीता देवरस्यापि चेष्टाः।
निजगृहगतमार्जाराद्विभीता शुकीव
प्रतिदिनमतिशुष्का जायते पंजरस्था।।85।।

नभः शशी चन्दनमम्बुजानि
प्रियं विना नीरसमेव सर्वम् ।
समीरणश्चन्दनगन्धमिश्रः
प्राणाँस्तु मन्दोऽद्य हरिष्यतीह।।86।।

सर्वत्र भीतिः प्रसृता जनेषु
न कोऽपि मार्गे व्रजितुं समर्थः।
उच्चेषु नूनं कुचपर्वतेषु
कन्दर्पदस्योः प्रबलस्य वासः।। 87।।

प्रदर्श्य नाभिं त्रिवली प्रदर्शिता
सलज्जया चाथ शिरोऽवगुण्ठित्।
विहस्य दृष्ट्वा त्वथ पार्श्वतः सखे
मनोहरन्ती गजगामिनी गता।।88।।

क्षीणा प्रतिदिनं बाला जायते साति सुन्दरी।
कर्पूरवन्न लुप्ता स्यादिति मे वर्तते भयम्।।89।।

विहस्य तद्दिने दत्तां गुञ्जामालां त्वया हृदः।
प्राणेभ्योऽपि प्रियां मत्वा कर्पूरमिव रक्षति ।।90।।

कश्चिच्चिनोति लक्षाणि सहस्रं कोटिमेव वा।
सर्वदा मम सम्पत्तिर्यदुनाथः स दुःखहा।। 91।।

पश्याम्बरे द्वितीयायाः सुधानिधिकलामिमाम्।
मन्ये सागस्त्यवृक्षे हि कलिकैका विकासते ।।92।।
गौराङ्गी ग्रामबाला सा भाले तिलकमण्डिता।
चक्षुः प्रहारं कुर्वन्ती स्थिता वीराङ्गना यथा।।93।।



सङ्गीतवाद्ये सरसे च काव्ये
सुस्नेहवार्तासु रतेः प्रसङ्गे।
मग्ना युवानो हि तरन्ति शोक-
मन्ये च वृद्धा इव ये न मग्नाः।।94।।

स्निग्धान् प्रकृत्या रुचिरांश्च कृष्णा-
न्छुचीन्सुगन्धीन् कुटिलांश्च सौम्यान्।
दृष्ट्वा कचान् मे तु मनः प्रसह्य
प्रयाति मार्गं न विचार्य मुग्धम् ।।95।।

रतेः प्रदीप्तिं न हठात्समर्था
गोप्तुं प्रयत्नैः सखि पश्य मुग्धे।
ताम्बूलवर्णे विगतेऽपि दृष्टा
तवाधरे साऽरुणिमा मनोज्ञा।।96।।

ध्रुवं सुरेखा हृदये सुहार -
सङ्घट्टजा नास्ति विराजते या।
शरैरनङ्गेन मनः करी ते
प्रताडितो वै स्ववशं विधातुम् ।।97।।

आश्चर्यं महदाश्चर्यं न म्लाना स्नेहवल्लरी ।
ज्वालासु विरहस्यापि प्रत्यहं हरितायते।। 98।।

दृष्टप्रिया हि दोलायाः गगनादप्सरा इव।
पतिता धारिता मध्ये सुखं लब्धं प्रियेण तत् ।। 99 ।।

त्वद्दन्तदीप्त्या खलु दर्शकानां
चमत्कृतानीव विलोचनानि।
भवन्ति वाणीं त्यज हास्ययुक्तां
यस्माज्जनाःस्युर्मुखकान्तितृप्ताः ।। 100 ।।

जातो द्विजकुले नाथ वससि स्वेच्छया व्रजे ।
सर्वाणि मम कष्टानि हर केशव केशिहन् ।। 101 ।।

देहप्रदीप्त्या नवयौवनायाः
म्लानेव चामीकरचारुदीप्तिः ।
वार्ता कथं केसरचम्पकानां
क्रियेत नूनं तदनादरार्थम् ।। 102 ।।

हैमे सुनक्राकृतिनी प्रदीप्ते
सुकुण्डले कर्णगते मुरारेः।
मनोजराज्ये विजयध्वजे द्वे
मन्ये सुबद्धे हृदयप्रदेशे ।। 103 ।।

निःशङ्कः कामव्याधोऽयं निहन्ति युवकान् मृगान् ।
भ्रूभङ्गधनुषा बाणैर्भाले तिलकसम्भवैः ।। 104 ।।



मनोज्ञस्तिलको भाले रत्नैर्विद्योतितैः सखे।
चन्द्रमण्डलमध्यस्थे मार्तण्ड इव राजते ।। 105 ।।

शाट्यां समुज्ज्वलायां तु चञ्चले स्वर्णकुण्डले।
गङ्गायाः सलिले प्रातः रविबिम्ब इवोज्ज्वले।।106 ।।

उक्त्वोक्त्वाहं परिश्रान्ता प्रियो नीतश्च पादयोः।
तथापि सरुषी नेत्रे किं फलं वा भविष्यति ।।107 ।।

कोपेन चातिकठिनं हि मनः करोमि
नूनं भ्रुवौ सुकुटिले परुषं वचश्च।
वीक्ष्याननं सुललितं नितरां मुरारेः
नेत्रे ममैव सरसे भवतः सहास्ये ।।108 ।।

विलोक्य दीप्तिं सुतरां युवत्या-
श्छायेव जाता शशिचन्द्रिकाऽपि।
सखे परिब्रूहि च तां विहाय
कोऽन्यां प्रतीक्षेत नरः सुवामाम् ।।109 ।।

असूनां तु दशा तस्या हरे वक्तुं न शक्यते।
ज्वालेव विरहो मृत्युः शुभाशीरिव विद्यते ।। 110 ।।

सम्पत्या कार्पण्यं सह कृपणस्यातिवर्धते ।
यथा यथा हि वर्धते कठोरौ भवतः कुचौ ।। 111 ।।

यथैव यौवनज्येष्ठे दिवसौ हि पयोधरौ।
विवर्धेते तथैवास्याः कटिः क्षीणेव शर्वरी ।। 112 ।।

न तत्ताम्बूललौहित्यं कथं रूक्षं निरीक्ष्यते ।
सा कुण्डलमणेः कान्तिः कपोले प्रतिबिम्बिता ।। 113 ।।

देहवल्ली तु प्रक्षीणा कथञ्चित्परिदृश्यते ।
उत्तिष्ठति हरेर्नाम्नि प्रोक्ते दीपशिखेव सा ।। 114 ।।

गता निशाखेऽरुणिमा सुरम्या
रुतं समारब्धमथो शकुन्तैः ।
समागतो नैव च पद्ममाली
लब्धा रतिः क्वापि च तेन मन्ये ।। 115 ।।

स्वप्ने घनश्यामतनौ मिलित्वा
व्यथा वियोगप्रभवा व्यतीता।
परं विनिद्राऽप्यतिनिर्दया सा
गता सखे क्वापि विनिन्दनीया ।। 116 ।।

केशाः प्रलम्बा मनुजाः कुलीनाः
दृष्टा नमन्तः सततं जगत्याम् ।
कुचा वधूनां पुरुषाश्च नीचा
ऊर्ध्वं समृद्धौ प्रतियान्ति नूनम् ।। 117 ।।



नेत्राणि पद्मसदृशानि हि कामिनीनां
वाचा वदन्ति कवयोऽपि निरूपयन्ति ।
सम्मेलनाद् भवति यद् विरहानलोऽत्र
मन्ये ध्रुवं च कथयाम्युपलानि तानि ।। 118 ।।

हरे मुरारे मम नाथ नाथे-
त्युक्त्वा समुत्तिष्ठति सा विपन्ना ।
श्रान्तास्म्युपायैश्च पुनः प्रयत्नै -
र्ज्वरस्त्वया वैद्य विमोचनीयः ।। 119 ।।

रत्नं विनश्यद्रक्षित्वा यशो लोकेष्ववाप्यताम् ।
सुदर्शनेन गोविन्द विषमं नाशय ज्वरम् ।। 120 ।।

रागिणो मम चित्तस्य गतिर्ज्ञेया न कस्यचित् ।
स्नात्वा स्नात्वा श्यामरङ्गे जायतेऽतिसमुज्ज्वलः ।। 121 ।।

माला दत्ता सपत्नीनां समक्षे तत्प्रियेण या।
म्लाना जाताऽधुनाऽथापि प्रसन्ना सा प्रधावति ।। 122 ।।

लब्धं तया नवस्नेहात् स्वप्रियस्याङ्गुलीयकम् ।।
चुम्बति पश्यति प्रेम्णा धत्ते वक्षःस्थले पुनः ।। 123 ।।

कमलनयन तस्या जायते मृत्युशङ्का
विलसति हि सजीवः केवलं चित्तहंसः।
विरहजनित-वह्नि -ज्वाल-मालाविभीतः
प्रभवति नहि मृत्युः श्येन रूपो गृहीतुम् ।। 124 ।।

कृत्वा कृत्वा ह्युपायाँश्च श्रान्ताहं न वशे मम।
त्वत्स्नेह-प्रेत-ग्रस्तेव नित्यं सा जायते कृशा।।125।।

त्यज मार्गं गृहं यामि कृष्ण किं न विलज्जसे ।
जानामि गोरसं नैव गोरसं त्वेव वाञ्छसि ।। 126 ।।

असितमधुपवृन्दैर्मालतीपुष्पपुञ्जै -
र्मृदुलसिततमालानां सुनीले निकुञ्जे ।
तरणि-तनु-भवायाः शीतले चारुतीरे
विरम किमपि घर्मैः सर्वदेशे प्रतप्ते ।।127।।

हसित्वा सारिताधेनुः स्मित्वा च तयार्पिता।
धेनुमेलनसंयोगान्मनो नयनमेलनम्।।128।।

धीरा सुरतसङ्ग्रामे विपरीतरतौ रता।
नूपुराणि च मौनानि श्रूयते किङ्किणीध्वनिः।। 129।।

विपरीतरतिर्भर्त्रा पादस्पर्शैः सुयाचिता ।
दीपं निर्वाप्य मौनेन स्मित्वेवोत्तरितं तया।। 130।।



क्षुद्रैर्नरैर्हि कार्याणि भवन्ति महतां कथम् ।
मृदङ्गः केन दृष्टो वा बद्धो मूषकचर्मणा ।। 131।।

नहि स्नेहरसस्तीक्ष्णैर्वचोभिर्नश्यति क्वचित् ।
वह्नौ शनैः शनैः पक्वं पायसं मधुरायते ।।132।।

एकीभूता स्वर्णजात्यां सा दृष्टुं केन शक्यते ।
नैसर्गिकसुगन्धेन ज्ञायते केवलं तनोः।।133।।

वार्तां पतिग्रहे गन्तुं श्रुत्वा श्रुत्वा सखीगणे।
अधः पश्यति नेत्राभ्यां हास्यचिह्नं कपोलयोः।।134।।

विशुष्काः शणकार्पासा उत्खाताश्चेक्षवः प्रिये।
हरितं ह्याढकीक्षेत्रं कथं म्लायसि सुन्दरि।।135।।

आदरो माननीयस्तु सम्भावयितुमागतः।
दूरययेन पश्येत्सा नाङ्गुलेरङ्गुलीयकम्।।136।।

व्यर्थं वञ्चयसे बाले भाले कुङ्कुमविन्दुना ।
प्रियस्य ज्ञायते सर्वैर्विपरीतरतिस्तव ।।137।।

क्षेत्राच्चिनोति कार्पासं पक्वं दृष्ट्वा पुनः पुनः।
स्वकेशानिव शुभ्रान्सा दीर्घोच्छ्वाससमाकुला।।138।।

किञ्चिच्चलित्वा गौराङ्गी स्थित्वा वीक्ष्य पुनः पुनः ।
हृत्वेव मे मनः पश्य याति चौरीव चञ्चला ।।139।।

विरहेणेदृशी जाता वीथीं नीचो जहाति न ।
मृत्युर्मामुपनेत्राभ्यामिच्छन्पश्यन्नपश्यति ।।140।।

मालया तिलकैः केशैर्नहि रामः प्रसीदति ।
चलं यदि मनो नृत्यैरलं लक्ष्यं न लप्स्यसे।। 141।।

तस्या देहदशां द्रष्टुं सखे वाञ्छसि चेत्तदा ।
स्वयं गत्वा क्षणं स्थित्वा गुप्तं तूष्णीं विलोकय ।। 142।।

नासिकायां मणिर्नीलस्तस्या विद्योतते बहु ।
मन्ये चम्पकपुष्पस्थो भृङ्गो पिबति तद्रसम् ।। 143।।

किञ्चित् कृत्वा भिषाद्द्वाराद्पश्यन्तीमां विहस्य सा।
आगता तक्रमानेतुं दत्वा स्नेह-रसं गता ।। 144।।

हयेन वायुवेगेन क्षणे नात्रागतोऽप्यहम् ।
मन्ये क्रोशसहस्राणि मार्गमासीद् गृहस्य ते। 145।।

पौषमासे शुभे प्रातः प्राणनाथो गमिष्यति ।
इत्यारब्धस्तया रागो मल्हारो वृष्टिसाधकः।। 146।।



यथाहं निर्गता गेहाद् विहस्यैवागतः प्रियः।
दृक्खञ्जने गृहीत्वा मे गतो मञ्जुलया दृशा।।147।।

विरहाच्च वरं मृत्युरित्येतन्निश्चितं मतम् ।
विरहे तु द्वयोर्दुःखं मृत्यौ चैकस्य शाम्यति ।। 148।।
प्रियं दृष्ट्वाऽपि तूष्णीं सा स्थिता परिजनैः सह।
नेत्राभ्यां च हसित्वेव हृदये स्वकरं दधौ।। 149।।

व्रजे नु प्रसृतो वह्निर्न जाने किं भविष्यति ।
नेत्रमार्गात्तु चित्तेऽग्निर्याति मार्गे गतिः कथम्।। 150।।

दीनः प्रतिगृहं याति जनान् सर्वांश्च याचते ।
लघुं महान्तं जानाति लोभोपनेत्रसज्जितः ।।151।।

यत्र क्रीडारता याति चञ्चला जलमध्यतः।
तत्र तत्र जलं नद्याः सत्वरं केसरायते ।। 152।।

नायकेन नवोढाया दृशि वारि निपातितम् ।
नेत्राणि रक्तवर्णानि ह्यन्यासामभवँस्तदा ।। 153।।

किं कृतं तव चक्षुर्भ्यामस्वस्थो वर्तते हरिः।
क्वचिद्वंशी क्वचिन्माला मुकुटं चाम्बरं क्वचित् ।। 154।।

राधिका हरिवेषेण राधावेषेण माधवः ।
विपरीतरतेः सौख्यं प्राप्तवन्तौ निसर्गतः ।। 155 ।।

निर्गुणोऽपि गुणी वाऽपि मिलनाञ्जयसिंहतः ।
सद्यो भूमिं धनं मुक्तामणींश्चाप्नोति भाग्यवान् ।। 156 ।।

किं करोमि त्विमे नेत्रे चञ्चलेऽपयशोयशः ।
न विचार्य घनश्यामं लोलुपावनुगच्छतः ।। 157 ।।

इमे विलोचने लोभादभ्यस्त इव तिष्ठतः ।
दृष्ट्वाऽपि रूपसौन्दर्यमतृप्ते हास्यमिच्छतः ।। 158 ।।

बलि-वामनयोर्वार्तां ज्ञात्वा कस्त्वयि विश्वसेत् ।
स्पृष्ट्वा ममाङ्गुलिं दीनः पाणिमेव जिघृक्षसि ।। 159 ।।

श्रान्तं मनः शरीरं च नेत्रे नैव वशे मम ।
भूयो भूयो मयाश्वस्ते मन्येते नहि मे मतम् ।।160 ।।

कृष्णस्य श्याममूर्तेर्हि वर्तते गतिरद्भुता ।
चित्तान्तःस्थाऽपि सा नित्यं संसारे प्रतिबिम्बिता ।।161 ।।

अधस्ताद् वटवृक्षस्य चञ्चलो मिलितो नटः ।
तत्किरीटस्य कान्तिश्च रुणद्धि पथिकाञ् जनान् ।। 162 ।।



पतिविरहेऽस्या देहो रूपं वासश्च मलिनानि ।
आगमने च सुकान्तिर्दृष्टाऽनुपमा मुखे चास्याः ।।163 ।।

स्नेहरागाङ्किकतां बाला प्राप्य स्वप्रियपत्रिकां ।
भूयो दधाति हृद्देशे मत्वा विरहकर्तरीम् ।।164 ।।

दिनेभ्यः एव दृष्टौ तावुरोजौ किञ्चिदेव हि ।
अन्यथा सर्वथा बाल्यं चापल्यं चैव दृश्यते ।। 165 ।।

अश्रूणि नेत्रयोर्वीक्ष्य प्रवासो स्थगितो ध्रुवम् ।
मन्दस्मितेन सोत्कण्ठं वक्षस्यारोपिता हि सा ।। 166 ।।

जयसिंह द्युतिर्दीप्ता भाति प्रासाददर्पणे ।
मन्ये कन्दर्पसेनैव जगज्जेतुं सुसज्जिता ।।167 ।।

अक्षिकोट्योः कथं बाले लौहित्यमिव दृश्यते।
श्याम त्वल्लोचनच्छाया राजते नेत्रयोर्मम ।।168 ।।

रात्रिजागरणाज्जाते नेत्रे कोकनदच्छवी ।
प्रियाप्रेमानुरागेण मन्ये संरञ्जिते त्विमे ।।169 ।।

आच्छाद्यैवं स्थितोऽत्यर्थमष्टौ यामानि तां शठः ।
वामः पीडयति व्यर्थं वामां कामो दुराग्रही ।। 170 ।।

पौषमासे दिनानां वैज्ञायेतेन गमामगौ।
गृहजामातृवत्तेषां तेजो मानं च हीयते।। 171।।

प्राणप्रियो मे स गतः प्रवासे
सहैव सर्वाणि सुखानि नीत्वा।
ग्रीष्मस्य दीर्घाणि दिनानि दीर्घा
निशाश्च शीतस्य मया वसन्ति।। 172।।

कथं प्रोञ्छसि बाले त्वं नैवोष्ठे श्वेतमृत्तिका।
एषा नासास्थमुक्तायाः प्रभाऽत्यन्तं प्रकाशते।।173।।

प्रियस्य दृष्टिः प्रबला मदीयं
सुरक्षितं चित्तधनं न चास्ति ।
दिनेऽपि या चौरयतीह सर्वं
मज्जागृतौ सातिविचित्रचौरी ।। 174।।

वर्षासु फुल्लन् नवमल्लिकानां
स्पर्शः सुगन्धैर्विरहातुरायाः।
कृत्वा न शैत्यं हृदयेऽतिदाहं
करोति तस्या विपरीतमेतत् ।। 175।।

द्वाभ्र्यः समुत्थाय गता हि गोपा
आच्छादिता व्योम्नि गवां सुधूलिः।
एषा दिनान्ते ह्यभिसारबेला
रम्या वयस्ये चल शून्यवीथ्यां ।।176।।

नियुद्धवीराविव निर्भयेऽत्र
न संशयस्ते नयने विशङ्के ।
जनेषु को वारयितुं समर्थः
लक्ष्येषु लक्ष्ये खलु ते प्रयातः।।177।।



सुचञ्चलं चित्ततुरङ्गमं यद्
उच्चाल्य चोच्चाल्य सुकन्दुकेन।
स्नेहाङ्गणे तत्प्रतियोगितायाम्
क्रीडा विजेया सखि वा त्वयैषा।। 178।।

पुनः पुनः सा नवयौवनेन
मत्ता पुनः पश्यति मां विहस्य ।
प्रजल्पति स्वस्य सखीभिरेवम्
आलिङ्गतीवातिचला सुदृष्ट्या।। 179।।

न दृश्यते चन्दनविन्दुरस्या
गौराननै भालगतोऽपि शुभ्रः ।
यथा यथाऽरुण्यमभून्मदेन
तथा तथाऽसौ स्फुटतां प्रयाति।। 180।।

काचेन सदृशो ज्ञातः संसारो निर्णयान्मया ।
यत्राऽसंख्येषु रूपेषु मायेशः प्रतिबिम्बितः।। 181।।

सौन्दर्यसिन्धुं व्रजराजरत्नं
श्यामं ह्यपश्यं सखि यत्र यत्र।
गते च तस्मिंश्छृणु तत्र तत्र
दृष्टिः स्थिरा मे भवति क्षणाय।।182।।

प्रियतमहृदि लग्ना जाग्रती रात्रिकाले
सुरतरसनिमग्ना मन्य आसीत्प्रमोदात् ।
प्रतिपदमतिमुग्धा ज्ञापयन्तीव हर्षं
प्रचलति मदमत्ता सुन्दरी साभिमाना ।। 183 ।।

वद कुरु शपथान् वा सत्यवादिन्न गोप्यं
भवति हि तव चौर्यं सर्वथा स्पष्टमेव ।
अतिशयचपले त्वल्लोचने गुप्तदूत
इव तु कथयतो मां सापराधोऽसि नूनम् ।। 184 ।।

सुरतं हि कथं गोप्यमधस्तात्ते विलोचने ।
गुणानां तव सर्वेषां घोषणां कुरुतो ध्रुवम् ।। 185 ।।

नवतरबहुसूक्ष्माद् वस्त्रमध्याद् विभाति
नव-विकसित-नीलेन्दीवर-श्याम-गात्रे ।
कररुहकृतरेखा प्रेमिकाया नवाया
मरकत मणिपात्रे चन्द्रलेखेव नूनम् ।।186 ।।

श्रुत्वा सपत्न्याः सदनं न गत्वा
गतोऽपरायाः सविधे प्रियायाः ।
शान्तिर्विषादश्च रसश्च रोषो
भावा हि तस्या युगपद् प्रवृत्ताः ।। 187 ।।



विशुभ्रशाट्यां नवचोलवस्त्रे
स्थूलावुरोजौ परिदीव्यतः स्म ।
कविप्रयुक्तेषु यथासुवर्ण-
ष्वर्थः स्वयं प्रस्फुटितोऽस्ति काव्ये ।। 188 ।।

नवाङ्गकान्तिर्वसनैर्मिलित्वा
न शक्यते वर्णयितुं वचोभिः ।
अस्यास्त्वहो चौलपटोऽपि लुप्तः
स्फुटावुरोजौ भवतः सुदीप्तौ ।।189 ।।

अङ्गेषु दीप्तिर्नवयौवनस्य
विकासतेऽस्या इव हेमजातिः ।
सा कञ्चुकीं यर्हि कुसुम्भरागां
बिभर्ति देहे द्विविधाङ्गशोभा ।। 190 ।।

प्रायशो न जनैर्लभ्यं महत्त्वं सुगुणैर्विना ।
भूषणेभ्यो न युज्येत धत्तूरः कनकाह्वयः ।। 191 ।।

उक्तं ध्रुवं शतगुणं कनकान्मदस्य
संवर्धनाय कनकं ह्यधिकं जगत्याम् ।
एकं नरस्तु मदवान् किल भक्षयित्वा
लब्ध्वैव चैकपरं भवति प्रमत्तः ।। 192 ।।

रज्जुस्तु मध्ये किल दृष्टिरूपा
द्वाभ्यां तदाट्टालिकयोर्निबद्धा।
नटाविव द्वावकुतोभयौ तौ
प्रधावतो न स्खलितौ कथञ्चित् ।। 193 ।।

आरोहत्यवरोहत्यश्रान्ताट्टालिकां भूयः।
नटचक्रिकेव बाला भ्रमति पतिप्रेमसूत्रबद्धेव।। 194 ।।

मुरारेः रूपलोभेन नेत्राभ्यां वञ्चनेच्छया।
व्यापारेऽहं तु विक्रीता तूष्णीं मत्सम्मतिं विना।। 195 ।।

शृणु नवयुवती सा चञ्चला चारुनेत्री
ललितमसृणदेहा कोमला श्यामलाङ्गी ।
मधुरचपलगत्या मोहयित्वा स्मितेन
विषधरकुलकन्येवादशन्मां प्रसह्य।। 196 ।।

केनोक्तं त्वद्रसस्नातः सोऽन्यस्या वशमागतः।
मृदुद्राक्षारसं पीत्वा निम्बार्कं कोऽभिवाञ्छति।।197 ।।

सूक्ष्मं दुकूलं मुखमण्डलेऽस्या
नेत्रे द्वयोः सम्मिलिते तथापि ।
बाधां न वीरा गणयन्ति युद्धे
रण-स्थले सैन्यकृतां कथञ्चित् ।।198 ।।



किञ्जल्कमेतत्सखि केसरस्य
पुष्पोद्भवं यत्पतितं हि सद्यः।
वृथा प्रियं किं हि तिरस्करोषि
नखक्षतं नैव कलेवरेऽस्य ।। 199 ।।

स्पर्शमात्राद्धि निजप्रियस्य
विज्ञाय हस्तौ चपलौ भुजाभ्याम्।
कुरङ्गनेत्र्यक्षिनिमीलने तं
शीघ्रं परावृत्य समालिलिङ्ग ।।200 ।।

विहाय तीर्थान्यखिलानि भक्त्या
श्रीराधिकाश्यामशरीरकान्तिम् ।
सेवस्व यत्र व्रजकेलिकुञ्जे
फलं प्रयागस्य पदे पदेऽस्ति ।। 201 ।।

दृष्ट्वा न मां सा वचनं च किञ्चिद्
उक्त्वा सुमन्दं चलिता जनेषु।
प्रतिक्षणं तद्धृदये मदीये
प्रवाधते शूलमिवातितीक्ष्णम् ।। 202 ।।

दौर्बल्यमद्यापि वियोगजातं
काये तदङ्गेषु न पूर्वकान्तिः।
त्वया कथं सागमनस्यवार्ता
प्रवर्तिता त्वं हि विनिर्दयोऽसि ।। 203 ।।

प्रियेण हस्तग्रथिता निधत्ता
हठात्तु माला वकुलस्य कण्ठे ।
अतस्त्विदानीं मुखकान्तिरस्या
विद्योतते वै द्विगुणं प्रवृद्धा ।।204।।

सङ्कोच एकत्र कुलस्य नूनं
तस्या नवं प्रेम तथैकतोऽस्ति।
सा व्याकुलाऽसीदुभयत्र कृष्टा
बद्धा शिशूनां लघु चक्रिकेव ।।205।।

सखे क्षणं तिष्ठति सात्र बाला
क्षणेन चान्यत्र च याति शीघ्रम् ।
प्राप्नोति कुत्रापि सुखं न किञ्चित्
सुचक्रिकेव भ्रमितेव दृष्टा ।।206।।

सुनीलवासांसि निधाय बाले
रात्र्यंधकारे व्रजसीति सत्यम् ।
कलेवरं दीपशिखासदृक्षं
मुग्धे निगूहिष्यसि कुत्र चैनम् ।।207।।

यदा मनो मे पतितं हि गुल्फे
सुचूर्णितं नूपुरमध्य एव।
तथापि धैर्याच्चलितं न धृष्टं
शस्त्रैर्न वीरा विचलन्ति युद्धात् ।।208।।



मणिर्हि तस्याश्चरणे प्रदीप्त -
स्त्वङ्गुष्ठमध्ये जटितो विभाति।
ताटङ्ककान्त्या विजितो हि मन्ये
भानुर्विनीतः पतितस्तदङ्घ्र्योः ।।209।।

ऊरुद्वयं पुष्टतरं नु तस्याः
कन्दर्पधात्रा रचितं सुकान्त्या ।
क्रीडारतेभ्यः सुखदं युवभ्यः
दुःखप्रदं तत्तु सदा कदल्यै ।।210।।

अन्यानुरक्तं स्वपतिं विलोक्य
स्वप्नेऽपि मुग्धा विरसा बभूव।
आसीच्च पर्यङ्कतटे शयाना
भ्रूनेत्रचित्तेषु रुषं दधाना।।211।

श्रुत्वा ध्वनिं ते नवनूपुराणां
हतः सतृष्णस्त्वयि जात एवम्।
श्रोष्यत्यसौ चेन्मधुरं वचस्ते
मुखात्तदा किं भविता न जाने ।।212।।

कृते प्रयत्नेऽपि सहस्रवारं
ससाहसे वापि सहस्रवारम् ।
सौन्दर्यसिन्धुं न कलेवरस्य
तर्तुं समर्थे मम लोचनेऽस्याः।।213।।

रदच्छदं कथं बाले स्वाञ्चलेन निगूहसि।
अहो गौराननं चैतद् राजतेऽतीव सुन्दरम् ।।214।।

गर्जनां रुक्मिणी श्रुत्वा हरेरिव हरिप्रिया ।
सैन्यरुद्धापि वीक्ष्यैतान् व्याहसद् व्यङ्ग्यपूर्वकम् ।। 215।।

बभूव बाला तव रूक्षदृष्टि-
र्घर्मेण शुष्का ललितालतेव।
कृत्वा हरे प्रेमरसप्रसेकं
विधेहि चैतां हरितां प्रफुल्लाम् ।।216।।

विरहव्याकुलां वीक्ष्य शीतलां गन्धिमज्जलम् ।
सख्यस्तदङ्गे सिञ्चन्ति मध्य एव विशुष्यति ।। 217।।

इत्थं हि सौन्दर्यरसाभितृप्ता
निशङ्कभावेन सदा प्रमत्ता ।
ब्रूते कठोरं मृदु वा यथेच्छं
न क्षीयतेऽस्यास्तु मदः क्षणाय ।। 218।।

पुनः पुनः पृच्छति सा सखीं स्वाम्
अये किमुक्तं हरिणा तवाग्रे।
कुतः स दृष्टोऽथ करोति किं वा
वार्ता ममैषा च कथं प्रवृत्ता ।।219।।



तनुप्रदेशे परिवर्तनानि
करोति तद् यौवनशासकोऽयम् ।
क्वचित्समृद्धिः परिवर्धमाना
क्षीणा क्वचिद्वा सखि दृश्यतेऽस्याः ।। 220।।

अये कृष्ण स्वामिन् कुरु निजमनस्तादृशमिव
यथा तूद्धारार्थं पतितमनुजानां त्वमकरोः।
प्रतिज्ञातं पूर्वं तदनुसर मायाधव विभो
गुणानां दोषाणां न कुरु गणनां मे नरहरे ।। 221।।

स्ववामनेत्रस्फुरणे मृगाक्षी
ह्यनागते प्राणसमे प्रियेऽपि।
रोमाञ्चितोत्साहयुता स्वचित्ते
दुकूलमावर्तयति प्रमुग्धा ।। 222।।

द्वारे परिजनमिलने घटिका नीता प्रियेण वार्तायाम् ।
नूनं सा तु विधातुर्घटिकेवाभूत्प्रतीक्षायाम्।। 223।।

हरिणा वसनाहरणे प्रोक्तं तरणिं नमस्कुरुत गोप्यः ।
निशम्य नयने सरुषेऽपि जाते सहास्य इव तासाम् ।। 224।।

कथं जनास्तं सखि शीतरश्मिं
वदन्ति मुग्धा इव सर्व एव ।

तथास्मि वाहं विरहेण नूनं
विलोक्य तापो हृदि वर्धते मे ।।225।।

वीरेण राज्ञासिधरेण सेना
विलोकिता सर्वगता विशाला ।
मत्वा ध्रुवं मङ्गलकालमस्या -
भवन्मुखं मङ्गल खेट तुल्यम् ।।226।।

शान्तावुद्विग्नतायां वा स्वप्ने जागरणे रसे ।
निर्गच्छतु न मच्चित्ताद्धरिप्रेमस्मृतिः सदा।।227।।

नरः कुसङ्गाद् विकृतो न बुद्धिं
प्राप्नोति सत्सङ्गगतोऽपि काञ्चित् ।
धृता हि कर्पूरपुटेषु हिङ्गु -
र्भवेत्सुगन्धिर्न युगैः सहस्रैः ।।228।।

किमात्मश्लाघया कृष्ण हस्तौ तस्या मनोहरौ ।
अवलोक्य मनोहस्ते तव चेत्वं महांस्तदा ।।229।।

सत्यं पक्ष्म कपाटाभ्यामश्रुशृङ्खलया दृढम् ।
आस्ते प्रियस्तया बद्धः सुन्दर्या चक्षुषोर्ध्रुवम् ।।230।।

शरद्राकाशशी पूर्णं उदितश्चेतयसे न किम् ।
मन्ये कामक्षितीशस्य राजते छत्रमाततम् ।।231।।



प्रथमं यत्र स्खलिते नयने तत्रैव चेच्छतः स्खलितुम् ।
नान्यं द्रष्टुं वाञ्छा दृष्ट्वा तस्याननं चारु ।।232।।

मत्वा प्रसुप्तां मनसाऽतिखिन्नः
सुप्तः समीपे दयितः प्रियायाः ।
आलिङ्ग्य तं सा हृदयेन गाढं
स्वप्नस्थितेवास निमील्य नेत्रे ।।233।।

न चन्द्रिकेयं विततोंधकारो
लोकेषु सर्वेषु न संशयोऽत्र।
चन्द्रोदये केवलमस्य वर्णः
श्वेतायतेऽत्यन्तभयेन नूनम् ।।234।।

यथा यथा वित्तनाशः सन्तोषोऽपि तथा तथा।
स चेद् विपुलसम्पत्तौ क्षणान्मोक्षस्तदा ध्रुवम् ।।235।।

रत्नानि देहे च विभूषणानि
ह्यलक्तकं वा नयनाञ्जनं च ।
आसन् स्वभावेन धृतानि नास्या
शरीरसौन्दर्यविवर्धनाय ।।236।।

उरोजयोरुच्चपदे स्थिता सा
माला सुगुञ्जारचिता हि तावद् ।

विमोहयेद् ग्राम्यजनांश्च सर्वान्
त्यक्ता न यावद्धि तया सुदूरम् ।।237।।

श्रीराधिका माधवयोस्तु जाति-
रायुर्मनश्च समानि नित्यम् ।
बहूनि तद्रूपविलोकनार्थ-
मिष्टानि वै नेत्र युगानि तत्र ।।238।।

स्वां बुद्धिशीलां मनुषे सदैव
तस्मान्न मे त्वं वचनं शृणोषि ।
स्नेहेन नान्यस्य करे प्रसह्य
युक्तं सखि प्राणसमर्पणं ते ।।239।।

अङ्गानि नूनं शिथिलानि सन्ति
नवैव रेखा लसिता नखानाम्।
न सम्मुखे ते नयने सलज्जे
किं वञ्चनैर्वा शपथैश्च किं वा ।।240।।

शृणुष्व हे कृष्ण हरे मुरारे
सहस्रशस्ते विनयं करोमि ।
यथा कथञ्चिच्छरणं तवैव
द्वारे स्थितस्त्वां मनसा भजेयम् ।।241।।



भ्रुवौ समुन्नम्य कुचौ विवृत्य
मूर्खं परावर्त्य पुनःपुनर्याम् ।
विलोक्य दृष्टौ विनिपात्य दृष्टिं
गता गृहान्तः कठिनं कथञ्चित् ।।242।।

चन्द्रानना सा सरसा विहस्य
विहस्य वाक्यानि तथा ब्रवीति ।
नेत्रेऽरुणे हृद्गतगूढभावं
मानस्य सर्वं कुरुतः स्फुटं च ।।243।।

मध्याह्नवेलासु निदाघकाले
प्रतीयते यत्र च माघरात्रिः।
तत्रैव चोशीरकुटीषु बाला
वियोगदुःखात्पचतीव खिन्ना ।।244।।

अस्या नवाया दधिमन्थकर्त्र्याः
पश्याद्य ध्यानेन दशां विचित्राम् ।
भाण्डोऽपि तस्याः सविधे ऽस्तिदध्नो
मथ्नाति मन्थेन जलस्य भाण्डे ।।245।।

प्रताडिता सा कुसुमैर्यदङ्गे
प्रफुल्लितं तन्नितरां तदङ्गम् ।
कुर्वन्ति तत्रौषधिलेपनानि
सख्यः प्रमुग्धा हसतीव सा च ।।246।।

कटाक्षखड्गं च सुपक्ष्म वर्म
धृत्वा सुखं लोचनसैनिकौ द्वौ ।
प्रधावतो वीरभटाविवेह
घ्नतः सहस्राण्यतिसावधानौ ।। 247 ।।

प्रसूनहारं हृदये दधाना
रम्यं च तिलकं शशिशुभ्रभाले ।
स्वक्षेत्ररक्षा सुनियन्त्रताऽपि
प्राणाञ्जनानां हरति स्तनाभ्याम् ।। 248 ।।

मुरलीध्वन्यतिरिक्तं श्रोतुं कृतशपथेव नैच्छति किञ्चित् ।
धृत कर्णा तु वने सा तिष्ठत्यहर्निशं समुत्का ।। 249 ।।

कुरु कपटं हि यथेष्टं लप्स्यसे स्वतन्त्रतां न मत्तस्त्वम्।
यद्यस्मि सापराधा दधातु मां नेत्रयोर्बद्धाम् ।। 250 ।।

रसिकहृदयशतान्यपि भूधरदीर्घाणि यत्र मग्नानि ।
तं प्रेमाब्धिं गर्तमिव मन्यन्ते मनुजपशवः ।। 251 ।।

सा नवबाला दृष्ट्वोन्नतौ निजपयोधरौ दृढौ नितराम्।
हारेषु दत्तचित्तेव पश्यति पुनः पुनस्तत्र ।। 252 ।।

अन्धकारावृते मार्गे सङ्कीर्णे च तयोरभूत् ।
अकस्मादेव सङ्घट्टः स्पर्शाद् ज्ञानं परस्परम् ।। 253 ।।



सम्प्रेषिता प्रियतमागमनस्य वार्ता
यर्ह्येव तेन मनसोऽतिप्रिया हि तस्याः।
सा यत्र तत्र सखि धावति सम्प्रफुल्ला
सर्वाङ्गणे नहि सुखं हृदये मिमीते ।।254 ।।

स्थलकमलदलानां यत्त्वया तद्दिनेषु
रससुखमनुभूतं तानि यातान्यहानि ।
नवकिसलयहीनाः शुष्कशाखा इदानीं
मधुप शृणु तदीया कण्टका एव तीक्ष्णाः ।। 255 ।।

पुनः पुनर्मे परिवर्जिताऽसि
नास्मिँस्त्वयैवं शयनीयमालि ।
नवप्रसूनैर्न भवेत्त्वदीये
क्षतं गभीरं नव कोमलाङ्गे ।। 256 ।।

श्येनस्य दृष्टिरिव दृष्टिरतीव नम्रा
नीचैर्विपश्यति शनैः सहसा तथोर्ध्वम् ।
नम्रं पुनर्झटिति वा निपुणं निरीक्ष्य
गृह्णाति निर्दयतया च मनोविहङ्गम् ।। 257 ।।

उदितं तरणिं दृष्ट्वा सुषमां पश्यति निरन्तरं चक्रः।
अतिशयमुदितश्चित्ते दृष्टिं तत्रैव निदधाति ।। 258 ।।

वध्वाः पाणिग्रहणे रोमाञ्चा द्वयोः स्वेदसलिलं च ।
तेन जलेन सहैव हृदयं च समर्पितं द्वाभ्याम् ।।259।।

तस्या वशे तेन सुदक्षिणेन
ह्यन्याश्च वामा खलु विस्मृतास्ताः।
दिनं कठोरं विरहेण यस्य
वर्षाणि तत्र व्यतियान्ति यासाम् ।।260।।

अन्ये च पापा यदि तारितास्ते
कथं त्वयाहं नहि तारणीयः।
तोषोऽथवा ते यदि बन्धनेन
कार्यस्त्वयाऽसौ स्वगुणैः सुबन्धः ।।261।।

गेहं यद्यपि निकषा मिलनं कठिनं व्याकुलं च मनस्तस्याम् ।
श्वासान् भित्तेर्मध्यात् तस्याःश्रुत्वा स्फुटति हृदयम् ।।262।।

छटां जालमध्याच्छरीरस्य तस्याः
स दृष्ट्वा तदा तां हि जागर्ति रात्रौ ।
गता तस्य निद्रा स आस्ते गवाक्षे
सदा दत्तदृष्टिर्हि सर्वं विहाय।।263।।

अघं परस्त्रीगमने श्रुत्वा तत्परकीयां पुराणेऽथ ।
विहसति मिश्रं दृष्ट्वा सोऽपि कथञ्चित्स्मितं ह्यरुणात् ।।264।



स्नेहेन सङ्कोचवशेन वाष्प-
रोमाञ्च-मोदस्मितकम्पभावैः।
हस्तेन ताम्बूलमदत्त किंवा
प्राणान्स्वपाणौ नयति स्म बाला ।।265।।

देहस्य तापः शिशिरे प्रयत्नैः
शीतोपचारैरपनीत एव।
ग्रीष्मे निवासो ह्युपवेश्म तस्याः
क्लिष्टो जनानामभवच्छृणुष्व ।।266।।

नेत्रयो रञ्जनं कृष्णं ताम्बूलं नित्यमोष्ठयोः ।
शोभते समयोः सङ्गो वदन्तीत्थं जना इह ।।267।।

तिष्ठात्र पश्याम्यहमेव चन्द्र-
मट्टालिकायां नहि गच्छ बाले ।
दृष्टुं गतां त्वां सखि येन लोकाः
मत्वा सुधांशुं नहि दद्युरर्घ्यम् ।।268।।

आगच्छाधःप्रदत्तोऽर्घो दूरं गच्छन्तु सङ्कटाः।
अन्याः स्त्रियोऽपि निर्द्वन्द्वं पश्येयुः शशिनं त्विमम् ।।269।।

चिबुके तिल-लेखनतो मुखकान्तिर्द्विगुणिता तस्याः ।
मन्ये मधुपः कृष्णः स्थलकमले भाति मधुतृप्तः।।270।।

गौराननने सुविन्दुः श्वेतः पीतोऽरुणोऽथवा श्यामः ।
शोभत एव नु तस्या रम्ये सर्वं हि रमणीयम् ।।271।।

कथनं वृथैव सखि ते मनसि विलज्जास्त्युपालम्भे ।
विहाय पूर्वं स्नेहं पथिक इव स वर्तते नितराम् ।।272।।

वदामि न त्वां कुरु नैव मानं
ददामि तुभ्यं शपथं तदर्थम्।
परं तवेयं सरसा सहास्या
दृष्टिः कथं स्यात्परुषा न जाने ।।273।।

वामातिथावापतितस्त्विदानीं
किशोर-तारुण्यवयःसुसन्धिः ।
सङ्क्रान्तिकालं हि सुपुण्यमेनं
भाग्याज्जनः पुण्यकृतो लभन्ते ।।274।।
यद्यप्यसवो देहे क्षयतिथय इव निवसन्ति ते नित्यम् ।
तस्मान्नहि गणनीयाः सख्यः सन्तोऽप्यसन्तस्ते ।।275।।

नागरतागुणगर्वः सर्वोऽपि विखण्डितस्तस्य।
ग्रामीणानां ग्रामे हसन्ति करतालिकां दत्वा ।।276।।

जलशफरीव हि यस्य घटिकाविरहेण व्याकुला प्रिये ।
धिक् तां प्रीतिं मन्दां भवति हि प्रतिक्षणं पीना।।277।।



प्राणान् रक्षति खलु सा तदभावे च तस्य जीवितं कठिनम् ।
ज्ञात्वा तद्धि सपत्न्यो लग्नः यत्नैः सुरक्षायाम् ।।278।।

वदाधुना किं कथितं प्रियेण
चलेन ते नन्दकिशोरकेण।
कथं च दर्पेण विशालदृष्टे-
र्बलेन सर्वान् परुषं ब्रवीषि ।।279।।

कुङ्कुमं चक्षुषि क्षिप्तं क्रीडायां फाल्गुनोत्सवे ।
पीडाऽपि वर्धतेऽत्यर्थं दूरीकर्तुं न शक्यते ।।280।।

तापत्रयेणैव पुनः प्रतप्य
विशोधितं मे हृदयं सुवर्णम् ।
आयादितश्चेन्मम कृष्णचन्द्रो
भवेत्प्रसन्नः करुणार्द्रचित्तः ।।281।।

प्रमुग्धोऽसि प्रशंसायां वृथा दृप्यसि मूढधीः ।
मधुहीनप्रसूनेषु मधुपो रंस्यते कथम्।।282।।

माघरात्रावार्द्रवस्त्राः सख्यः स्नेहवशं गताः।
साहसेन हि गच्छन्ति तत्समीपेऽतिसत्वरम् ।।283।।

अङ्गानि तस्याः सुविभाजितानि
सुशिक्षिताः स्नेहकलाश्च पत्युः।
रसप्रपूर्णा नटनर्तकीव
जानात्यनन्ता मधुरा गतीः सा ।।284।।

माघमासत्रियामासु प्रवात्युष्णः समीरणः।
श्रुत्वा पान्थाद् विना प्रश्नैर्विजज्ञौ जीवति प्रिया ।।285।।

निशाऽन्यत्र व्यतीतेति ज्ञात्वान्तःक्रोधसंयुता।
कान्तं विलज्जितं वीक्ष्य स्वयमेव विलज्जिता ।।286।।

अलक्तकं पादगतं सपत्न्याः विलोक्य जाता सरुषेव किञ्चित् ।
वीक्ष्याङ्गुलीस्तस्य सुरङ्गरक्ता जज्वाल वह्निर्हृदयेऽतितीव्रः।।287।।

श्वश्र्वाः गेहं सपत्नीभ्यः सौभाग्यं च प्रियान्मनः।
लब्धं नवोढया सर्वं मन्ये स्नेहान्मुखेक्षणे ।।288।।

कथं सङ्कुचितो यासि भ्रम सर्वत्र निर्भयः।
न ते दोषो ध्रुवं चैते सरसे नयने तव।।289।।

दत्तं मनः समादाय पृष्ठं दत्तं त्वयाग्रतः ।
कीदृशो व्यवहारस्ते दृष्टिं चोरयसीव किम् ।।290।।



शरन्निशायां रमते रसार्द्रो
गोपीभिरेको रसिकः स रासे।
वेगेन सञ्चक्रमणे त्वनेको
विलोकितस्ताभिरसौ स्वपार्श्वे ।।291।।

श्यामस्मृतौ पश्यति सूर्यपु«या-
स्तटेस्थिताश्रूणि विमोचयन्ती।
सा राधिका तद्विरहेण खिन्ना
क्षारं करोतीव जलं क्षणाय ।।292।।

गोपीनामश्रुभिर्मार्गे द्वारे द्वारे गृहे गृहे ।
वहन्ति नद्यो गम्भीरा परिपूर्णा जलैरिव ।।293।।

पश्यन्तं तच्चित्रं विलोक्य खलु चित्रितेव सा जाता।
न चलति न हसति न वदसि न नमति न च वेपते किञ्चित् ।।294।।

ज्ञात्वाल्पहस्तां कृपणो वधूँस्वां
न्ययोजयत्तच्छ्वसुरोऽन्नदाने ।
सौन्दर्यलोभेन जनाः समन्ताद्
भिक्षार्थमायान्ति न भिक्षुका ये ।।295।।

बाल्यं यान्तं नवोढायाः सपत्न्यो वीक्ष्य चिन्तिताः।
मन्ये प्रियतमस्तासां प्रवासे याति सत्वरम् ।।296।।

प्राणप्रिया तु हृदये भाले नवेन्दुकलेव नखरेखा।
हरिहररूपं चैतत्त्वहो तवैकत्र सन्नद्धम् ।। 297 ।।

वक्षसि खलु नखरेखा प्रवासकाले प्रियेण या विहिता ।
ताम्प्रविदीर्य नखेन पुनर्हि नवामिव विदधाति ।।298 ।।

घनं कुञ्जं गगने निविडं तिमिरं ह्यसिता जलदाश्च।
दीपशिखेव तु बाला कथं यास्यति प्रच्छन्नम् ।। 299 ।।

अये पक्षिन् किञ्चिद् दध मम वचः श्येन हृदये
न ते स्वार्थः कश्चिन् न च भवति पुण्यं तव बहु ।
श्रमं कृत्वा व्यर्थं भवति न फलं किञ्चिदपरं
खगान्हंसि त्वं यत्परवशगतः किं त्यज सखे ।।300 ।।

मुकुटं शिरसि च हैमं हस्ते मुरलीं गले च वनमालाम् ।
पीताम्बरं दधानः कश्चिद् बालो वसतु हृदये ।।301 ।।

भ्रकुटी कुटिला चलिता दृष्टिश्चपला चलितं ललितं ते ।
पीताम्बरं च चञ्चद् सर्वं मे चोरयति चित्तम् ।। 302 ।।

सङ्गदोषः स्पृशत्येव सर्वान् सत्यमिदं वचः।
भ्रुवोः कुटिलयोः सङ्गाद् दृष्टिः कुटिलतां गता।। 303 ।।



गौरानने रत्नयुता सुशाटी
सौन्दर्यमस्याः परिवर्धयन्ती ।
तारापथे शारदचन्द्रदीप्ति-
रिवेह विद्युल्लसिता विभाति ।।304 ।।

तस्या गौरं वदनं मधुरा दृष्टिः स्मितं च मधुरं तत्।
सख्या गले च मिलनं जनयति हृदये तु पीडां मे।।305 ।।

कुरु गर्वं निःशङ्कं नासाभूषणमुक्ताफलयोस्त्वम् ।
धृत्वा भाति सुनासा दृष्टिं जगतो ग्रसति च हसतीव।। 306 ।।

हरिछविवारिणि मग्ना मम दृङ् न वियुज्यते किञ्चित्।
जलघटिकेव पुनः सा प्रतरति मज्जति भरति वहति सततम् ।।307 ।।

कन्दर्पबाणैः खलु सा मृतेव
प्रबाधसे किं सखि तां वृथैव।
कथं पुनः सिञ्चसि गन्धिवारि
न ज्वालय प्रज्वलितां स्वयं ताम् ।।308 ।।

भेदोपायाः कृताः सर्वे सन्धेराशा न दृश्यते ।
हठदुर्गस्त्वया जेयो गत्वा गुप्तपथा स्वयम् ।।309 ।।

व्रजराजं विलोक्यैव मानस्तस्या गतः क्वचित् ।
लज्जां निजाभिमानस्य क्षणमात्रं हृदि स्थिता ।। 310 ।।

दृष्ट्वैव दुर्जनानभ्रान् नवान् कोऽपि न विश्वसेत् ।
प्राणान् हरन्ति ते काले कण्टका इव पादगाः ।।311।।

गुञ्जा माला गले गोप्यो गोपालस्य सुशोभते ।
पीता दावानलज्वाला मन्ये भाति तनोर्बहिः ।।312।।

समये प्राप्य सौभाग्यं कुरु गर्वं वृथा नहि ।
यासीज्ज्येष्ठे प्रिया छाया माघमासे न रोचते ।। 313।।

स्निग्धे विलोचने वीक्ष्य जातः श्रान्त इव प्रियः।
विहस्योत्थाय कृत्वा च हृदि रूक्षं वचस्त्यज ।।314।।

सुसज्जिताः पर्वणि तत्सपत्न्य
आभूषणैः सद्वसनैर्नवैश्च ।
एषा च चीरैरपि शोभमाना
म्लानानि तासां कुरुते मुखानि ।।315।।

दुर्गं तुरगा अलका भ्रकुटी दृष्टिर्धनुश्च सङ्गीतम् ।
एते भान्ति न सरलाः कुटिलाः सदैव रोचन्ते ।।316।।

अत्रागच्छति गच्छति दूरं तन्वी किमपि हि सोच्छ्वासा ।
ययाहि दोलारूढा मनसि विरहिता पुनः पत्या ।।317।।



समो न सौन्दर्यमदेन कश्चिल्-
लोकेऽत्र तीक्ष्णो हि मदः कुतोऽपि।
न क्षीयतेऽसौ न भयान्न कालात्
न निद्रया वा नहि चान्यथा वा ।।318।।

रतिप्रस्तावे प्रथमं तिर्यक् पश्यत्युपेक्षते किञ्चित् ।
विलज्जते तत्पश्चात् क्रुध्यति किञ्चिद्धसति तन्वी ।।319।।

आकर्षतीव मां दृष्ट्या गृहान्तः सालसाऽगता।
मृगाक्षी सा पुनः पश्येदिति चात्र ममाक्षिणी ।।320।।

नराणां यन्त्रनीराणां गतिसाम्यं समीक्ष्यते।
यावन्नीचैःप्रयान्त्येते तावदुच्चैर्भवन्ति ते ।।321।।

कथं हि भारं सखि भूषणानां
वहेत्सुतन्वी सुकुमारदेहा ।
सौन्दर्यभाराच्चरणौ हि तस्याः
समेऽपि मार्गे न समौ प्रयातः ।।322।।

वदने मधुरं वचनं स्निग्धा दृष्टिः भ्रकुटी सरलेऽस्याः ।
किमर्थमादरभावः प्रतिक्षणं संशयोऽ स्माकम् ।।323।।

नहि नहि जल्पति भूयः भ्रुवौ सहास्य इव ननु तस्याः।
एवं नहीति कथनं तद्धास्यं केवलं मन्ये ।।324।।

स्नेहनगर्यामस्यां स्थित्वा गन्तुं न कोऽपि शक्नोति।
ताडितोऽपीह ताड्यते ताडयितात्र प्रसन्नोऽथ ।।325।।

विधुरिव वदनं तच्छोभते कञ्चुकी सा
गगनमिव सुनीला मौक्तिकैस्तारकाभिः ।
विलसति च निशेव भ्राजमाना तु बाला
शिथिलयति शरीरं स्नेहनिद्रां ददाना ।।326।।

विन्दुना वर्धते सङ्ख्या नूनं दशुणाऽधिका।
अस्यास्त्वगणितं जातं सौन्दर्यं भालविन्दुना ।।327।।

अधश्च किञ्चिद् दग्धमुपरि च कज्जलजलेन मलिनं तत् ।
पठत्यलिखितं पत्रं जानाति प्रिया विरहवृत्तान्तम् ।।328।।

दृष्टं शरीरं विरहेण शुष्कं
स्नेहश्च नूनं हरितायतेऽद्य।
वर्षाजले शुष्यति यज्जवासः
यवाङ्कुरो रोहति हर्षितश्च ।।329।।

स्वर्णचम्पकचार्वङ्गी सा दृष्टुं स्वर्णचम्पकान् ।
गता धवलवस्त्राणि कान्त्या हैमानि कुर्वती ।।330।।

वर्धते हि मनः पद्मं प्रवृद्धे वित्तवारिणि।
तस्मिंश्च क्षयति क्षीणे ततः शुष्यति मूलतः ।।331।।



सफलं नात्र चातुर्यं प्रिय क्रोधं न कारय।
हृदये नखरेखैषा कथं वञ्चयसे हि माम् ।।332।।

तस्या देहे सुवर्णे च न भेदो दृश्यते मनाक्।
भूषणानि करस्पर्शाद् ज्ञायन्ते केवलं ग्रहे ।।333।।

अङ्गरागेण सुन्दर्याः सौन्दर्यं मलिनायते ।
उच्छ्वासेन यथादर्शः स्वच्छोप्यस्वच्छतां गतः ।।334।।

भूषणानि सुवर्णस्य न त्वं धारय सुन्दरि ।
त्वद्देहे तानि दृश्यन्ते विन्दवो दर्पणे यथा ।।335।।

इङ्गितानीह जायन्ते स्त्रीषु सर्वत्र सर्वशः।
तयोर्नेत्रे च तद्भावं तथापि त्यजतो नहि ।।336।।

कुपिताया अपि सविधे रसिक सरसश्च सुखानुभूतिश्च ।
कठिनायामपि पूर्णमिक्षोर्ग्रन्थौ हि माधुर्यम् ।।337।।

गौराङ्ग्या नवदेहे गौराङ्गुलौ नखं ह्यरुणम् ।
अङ्गुलीयकं च कृष्णं त्रिवेणीव मोक्षदं सद्यः ।।338।।

माणिक्यहारो हृदयाऽनुरागो
मन्ये समायाति बहिः प्रियायाः।
विलोक्य मल्लोचनयोः प्रदाहं
प्रयाति शान्तिं नितरामशेषः।।339।।

सामान्यशुभ्रशाट्यां तद्-देहकान्तिरनुत्तमा।
मन्ये विभ्राजते दीपज्योतिः सलिलप्रच्छदे ।। 340 ।।

मूलप्रकृतौ तस्य कृते यत्नेऽपि नान्तरम् ।
नलयन्त्रे जलं ह्युच्चैर्याति नीचैस्ततः स्वयम् ।। 341 ।।

चक्रवाकी माघमासे दिवाकरगभस्तिषु ।
लभते रात्रिसुखं मत्वा सुधांशुं दिवसेऽपि तम् ।। 342 ।।

तीव्रेऽपि घर्मेऽनलसन्निधौ वा
वासःसु तूलैरपि निर्मितेषु ।
शीतं न दूरीक्रियते कथञ्चिद्
विना दृढालिङ्गनतः प्रियायाः ।। 343 ।।

शीतभयादिव शिशिरे जगति स्थितिं न लब्धवानुष्णः।
अतः प्रियाया उच्चैरुरोजदुर्गे गतः शरणम् ।। 344 ।।

उच्छिष्टतां गच्छति तत्समग्रम्
उच्चारितं यद् वचनं मुखेन ।
मन्ये विधात्रैव विचिन्त्य चित्ते
वार्तां विधातुं नयने कृतेऽत्र ।। 345 ।।

वशंगतः सपत्न्याः मे पतिः श्रुत्वेति सा वधूः।
अपश्यल्लज्जया गर्वपूर्णा हास्येन तां सखीम् ।।346 ।।



सगर्वाः कुशलाः क्रूराश्चित्रकारा अनेकशः।
सौन्दर्यचित्रणे तस्या असमर्था इव स्थिताः ।।347 ।।

सपत्नीषु प्रसिद्धासीत् पूर्वं मायाकरीव या।
निर्दोषा साभवद् बाले त्वयाकृष्टः प्रियो यदा ।। 348 ।।

दृग्बाणौ हि सुतीक्ष्णौ ते पूर्वं दृशि ततो हृदि ।
प्रविश्याथ ततोऽङ्गेषु पीडां जनयतः प्रिये ।।349 ।।

स्वमुखात्पटमुत्क्षिप्य ग्रीवाभङ्गं विलोक्य च ।
मुष्ट्याऽथ कुङ्कुमं क्षिप्त्वा मुष्टिं हत्वेव सा गता ।। 350 ।।

जनैर्गुणीति निर्देशान् निर्गुणो न गुणी भवेत् ।
अर्केति संज्ञया लोके प्रकाशोऽर्कतरोर्नहि ।। 351 ।।

कुङ्कुममुष्टिपातेन लोकलज्जा च रीतयः।
गता द्वयोश्च हृद्देशे नेत्रयोश्चैव कुङ्कुमम् ।।352 ।।

यथा यथा सा नयने नर्तयति विहसति पटमाकर्षति ।
तथा तथा स उदारोऽप्युपहारं दातुमसमर्थः ।। 353 ।।

यथा यथानलज्ज्वालावन्मम हि वक्षो वेष्टयति बाला।
तथा तथा मम हृदयं कमलदलमिव खलु शैत्यमुपयाति ।।354 ।।

अरुणो विन्दुर्भाले तदुपरि च विभान्ति ते घना केशाः।
मन्ये चन्द्रं राहुः सतरणिमद्योद्यतो ग्रसितुम् ।।355।।

अयि वनिते क्वाधीतं भ्रूकार्मुके त्वया तु धनुःशास्त्रम् ।
मौर्वीं विना ह्यमोघं लक्ष्यं साधयस्यक्षिबाणैस्त्वम् ।।356।।

राज्ये भवेतां यदि शासकौ द्वौ
प्रजासु दुःखं द्विगुणायते वै।
स्वर्गे ह्यमायामिव चन्द्रसूर्यौ
लोके मिलित्वा कुरुतोऽन्धकारम् ।।357।।

निशम्य पत्युर्गमनं युगपदश्रुविन्दवो मुखे जाताः।
दृष्टा नैव सखीभिः रचयति जृम्भां मुधा स्निग्धा ।।358।।

केसरो हेमवर्णेऽङ्गे मिलित्वा दृश्यते नहि ।
ज्ञायते केवलं गन्धैर्गन्धवाहसमीरितैः।।359।।

दर्शितशिष्टाचारा हृदि किं त्रासमुत्पादयसि भूयः।
शुण्ठी स्याच्चेन्मधुरा विषशङ्का जायते नृणाम् ।।360।।

यावन्मनसि सुभवने कपटकपाटौ दृढावृतौ भ्रातः।
तावत्कुतो ह्युदारो प्रविशेद् दामोदरो द्वारात् ।।361।।



मुक्ता माला देहकान्त्या कर्पूरमणिवद् बभौ ।
स्पृष्ट्वा तृणेन पश्यन्ति पुनः सख्यो विचक्षणाः।।362।।

द्वयोरक्षियोगे कुटुम्बाद् वियोगो
द्वयोश्चित्तयोगे ह्ययं प्रेमयोगः।
हृदिग्रन्थिबन्धस्तदा दुर्जनाना-
महो स्नेहरीतिर्विचित्रा नवेयम् ।।363।।

न तु चलनयनाभ्यां प्रेक्षसे मां हसित्वा
नहि वदसि च बाले स्नेहपूर्णं वचस्त्वम् ।
अनुदिनमतिरूक्षा वर्तते दृग् यथैव
मृदु मनसि तथैव स्निग्धता वृद्धिमेति ।।364।।

कुरङ्गाक्ष्यास्तु बाहुभ्यां वेष्टने सूक्ष्मकञ्चुके ।
वेणीचिह्नं विभात्येतद् बाहौ स्पष्टं सुनिर्मले ।।365।।

द्वितीयप्रहरे प्राप्तं ज्येष्ठे मासे मरुस्थले ।
मारूफलं जलान्वेषी पयोधिमनुमन्यते ।।366।।

ज्येष्ठे जलाशयं क्षुद्रं मयान्विष्य सुरक्षितम् ।
तृषायां जीवनं क्लेशाद् धिक् समुद्रं महाजलम् ।।367।।

लज्जाशीला नवा बाला सुरां पीत्वा मदान्विता ।
यथा यथाऽतिनिर्लज्जा तथैव मधुरायते ।।368।।

सरसे कुसुमे मधुपो गुञ्जति न तत्रोपविशति भीत्याऽसौ ।
सुकुमारतां हि दृष्ट्वा स्पृशति न मुग्धो ह्यतिस्नेहात् ।।369।।

वीक्ष्याद्भुतं नवं प्रेम जगद् भीतमिव स्थितम् ।
हत्वात्मानं सुहृद्घातो न श्रुतः क्वापि निर्दय ।।370।।

तं न भजसि किं दूरं गच्छसि यस्योक्तः किल भजनाय ।
यस्माद् दूरं गन्तुं कथितस्तदेव भजसे मूढ त्वम् ।।371।।

मम यत्रार्पिते नेत्रे प्राणान्तेऽपि भविष्यतः।
तवाश्वासनवार्ता च मच्चिते नहि रोचते ।।372।।

गेहाङ्गणे पतङ्गं वीक्ष्य प्रियस्य सुन्दरी हृष्टा।
इतस्ततस्तच्छायामपि धावति चञ्चला स्पृष्टम् ।।373।।

नभसि प्रेक्ष्य कपोतं किञ्चित् पतितं शशंस सा भूयः ।
स्निग्धे कस्मान्नयने पुलकिता तनुर्मुखे हसितम् ।।374।।

तीक्ष्णैः कुटिलकटाक्षैर्विशिखैरिव प्रविद्धं मे हृदयम् ।
यद्यपि गमिताः पारं कुर्वन्त्यन्तः पीडां तत्कणिकाः।।375।।

अये मुक्ताहार त्वमसि खलु जातोऽब्धिसलिले
विशुद्धा ते कान्तिर्विकसति हि सर्वत्र रुचिरा ।



त्वया लब्धो मानो निखिलभुवने भूपति - कुलाद्
गुणागारो भूत्वा किमसि च गलेऽन्यस्य पतितः ।।376।।

न गर्वोऽस्ति कश्चिद् गुणानां हि काचिन्
न वा हास्यभीतिर्ध्रुवं दृश्यतेऽस्य।
उरोजौ समुच्चं पदं शुभ्रहारः
स लब्धुं प्रलोभाद् गले नित्यमास्ते ।।377।।

पूर्वं हि जातं विरहाग्नितप्तं
ततश्च तत्प्रेमरसे निमग्नम् ।
तन्नेत्रमार्गाद्धृदयं नु तस्याः
भूत्वा जलं तद् वहतीति मन्ये ।।378।।

प्रतिवेशिन्या हस्ते दृष्ट्वा विदिताङ्गुलीयकं व्याजाद् ।
नीत्वा कुपिता स्मित्वा दर्शयति पतिं विलज्जितं तूष्णीम् ।।379।।

अयं मुक्ताहारः स्वकररचितो योऽस्त्यनुपमः
स्वयं नीतः स्नेहान्मम तु दयितेनाद्य नितराम् ।
सपत्न्याः कण्ठेऽसौ विलसति सुरम्यः सखि तथा
यथा शम्भोर्हारो विषमविषयुक्तो विषधरः ।।380।।

शरीरे दुष्टता यस्य सम्मानं तस्य जायते।
सौम्या ग्रहा न पूज्यन्ते क्रूराणां च जपादिकम् ।।381।।

यत्र स्थितोऽसौ सखि याहि तत्र
यत्र स्थितं ते हि मनः प्रमाथि।
आलिङ्गनं तस्य कुरुष्व गाढं
जलेन शाम्येन्नहि बाडवाग्निः ।।382।।

यथा प्रगल्भा प्रतिवेशिनी सा
सन्देशमस्यै वदति स्म पूर्वम् ।
स्मिताननना सापि तथैव बाला
जगाद मानाय पतिं सुदक्षा।।383।।

विद्युच्छटेव वनिता चपलाऽतिरम्या
ह्यट्टालिकोपरि गता मधुरं चलन्ती।
बाहुं विधाय मृदुलं च गले स्वपत्यु -
राकाशमण्डलघटा नु समीक्षतेऽत्र ।।384।।

एषाऽतिधन्या हि तिथिर्द्वितीया
यस्यामपूर्वोऽभ्युदितः शशाङ्कः।
विलोक्य चैनं मम नेत्रयोस्तु
द्वन्द्वानि दुःखानि गतानि दैवात् ।।385।।

शिशुं गृहीतं सहसाऽतिधृष्टो
ह्यागत्य शीघ्रं मम सन्निधौ सः।
स्पृष्ट्वाङ्गुलीभिश्च कुचद्वयं मे
गतो मनो मे प्रसभं गृहीत्वा।।386।।



यथा नवोढा हि मदेन मत्ता
प्रजल्पतीत्थं मधुरं हसित्वा।
तथैव सौन्दर्यरसेन तृप्ते
प्रियस्य नेत्रे चलतो न किञ्चित् ।।387।।

भृङ्गैर्घण्टां वादयन् दानवारि
स्थाने स्थाने वर्षयन्वा मरन्दम् ।
धैर्याद् धीरः कुञ्जरः कुञ्जवायु-
र्मन्दं मन्दं याति मत्तः प्रगल्भः।।388।।

रुद्धः पूर्वं त्वेष वायुर्निशीथे
किञ्चित्किञ्चिद्वा कथञ्चिच्चलित्वा।
अह्नस्तापं साम्प्रतं तत्प्रियस्य
मन्दं मन्दं हन्त दूरी करोति ।।389।।

श्रान्त इव मरुत्पान्थो मधुस्वेद-कणान् वहन्।
तरोस्तरोस्तले किञ्चिद् विरम्यायाति दक्षिणात् ।।390।।

नौकां कृत्वा हरेर्नाम मालां तरणदण्डवद्।
गृहीत्वा तरितुं शक्यः संसाराब्धिर्न चान्यथा ।।391।।

मधुस्वेदार्द्रचार्वङ्गः पुष्परेणुनवाम्बरः।
उद्वाह्येव समायाति वायुर्मन्दं नवो युवा।।392।।

स्नेहपूर्णोऽतिकान्तो वा प्रियः स्याद्यदि सुन्दरि।
अपक्वं प्रेम दुःखाय शूरणो हि यथाऽनने ।।393।।

न भेतव्यं न दुष्कार्यं कर्तव्यं शपथैश्च किम् ।
कथं विलज्जसे व्यर्थं सम्मुखं प्रेक्षसे न किम् ।।394।।

दृष्टेर्दूरं प्रिये याते व्याकुलाः सखि मेऽसवः ।
गन्तुं कृतमतौ तस्मिन् कुत्र वत्स्यन्ति कं श्रिताः।।395।।

स्नेहस्निग्धं मनो म्लानं विधातुं चेन्न वाञ्छसि।
रजोगुणोद्भवा धूलिर्न हि स्पृश्या त्वया पुनः।।396।।

न शक्यो नागरस्नेहो गूहितुं यत्नकोटिभिः ।
हृद्गता स्निग्धता चैतल्लोचनाभ्यां प्रतीयते ।।397।।

अपूर्वा तव सौन्दर्य-रीतिः सुन्दर कीदृशी।
क्षणं त्वां वीक्ष्य नाप्नोति निद्रां दृष्टिः क्षणाय मे ।।398।।
अयं ते प्रेमसम्बन्धः कालदूतीं विना कथम् ।
परिपक्वे च वा तस्मिन् कालापेक्षा न विद्यते ।।399।।

अनन्तो विरहो नूनं द्रौपद्या हि यथाम्बरम् ।
बली दुःशासनः कालं कर्षत्येष च वर्धते ।।400।।



वापी - नदी - कूप - सरोवराद्याः
गाधा अगाधा यदि वाऽन्यथा ते।
शाम्येत्पिपासा खलु यस्य यत्र
सत्यं समुद्रा इव ते हि तस्य ।।401।।

भ्रूकुटी तया कुटिलिते मुखात् सरोषेव वदति परुषाणि ।
अवेत्य सरसे नयने नहि पश्यति सम्मुखं बाला ।।402।।

स्वच्छां विधातुं किल देहकान्तिं
नेत्राणि वा मार्जयितुं जनानाम् ।
आभूषणानि प्रसभं नु मन्ये
प्रायो विधात्रेह विनिर्मितानि ।।403।।

मनस्तडागे वसतीह नित्यं
वियोगदुःखाम्बु न चास्य लग्नम् ।
दुर्योधनस्येव सुशिक्षितं वा
प्रस्तम्भनं क्वापि जलस्य मन्ये ।।404।।

सद्योपेव विरूक्षेव रूक्षं वदति सुन्दरी ।
कथं विरूक्षे जायेतां स्नेहस्निग्धे विलोचने ।।405।।

कोमलमपि नवनीतं शिशिरे भवति हि कठिनमृतोर्दोषात् ।
रमणीमनश्च पत्युर्दोषात्कठिनायते तद्वत् ।।406।।

यथा यथाहं निजलोचनाभ्यां
कृष्णस्य सौन्दर्यरसं पिबामि।
दृष्टुं पिपासाऽपि तथा तथैव
विवर्धते शाम्यति नैव किञ्चित् ।।407।।

रमणीचरणाङ्गुल्यो रम्या अरुणास्तथा हि सुकुमाराः।
मन्ये नूपुरभारात्क्षरति सुरागस्तनोर्नित्यम् ।।408।।

मयूरपिच्छाङ्कित चन्द्रिकाभी
रराज कृष्णो मुकुटेन तादृग् ।
प्रस्पर्धया सम्प्रति चन्द्रमौले-
र्मन्येऽद्य जातः शतचन्द्रमौलिः ।।409।।

दृगोष्ठवसनज्योतिः संयोगाद् धरिताऽपि सा।
इन्द्रायुधसमा भाति मुरली त्वधरे हरेः ।।410।।

नायमवसरोऽन्यस्मै स तस्मा एव केवलम् ।
प्रस्तर नावि संस्थाप्य येनोत्तीर्णो महोदधिः ।।411।।

पावकादधिका ज्ञेया मेघवर्षा प्रदाहका ।
आद्यस्पर्शेङ्गदाहः स्यादन्यस्य दर्शनेन सः ।।412।।



श्रान्ताया नवकान्तायाः गतिं स्वेदकणान् मुखम् ।
पश्यतो लोचने पत्युः श्रान्तेऽरण्यविहारिणः ।।413।।

मानं कोपं च सन्त्यज्य बाला क्रीडापराऽभवत् ।
को न जानाति वर्षासु वृद्धेष्वपि मदोऽधुना ।।414।।

हरिं निधाय हृद्देशे भयाद् भारस्य कोमला।
कर्पूरं चन्दनं चाथ मालां बाला दधाति न ।।415।।

आकुञ्च्य नासिकां किञ्चित् पितृव्य शपथः कृतः।
हृदये मे भ्रुवौ तस्या बाधेते कण्टकाविव ।।416।।

कृतेऽपराधे सखि लोचनाभ्यां
चित्तस्य बन्धो भवतीह देशे।
वासः कथं निर्वहणं कथं वा
न स्नेहपुर्यामिह नीतिवार्ता ।।417।।

निशम्य निज-पति-गमनं वध्वा वचसाश्रितं तया मौनम् ।
सवाष्पया किल दृष्ट्या मन्ये स दृढं समर्पितः कण्ठे ।।418।।

स्वार्थायाहं ब्रवीम्येतन्नाभारं दर्शयत्वहो ।
प्राणेभ्योऽसि प्रियस्त्वं मे प्राणा एते मम प्रिया: ।।419।।

कथं सूर्योदयेऽप्येषा दृष्टिः सन्ध्येव फुल्लिता।
साश्चर्यं मे मनो भूत्वा भ्रान्तं सर्वत्र पश्यति ।।420।।

सम्पत्तिर्दुर्गुणैः पूर्णा काङ्क्षन्तेऽथापि मानवाः।
तां विनापि प्रतिष्ठाऽत्र यदुनाथकृपा यदि ।।421।।

पत्युर्निमीलिते नेत्रे प्रियया क्रीडनोत्कया।
करस्पर्शसुखेनासौ ज्ञात्वाऽप्यज्ञ इव स्थितः।।422।।

कपाटौ सार्गलावेव पश्याम्युत्थाय तादृशौ ।।
आगच्छति पथा केन न जाने केन याति च ।।423।।

यथोद्यताच्छादयितुं मुखं स
वक्षःपटो दूरतरं प्रयाति।
कुचौ प्रियस्ताविव रत्नकुम्भौ
दृष्ट्वा सुखं लुण्ठितवान् क्षणेन ।।424।।

निन्दन्तु लोका इह दीनबन्धो
त्यक्ष्यामि नाहं कुटिलं स्वभावम् ।
शुद्धेऽथ चित्ते सरले मदीये
प्रभो कथं स्थास्यति ते त्रिभङ्गी ।।425।।

सङ्कोचयसि कर्तव्याच्च्युतं सङ्कुचितं स्वयम्।
कथं त्वं सम्मुखो भूत्वा विमुखे मयि सर्वदा।।426।।



त्वं तत्परो वाऽसि निजप्रसिद्धौ
तामेव वाञ्छामि तथैव नाथ।
कथं विवादः परिशान्तिमेति
को वा जयी स्याद्यदुनाथ पश्य ।।427।।

गुणकृतरज्जोर्दूरं धावति भीत इव स प्रभुः शीघ्रम्।
निर्गुणहृदये निकटं ह्यागच्छति पतङ्ग इव कृष्णः।।428।।

श्रुतयः स्मृतयः प्राज्ञाः सज्जनाश्च वदन्ति यद्।
रोगाः पापानि भूपाश्च पीडयन्तीह दुर्बलान् ।।429।।

धृत्वा शिरसि भूपो यद् भुवः प्राप्नोति गौरवम् ।।
तदेव मुकुटं पादे कृत्वा मूर्खः स कथ्यते ।।430।।

त्रुटिं हि दीर्घां महतां विलोक्य
को वा नरः किं गदितुं समर्थः।
स्थलारविन्दस्य हि पश्य शाखाः
सकण्टका एव कृता विधात्रा ।।431।।

न सुन्दरः कोऽपि न वा कुरूपः
काले च सर्वे खलु तादृशास्ते।
यस्मिन् रुचिर्यस्य च यादृशी स्यात्
स रोचते तादृश एव तस्मै ।।432।।

को वा नरो लङ्घयितुं समर्थः
संसारसिन्धुं विततं महान्तम्।
छायागृहीत्रीव च यत्र मध्ये
वामाछविर्धावति राक्षसीव ।।433।।

दिनानि दश काक त्वं स्वकीर्तेर्गायनं कुरु।
यावद्धि श्राद्धपक्षोऽस्ति सम्मानं तावदेव ते ।।434।।

कालप्रभावान्म्रियते तृषार्तः
शुको मनोज्ञोऽपि सुपञ्जरस्थः।
बलिप्रदानाय च मानपूर्व-
माहूयते वै विरसोऽपि काकः।।435।।

यत्रास्ति चित्तं सखि मे विलग्नं
तेनैव केशा खलु साधिता मे।
हस्तौ च तावेव परीक्षितौ स्तः
किं व्याख्यया किं च निरूपणेन ।।436।।

धरणि कमलमूलं षट्पदो यद् विलग्नो
निजमनसि विचिन्त्यै वाशया बद्धभावः।
पुनरपि च वसन्तो ह्यागमिष्यत्यतुल्यो
मृदुलसुमनराशिं चास्य शाखासु भोक्ष्ये ।।437।।



येभ्यो लब्धं मानं स्थलारविन्द नहि तेऽत्र नागरिकाः।
ग्रामीणानां ग्रामे पुष्पितमपि तत्र वृथैव प्रतिभाति ।।438।।

व्यापारी हस्तिनां कोऽत्र गच्छान्यत्र वणिक्सुत ।
वसन्ति रजकाः कोला कुम्भकाराश्च केवलम् ।।439।।

तस्याः कण्ठे गौरे यत् ताम्बूलरसो विशन्त्यन्तः।
मन्ये विलसति रेखाऽत्रारुणगलबन्धपट्टस्य ।।440।।

अमूल्यरत्नैः खचितौ सुभास्वरौ
तन्नूपुरौ कोमलयोरुऽपादयोः।
भाले विशाले तिलकोऽभ्रकस्य च
विराजते वै विलसन्मनोहरः ।।441।।

मुखे तु कुटिलाः केशा अधिकं खलु वर्धयन्ति मुखकान्तिम् ।
धातौ कृत्वा रेखाः मुद्रा हि विनिर्मिता लोके ।।442।।

कृत-प्रयत्नो नितरामशक्तः
कन्दर्प-वीरेण वशीकृतोऽस्मि ।
तद्देह-कान्त्या-हृदये प्रविद्धः
प्रान्ते च मन्मर्मणि बाधतेऽद्य ।।443।।

श्रान्ताः खलाः काष्ठकृतः कठोरै-
र्निन्दाकुठारैरनिशं प्रयत्नैः।
लग्नां दृढां प्रेमतरोः सुशाखां
छेत्तुं न शक्ता हृदयालवाले ।।444।।

मन्ये सविद्युतो मेघा विरहेण धृता इह ।
नेत्रे निरन्तरं तस्मा द्रष्टौ यामान्नु वर्षतः ।।445।।

प्रदर्शयसि नैपुण्यं कथं मिथ्याप्रवञ्चनैः।
गुणा निर्गुणया प्रोक्ता सर्वेऽपि तव मालया ।।446।।

तयोः प्रेम तयोरेव ते प्राणा देहयोर्द्वयोः।
काकलोचनयोर्मध्ये चलत्येको हि गोलकः।।447।।

दृष्ट्वा तदीयां हि छविं सुरम्यां
कनिष्ठिकाग्रे स्थिरतामवाप्य।
तस्याश्च पश्चान्नखयावकस्य
रागेण रक्ते हि विलोचने मे ।।448।।

तारुण्य-वृद्ध्या नवयौवनाया
वृद्धिं प्रयातोऽनुदिनं ह्युरोजौ ।
अहो सपत्नी हृदयेषु भारः
श्वासावरोधश्च समं प्रवृद्धौ ।।449।।



तवाक्षिबाणसञ्चारस्त्रुटिपूर्णो विभाति मे।
न क्षतं शरविद्धस्य चालकस्यापि हृत्तटे।।450।।

शिरसि धृतः कचभारो विलसति पृष्ठस्थितः सदा तस्याः।
कण्ठे गतोऽपि हारः वक्षसि विद्योततेऽत्यन्तम् ।।451।।

स्रोतोरसस्यसरितोऽनु तट प्रदेशान्
यावद्यथैव खलु पातयति प्रवृद्धः।
तावत्तथैव वनिता हृदयालवाले
स्नेहप्रजातविटपो दृढतां प्रयाति ।।452।।

अहर्निशं वाञ्छति कर्तुमेषा
मानं न शक्नोत्यबलाऽति मुग्धा ।
दोषान्यदान्वेष्टुमियं प्रवृत्ता
पत्युर्गुणानेव हि पश्यति स्म ।।453।।

रुष्टां करोति तां रुष्टां क्रीडार्थं दयितः पुनः।
न मानयति तत्स्नेहो रुष्टां वीक्ष्य विवर्धते ।।454।।

अहो वियोगोत्थविपत्ति-काले
पर्यत्यजन् सर्वसुखानि सङ्गम्।
दुःखं च यन्मे ह्यवशिष्टमेकं
प्राणैः समं यातुमुपस्थितं तत् ।।455।।

नूतनाद् विरहाद् बाला बभूवान्तःसमाकुला।
अहसच्च पुनर्वीक्ष्य दुःखिताः प्रतिवेशिनीः ।।456।।

हृत्पत्रे तत्स्नेहस्तत्राङ्कितोऽपि न लक्षितः किञ्चित्।
वियोगतापे स्पष्टो यथौषधि विशेषलिखितोऽङ्कः ।।457।।

प्रफुल्लिता यासि यथैव पुष्पं
प्रातर्विकासे विमले मनोज्ञम्।
पत्युः समीपे सखि ते विकल्पाः
तिरोभविष्यन्ति यथेह ताराः ।।458।।
निशीथे वीक्ष्य शीतांशुं तदाहं व्याकुलाभवम्।
सा वीथी किन्तु सौभाग्यात् भृङ्गैरन्धायिता पुनः ।।459।।

गेहे गेहे च तद्वार्ता गेहे तिष्ठति न क्षणम्।
ज्ञात्वा यात्युत विस्मृत्य याति सा खलु तद् गृहम् ।।460।।

मज्जन्ति केचिद् प्रवहन्ति केचिद्
पतन्ति केचिद् घनपङ्कमध्ये।
नवास्ववस्थासु नदीषु चेत्थं
लोकेष्वनर्था बहुली भवन्ति ।।461।।

अल्पाविदानीं हि कुचौ सपत्नी
मनः सुकम्पं नितरां दधाते।



दृढप्रहारेण तयोस्तु भूयः
कास्थातुमर्हा हृदये प्रियस्य ।।462।।

दीपप्रकाशे वस्त्राणि रत्यर्थमहरत्पतिः।
सौन्दर्यकान्तिलिप्ताङ्गी लज्जां नान्वभवत् परम्।।463।।

दृष्ट्वा प्रियकरं नीवीमोचनायाग्रतश्चलम् ।
भ्रूवने चक्षुषोर्दुर्गे लज्जा हि शरणं गता।।464।।

लज्जा तु लज्जिता भूत्वा रत्यारम्भे गता क्वचित् ।
धृष्टतागत्य तत्स्थाने हर्षाद् धृष्टतया स्थिता ।।465।।
किञ्चिद् विहस्य सङ्कोचाद् गत्वा दूरं मनाक् प्रियात् ।
स्वाञ्चले ह्याननं किञ्चित् परावर्त्य विजृम्भते ।।466।।

समीपं च स्थिते पत्यौ लग्ने देहेन सत्यपि।
पश्यन्त्याऽधः कटाक्षेन गूढं प्रेम निवेदितम् ।।467।।

ताडनं पुष्पवत्तस्याः शर्करावच्च गालयः।
वाक्यान्यपि कठोराणि हसितेन विना नहि ।।468।।

बर्हिणो युगपत्तस्यां नृत्यन्ति स्म विनाम्बुदैः।
मन्ये गतो नन्दसूनुः सर्वतो नन्दयन् दिशि ।।469।।

बाले दृष्टाऽपूर्वभक्तिस्त्वय्येवैतादृशी मया ।
तनुः कदम्बमालावन्मालां प्राप्य बभूव यत् ।।470।।

व्यापारी यस्य लोकेऽस्मिन् व्यापारश्च न विद्यते ।
पुष्पितः फलवान् सोऽर्को निदाघे हरितायते ।।471।।

वार्तारसाभिलाषेण मुरारेर्मुरली हृता ।
भ्रूहास्यं शपथं कृत्वा दातुं ब्रूते ददाति न ।।472।।

वीक्ष्याद्भुतसौन्दर्यं बालाया मुदितोस्म्यहम् ।
माधुर्यं कीदृशं धात्रा दत्तं रूपे ह्यनुत्तमम् ।।473।।
नैषा प्रावृड् वसन्तोऽयम् वृक्षचित्तान्न विस्मर ।
नवपुष्पफलप्राप्तिर्नापत्रीभूय विद्यते ।।474।।

वन्यमार्गे पिका धूर्ता दृष्ट्वा विरहिणो जनान् ।
रक्तेक्षणाः कुहूशब्दानूचुर्मदनसम्मताः।।475।।

सर्वाः कुसुमिता दिक्षु वनोपवनराजयः।
मन्ये शरैर्वसन्तेन लक्ष्या विरहिणः कृताः।।476।।

दीप्यते ह्याननज्योतिर्धौतवस्त्रे धृते नवे।
सर्वं महानसं चास्या स्वच्छदीप्त्या चमत्कृतम् ।।477।।



तप्तस्वर्णाभसर्वाङ्गी शुभ्रशाट्यां विराजते ।
शरन्नीरदविद्युद्भाः अनया मलिनायते ।।478।।

वैद्यो बहुधनं नीत्वा प्रशंसन्पारदं ददौ ।
पत्नी पश्यति भेदेन विहस्य स्वामिनो मुखम् ।।479।।

अलं त्वया मे ग्रथितास्ति वेणी
दृष्टा च रीतिस्तव गुम्फनस्य ।
केशाः कथञ्चिन्मम शोषिता ये
त्वयाद्रितास्ते सलिलं किरन्ति ।।480।।

विनाश्य देहं धनसञ्चयस्य
युक्ता न नीतिस्तव मित्र नूनम् ।
भुक्तावशिष्टं यदि तेऽस्ति वित्तं
तत्कोटिसङ्ख्याभिरिदं चिनुष्व ।।481।।

न गोप्तुं शक्यते चैषा त्वद् वाक्यैः कुटिला गतिः ।
यत्ते धृष्टतया हास्यं प्रतिभाति विषं यथा ।।482।।

न स्पृशति स्वहस्ताभ्यां पादौ दाहभयादिव ।
स्थलारविन्दगुच्छेन तदा पोञ्छति संशयात् ।।483।।

भूमिं स्पृष्टुमिमे मेघाः सन्नता वर्षणोत्सुकाः।
मुनिचित्तान्या पिस्नेहात् प्रमदोत्कान्यवेक्ष्यतान् ।।484।।

त्रुटितं मेघवृत्तं तन् मार्गा दिक्षु समुज्ज्वलाः।
तव राज्ये शरद् राजन् सुखितं सकलं जगत् ।।485।।

न रात्रि-दिनयोर्भेदो वर्षायां तिमिरे घने ।
चक्रवाकयुगेनैव भेदो लक्ष्यो जनैरिह ।।486।।

कञ्जारुणौ तच्चरणौ च पाणी
दृक्खञ्जनौ वा मुखमिन्दुतुल्यम् ।
इत्थं शरत्सा नव सुन्दरीव
काले च कस्मै न सुखं ददाति ।।487।।
न चैते पावका उष्णा वाता नातपसम्भवाः।
वसन्तविरहे ग्रीष्मोच्छ्वासाः सन्ति न संशयः।।488।।

सर्पा मयूरा हरिणाश्च सिंहा
एकत्र सार्धं निवसन्ति सर्वे ।
ग्रीष्मेण मन्ये भुवनं समग्रं
तपोवने नैव समं व्यधायि ।।489।।

पदे पदेऽस्ति मार्गेऽस्या अरुणा चरणद्युतिः।
मन्ये रम्याणि पुष्पाणि विकसन्ति स्थले-स्थले ।।490।।

कन्दुकानीव नीचानां हृदयान्युल्लसन्ति वै।
यथा शिरसि हन्यन्ते उद्गच्छन्ति तथा तथा ।।491।।



यथा यथासावभियाति वृद्धिं
हेमन्तरात्रिर्हि तथैव बाले ।
सुखानि लोकस्य गृहे गृहेऽत्र
कोकस्य शोकाश्च भवन्त्यनन्ताः ।।492।।

अति मिलनं सञ्जातमनलमिदानीं सखि तवातिमिलनेन।
इति कथयन्ती बाला पश्यति भूयः परावृत्य ।।493।।

हरिरिव हृदये त्वं धारयेथा न चैनां
नहि शिव इव कृत्वार्धाङ्गिनीं भावयेर्वा।
निजवपुषि सदैकीकृत्य साकं निजाङ्गैः
प्रतिपलमनुरक्तां रक्ष मुग्धां प्रियां स्वाम् ।।494।।

मार्गशीर्षेण मासेन कामासक्तं कृतं जगत् ।
अतः कामो न गृह्णाति धनुर्बाणांश्च कौसुमान् ।।495।।

रसालसौरभतृप्ताः सुमनः परागलिप्ता गुञ्जन्तः।
मत्ता मधुकरनिकराः स्थले स्थले भ्रमन्ति सखि झम्पन्तः।।496।।

हेमन्तधात्रा भुवनं व्यधायि
स्नेहेन पूर्णं निखिलं नवेन।
संयोगकाले विहरन्ति सार्धं
मृत्युर्वियोगे किल दम्पतीनाम् ।।497।।

ताम्बूलरागेण च पक्ष्मणी ते
रक्तेऽथ वार्ता च छलेन युक्ता ।
आलस्यपूर्णे नयने त्विदानीं
कथं विधत्से मम सम्मुखं भो ।।498।।

अर्पयसि कथं कण्ठे मामद्य किमु नास्ति सा ।
चम्पकाङ्ग्या यया रात्रौ जाते रक्ते तवेक्षणे ।।499।।
उत्तिष्ठ भो बहिस्तिष्ठ गेह एव करोषि किम् ।
शीघ्रं येन नवोढाया विशुष्येन्नखरञ्जिनी ।।500।।

गुणैर्विहीनं सगुणं विधत्ते
जनं हरिर्यं तु करोति हस्ते ।
क्षिप्तश्च हस्तात्स गुणेन हीनो
बालस्य काष्ठभ्रमरेण तुल्यः ।।501।।

भीतिः प्रविष्टा हृदये मदीये
विलोक्य रीतिं जगतो विचित्राम् ।
परस्परं नेत्रयुगप्रहारे
देहो ह्ययं दुर्बलतां प्रयाति ।।502।।

मुखाच्छादनं सा यथा भावभङ्ग्या
करोत्याशु तिर्यक् च भूत्वाऽथ किञ्चित्।
गृहीत्वा करे कुङ्कुमं तत्प्रियोऽस्याः
मुखे लिम्पितुं तां विभीतां करोति ।।503।।



तावद् बुभुक्षा मधुनस्तथेक्षो
रसस्य पीयूषरसस्य वापि।
यावन्न वार्तां कुरुते क्षणाय
किञ्चित्त्वया सुन्दर सुन्दरी सा ।।504।।

उत्थाय प्रपदे स्थित्वा भित्तौ भारं नियम्य च।
वीक्ष्य प्रेम्णा मिथो नत्वा कपोलौ चुम्बितौ तयोः ।।505।।

ग्राम्यासु भो नागरिके निवासं
कृत्वा विलासाँल्ललिताँस्त्यजात्र।
प्रदर्श्य चाङ्गुष्ठमथोहसि त्वा
ब्रूह्यन्यथा हास्यमवाप्स्यसि त्वम् ।।506।।

अलक्तकं पादगतं सपत्न्या
अवेक्ष्य सेर्ष्येव जहास तां सा।
दृष्ट्वा सलज्जां हसितां च पश्चात्
उच्छ्वस्य दीर्घं विरराम मध्ये ।।507।।

चातुर्यवार्तया ब्रूषे भेदं मां न कथं सखि ।
पौषमासे परं सर्वं वदन्ति श्रमविन्दवः ।।508।।

प्रसादिता त्वं शपथैः प्रियेण
न प्रैक्षथास्तं च दृशा तदानीम् ।

एकाकिनी सम्प्रति साभिमानं
गोष्ठे कथं तिष्ठसि कोपयुक्ता।।509।।

अतीतावधिः सति खिन्ना स्वचित्ते
बभूवेदृशी दुर्बला न्येव दृष्टा।
नवाभी रसालस्य सा मञ्जरीभि-
रिदानीं कृतोन्मादयुक्ता वराकी।।510।।

आलस्यपूर्णे हि विलोचने ते
दृष्टिश्च सा हास्ययुता ब्रवीति।
कृतं त्वया जागरणं निशायां
निमग्नयानन्दपयोधिमध्ये ।।511।।

यस्या उज्ज्वलनां वीक्ष्य दृष्टिरुज्ज्वलितेव मे।
क्व कुसुमं क्व च ज्योतिर्दर्पणस्य क्व कौमुदी।।512।।

सुगौरकण्ठे ललिता हि माला
धृता द्युतिस्तर्हि समुच्छ्रिताऽभूत् ।
बभौ सुखस्पर्शतया स्वयं सा
यथाऽतिशुभ्रा बकुलस्य माला।।513।।

रसार्द्रावपि तत्स्थानात् तौ न कुत्रापि गच्छतः ।
सिञ्चन्तौ नेत्रयन्त्राभ्यां प्रेमरागैः परस्परम् ।।514।।



आगच्छन्ति कथं गेहे कृष्णवर्णा जना इमे ।
तान्विलोक्यैव मे देहो वेपते सखि तत्क्षणात् ।।515।।

विरहजनितपीडाव्याकुला कोमलाङ्गी
मृदितकुसुमकल्या सा तदानीं बभूव।
परिचय अपि तस्यास्तत्समीपस्थिताभि-
र्नहि भवति सखीभिः हा विधे दुर्बलायाः।।516।।

कटाक्षैस्तौ तिरश्चीनं पश्यन्तौ यत्र तन्मनः ।
तोयार्द्रावेव कम्पेते जप पूर्तिं द्वयोर्नहि।।517।।

हनुमुत्थाप्य हस्तेन कम्पता तिलको हि यः।
कृतो भर्त्रेति सा निर्यङ् मुदिता याति मानिनी ।।518।।

अयमेतादृशः कालः सुखदं वस्तु दुःखदम्।
चन्द्रिकाप्यद्य चैत्रस्य चेतनां हरते मम ।।519।।

उदीर्य मिथ्या विरचय्य वार्तां
कथं च मे वर्धयसीह खेदम् ।
वक्तुं प्रवृत्तेयमलक्तकस्य
रेखा तव स्पष्टतयैव सर्वम् ।।520।।

आरब्धो हि महेन्द्रेण क्रुद्धेनाकालसम्प्लवः।
गावो गोप्यश्च गोपाला रक्षिता गिरिधारिणा ।।521।।

गौराङ्ग्या मुग्धया स्मित्वा किञ्चित्किञ्चिच्च लज्जया।
मुग्धावार्ता समारब्धा तत्रासक्तिः कृता मम ।।522।।

लोचने तादृशे नाद्य रागोऽन्यस्तत्र दृश्यते ।
तवान्तः स्नेहवार्तां ते मन्दं कथयतो नवाम् ।।523।।

दृष्ट्वा विलज्जते किञ्चिल्लोभश्च पतिदर्शने।
सङ्कोचस्नेहयोर्मध्ये तस्या नेत्रे पितुर्गृहे।।524।।

पत्युर्वियोगादतिविह्वला सा
धैर्यं न तस्या हृदि किञ्चिदस्ति।
इतस्ततो गच्छति पीडया च
दिवानिशं तिष्ठति यत्र कुत्र ।।525।।

प्रेषितं न लिखित्वैव विरहाकुलया तया।
पत्रमक्षरहीनं तत्पठत्येकान्तमाश्रितः।।526।।

स्नेहेन लज्जया वापि बाला परवशा समम्।
वीक्ष्य लुप्यति गुप्तं सा वीक्षते च पुनः पुनः।।527।।

रसिक नहि रसो ह्येवं भ्रमसि विना प्रेम इतस्ततो यत्त्वम् ।
खेदयसि स्नेहिजनं च निजं न किं सङ्कोचमायाति।।528।।



वसुधाकमलसुगन्धौ विरहाकुला न्यस्यातिघनसारम्।
लिम्पति दाहनिवृत्यै तद्दाहो वर्धतेत्यर्थम् ।।529।।

गोप्तुं यदा तौ चलतो मिथो द्वा-
वालिङ्ग्य गाढं हृदयेषु यातः।
स्पर्शस्य कालेऽक्षिनिमीलने च
क्रीडाप्रसक्तौ भवतो न तृप्तौ।।530।।

तीक्ष्णानपोऽयं प्रतियात शीघ्रं
प्रेष्यैवमन्याश्च मिषेण तेन।
स्वदेहछायासु च या प्रियाऽसी-
दाच्छाद्य नीता सखि पश्य शाठ्यम् ।।531।।

तारुण्यभाराच्चलिताऽवनम्रा
वायुप्रयुक्ता हरिता लतेव।
ममेक्षणे सूक्ष्मकटिप्रदेशे
यदा तु लग्ने स्थित एव तत्र ।।532।।

अचलासि कथं चित्रलिखितेव स्थिता सखि ।
लज्जां लोकभयं त्यक्त्वा ब्रूहि कं वानुपश्यसि ।।533।।

संस्तम्भितेव स्थिरलोचनेव
श्रान्तेव वा त्वं सखि वीक्षसे किम्।

कस्मै प्रदत्तं च मनो क्षणेऽस्मिन्
कथं कृतं शून्यमिवात्मदेहम् ।।534।।

यदा प्रदत्तोऽब्जकरेऽतिगौरे
स्पर्शाद्विशुष्कः स शरीरलेपः।
वक्षःस्थले कुङ्कुमवद् बभूव
तस्यास्तदासौ विरहाग्नितापात् ।।535।।

पूर्वं नु तस्याः कुपिते य आस्ताम्
किञ्चिद् विनम्रेऽद्य विलोचने ते।
मयाऽधुनाऽऽगच्छ चलामि सार्धं
हठं तु सायक्ष्यति तां च लज्जाम् ।।536।।

प्रोक्तानि पूर्वं विरहेण यानि
वचांसि पर्याकुलया विविक्ते।
उक्त्वा च तान्येव पुनः सवाष्पे
न लोचने कस्य करोति कीरः।।537।।

नीलाम्बराच्छादितमाननं यत्
सुशोभतेऽस्या नितरां मुरारे।
मन्ये प्रसन्ने यमुनासुनीरे
पूर्णः सुधांशुः प्रतिबिम्बितोऽस्ति ।।538।।



निषेव्य मद्यं हि मदान्विता सा
चन्द्रानना मानमिषं विधत्ते ।
विधाय हास्यं च पुनर्विहस्य
प्रतर्ज्य भूयोऽपि करोति हास्यम् ।।539।।

गृहे गृहे चेद् भ्रमणस्य मोहं
त्यक्तुं न शक्नोषि हरे यदा त्वम् ।
गच्छाशु यत्रैव रुचिस्तवास्ति
कथं मदीये रमसे हृदब्जे ।।540।।

प्रलयं विधातुं युगपत्प्रवृद्धा
धाराधरा वर्षयितुं प्रवृत्ताः ।
धृत्वा च हर्षेण हरिः स्वहस्ते
गिरिर्महेन्द्रस्य जहार गर्वम् ।।541।।

उद्गन्तुं खलु कन्दर्पः सम्प्रेरयति लोचने ।
विनम्रे लज्जया किन्तु मन्ये तत्रैव कूर्दतः।।542।।

यथाहि रात्रिर्निकटे दिनान्ते
तथा तथातीव समुत्सुकाऽभूत् ।
इतस्ततो गच्छति सा क्वषन्ती
सुखानुभूत्यब्धि तरङ्गितेव ।।543।।

पालितमधुना वचनं समानीता तव सन्निधावेषा ।
यथा हि चम्पकमाला हृदये धार्या समावेष्ट्य ।।544।।

हृदये द्वयोर्विवक्षा तथापि वक्तुं द्वयोरसामर्थ्यम् ।
निशम्य याचकवचनं यथा न कृपणो वदति किञ्चित् ।।545।।
दाडिमफलमिव हृदयं तव गुणबीजैर्हि परिपूर्णम् ।
पक्वं कपटप्रयोगैरपि प्रिय कथं न दीर्यतेऽद्यापि ।।546।।

चकोर इव चित्तं ते नान्यदिच्छति पश्य तत् ।
पिबतीन्दुमयूखान् वा स्फुलिङ्गानत्ति वार्चिषः ।।547।।

जानामि वार्ता निपुणं त्वयोक्ता-
श्चातुर्ययुक्ताः सकला वयस्ये ।
मनो वशे स्याद्यदि मे मुकुन्दं
विलोक्य कुर्यां वचनं तवाहम् ।।548।।

धूलिर्न चेयं प्रसृता धरण्यां
धूमो ह्ययं दिक्षु विलोक्यतेऽत्र ।
प्रावृट्पयोदाः प्रथमाः समन्तान्
मन्ये जगद् दग्धुमिव प्रवृत्ताः ।।549।।

नखछविचूर्णं दत्वा गता छलान्मम मनः सहादाय।
यद्यपि मयावरुद्धं गतं प्रसह्येव करे तस्याः ।।550।।



समर्प्य तस्यै प्रतिवेशिने मां
प्रयाति भर्त्तेति तदा निशम्य ।
हास्यं ह्यस्माद् दृशि शोभतेऽस्या
वाष्पस्थले पश्य विचित्रमेतत् ।।551।।

उक्त्वा तु मध्ये रिपुणा ह्यनेन
रागो विरागो हि कृतः प्रसह्य ।
स्मरामि गीतं न लयं ध्वनिं वा
न तत्स्वरं वा मधुरं वयस्ये।।552।।

वियोगवह्नौ ज्वलति प्रमुग्धं
नेत्रप्रवाहाद् वहते च नित्यम् ।
उड्डीयते श्वाससमीरणे च
दिवानिशं मे हृदयं क्षिणोति ।।553।।

चित्तं प्रसक्तं मम चित्तचौरे
गुर्वी च लज्जा सततं गुरूणाम् ।
करोमि कार्याणि गृहस्य किन्तु
दोलायितं मे हृदयं सदैव ।।554।।

प्रोञ्छांशु केनाशु विधेहि दूरं
भयानकं वेषमिमं विचित्रम्।
ताम्बूलरेखा तव पक्ष्मलग्ना
तीक्ष्णाद्विजिह्वेव विभाति मह्यम् ।।555।।

विलोक्य यात्वां मनसो गतिर्मे
बभूव वाचा नहि वर्णनीया ।
हनोर्हि गर्ते पतितं गभीरेऽ-
प्युड्डीयते तत्त्वनिशं प्रमाथि ।।556।।

नाडीपरीक्षापि मया व्यधायि
सम्यग्विचार्यैव सुनिश्चितं च ।
स एव रोगश्च स एव वैद्यः
स औषधिर्वानिरुजां विधातुम् ।।557।।

मनसो या प्रिया गुप्तं रक्षिता हृदये त्वया।
पश्यतीव हि कोपार्थमुत्थायोत्थाय सा दृशि ।।558।।

आत्मानमधिकं चित्ते मन्येते द्वौ दृढं मिथः।
को मानयति कां काऽथ कं मानयति कोऽधिकः ।।559।।

निशम्य वंशीरणितं सोल्लासैव द्रुतं गता तत्र।
ज्ञात्वा गतः च कृष्णं हृदि शरविद्धेव विनिवृत्ता ।।560।।

धनं महर्घं व्रजवासिना यत्
कस्मैचिदल्पं नहि रोचते चेत् ।
शान्तिः शुचित्वं च कथं हि तस्य
द्रव्यप्रसक्ते हृदये भवेताम् ।।561।।



नेयं समर्थास्ति हठं विधातु -
मस्मिन् हि वर्षासमये कदाचित् ।
ये ग्रन्थयोऽन्ये कठिना इदानीं
ग्रन्थिस्त्वहो मानकृतो विमुक्तः ।।562।।

अस्यां मनुष्या दयितावियुक्ता
जीवन्ति चेत् प्रावृषि ये क्षणाय।
भ्रमन्तु नूनं चिरजीविनस्ते
चिन्ता-विहीना अमरा पृथिव्याम् ।।563।।

स्नेहेन चित्तं हि समाकुलं त-
द्धृयसम्भवं सम्मिलनं प्रियेण ।
तस्यैव शस्त्रास्त्रविभूषणानि
ह्यालिङ्ग्य कण्ठे निदधाति भूयः ।।564।।

भूत्वा जपापुष्पमिवातिथे त्वं
दिनाद्धि यस्मात्स्वगृहे निवृत्तः ।
कालाद्धि तस्मात्कलहादिहेतु -
र्न याति दूरं ह्युभयोः स मानः ।।565।।

अङ्गानि लज्जारहितानि हर्षान्
मिलन्त्यतो मे महती विलज्जा।
प्रालेयतुल्यः स च मेऽभिमानो
विलुप्यतीवाभ्युदिते च भानौ ।।566।।

सीमासु निक्षिप्तमिव प्रिये ते
संसारसौन्दर्यमिहास्ति देहे।
रूपे च दृष्टिर्मम तत्र लग्ना
दृष्टौ चलायामपि चञ्चलत्वम् ।।567।।

असावधाने नयने ममैते
चले ह्यकस्मात्स्मरतो न किञ्चित्।
यथैव कोपं सखि दर्शयामि
करोमि किं ते हसतः प्रसह्य ।।568।।

करोषि वार्ता तु मया परन्तु
जिह्वागतं नाम तदन्यदीयम्।
पतामि भूयः शृणु पादयोस्ते
गत्वा च तां वक्षसि योजय त्वम् ।।569।।

नाविक शर इव तरुणी क्षणमिव चपलाऽतिसुन्दरी वीक्ष्य ।
सत्वरमिह च गवाक्षे ज्वलनज्वालेव गता दीप्त्वा ।।570।।

भित्तेर्विवरे हस्तौ कृत्वा मेलयित्वा च तां रात्रिम् ।
द्वावपि सुखं मनोभ्यां मिलिताविव तौ चिरं सुप्तौ ।।571।।

स हरिर्जीवनमूलं तव यदि बामवाहो मिलेत् स्फुरणात् ।
हित्वा दक्षिणबाहुं तुभ्यमेव तदालिङ्गनं दास्ये ।।572।।



मुक्ता मसृणाश्चिकुराः ललिताः खलु मोचयन्ति संसारात् ।
नीला वेणी बद्धा एते बध्नन्ति चेतांसि ।।573।।

उष्णो न चासौ नहि शीतलश्च
वसन्तकाले वहते समीरः।
देहे त्वदीये पुलकावलीयं
कथं वयस्ये श्रमविन्दवश्च ।।574।।

विचार्य योगं निजपितृमारकं
मौहूर्ति कोऽसौ मनसाऽतिदुःखितः।
ज्ञात्वा च योगं स सुतस्य जारज-
मुल्लासपूर्णो हृदये तदाभवत् ।।575।।

चञ्चले लोचने तस्या दृष्टे क्षीणपटे सखे ।
गङ्गाया विमले नीरे मीना उच्चलिताविव ।।576।।

बाले मुखं तत्र विधेहि रम्यं
पश्यात्र चा तन्वि न किञ्चिदस्मिन् ।
विलोक्य मां ते पुलकावलीयं
ब्रवीति पृष्ठे हृदयस्य सर्वम् ।।577।।

द्वौ जीविताववेव वियोगकाले
न लज्जयाऽतो गदितुं समर्थौ।

मिथो ह्यधस्ताच्च विलोकयन्ता-
वागत्य शीघ्रं मिलितौ प्रगाढम् ।।578।।

मूढामिव त्वं हि करोषि किं मां
न शक्यते सङ्गिनि तद्धि गोप्तुम् ।
दृष्टी रसार्द्राऽप्यनुरागपूर्णा
रसं निशाया अनुवर्षतीव ।।579।।

लुप्ते शशाङ्के च किमन्धकारा-
च्चन्द्रानने त्वं तु वृथा बिभेषि।
पटं निवार्याथ मुखाद् विहस्य
चलाशु चन्द्रोऽस्ति हि ते समीपे ।।580।।

कुर्वन्ति नित्यं विफलं विवादं
मतेषु भिन्नेषु हि दीक्षिता ये।
एकोऽस्ति सर्वत्र स नन्दसूनु-
र्भजन्ति सर्वे च तमेव भावैः ।।581।।

शून्ये च लब्ध्वा भवने नु तस्याः
स्नेहाद् गृहीतो मसृणः करो यत् ।
नहीति नेतीति च कुर्वती सा
स्निग्धेक्षणा मे हृदि संस्थितेव ।।582।।



ध्याने निमग्नाऽथ निजस्य पत्युः
स्मृतिं विहायैव हि तत्र संस्था ।
आत्मानमादर्श तले निरीक्ष्य
स्वयं त्वहो मुह्यति सा प्रमुग्धा ।।583।।

त्यजन्ति दोषान् यदि वा सदोषाः
शङ्कां प्रकुर्वन्ति जना हि लोके।
कलङ्कहीनं समेवक्ष्य चन्द्र-
मुत्पातशङ्कामनुभावयन्ति ।।584।।

पीडा प्रवृद्धा विरहेण तीव्रा
प्राणान् विहातुं यतते प्रसह्य।
इन्दोश्च वायोश्च सरोरुहाणां
चन्द्रानना धावति सा समक्षम् ।।585।।

ध्यानास्थितां तां समयाद्धि कस्मात्
पश्यामि शङ्के च बिभेमि किञ्चित् ।
भृङ्गीव रूपे परिवर्तनं चेद्
प्रियः क्व वा यास्यति नैव जाने ।।586।।

सा मृगनयनी पत्युर्देहे वेणीकृतं हि मालिन्यम्।
वीक्ष्य स्थिता सरोषा पश्यति खेदादुदासीना।।587।।

यद्यपि ललना अन्याः सन्ति तीक्ष्णायतलोचना लोके।
तस्य ईक्षणमन्यत् सन्तोऽपि वशीकृता येन ।।588।।

पत्यागमनं श्रुत्वा मीलति नयने च जृम्भतेऽभीक्ष्णाम्।
निद्रामिषात्तयैवं सर्वा उत्थापिता सख्यः ।।589।।

उद्गत्य दीर्घतां यान्ति नभः स्पर्शान्न वामनाः।
विस्फार्य दर्शनान् नेत्रे दीर्घतां नहि गच्छतः।।590।।

प्रेष्य दूतीं पतिं स्नेहात् साह्वयत् किन्तु लज्जिते।
वीक्ष्य नेत्रे द्वयोर्वाचा सङ्कोचात् मौनमाश्रितम्।।591।।

दुःखदानां न चैतासां मुखे चर्चास्ति काचन।
कानने कानने कर्णा एतासां सन्ति मत्कृते।।592।।

व्यजनं प्रेषितं स्नेहात् त्वया तस्यैव वायुना।
गतस्तापो तथाप्यार्द्रा विद्यते श्रमविन्दुभिः।।593।।

अहर्निशं ध्यानगता स्वपत्यु -
र्मन्ये मुदा तिष्ठति तत्समीपम् ।
स्नाता क्षणात्सा श्रमविन्दुभिश्च
रोमाञ्चयुक्ता च विकम्पते च ।।594।।



शक्तः कथञ्चिन्नहि बाधितुं स्या-
दहर्निशं तं विरहान्धकारः।
यतो हि दृष्टौ खलु वर्तते सा
तस्यास्तनुर्दीपशिखेव नित्यम् ।।595।।

दग्धा तु पूर्वं विरहानलेन
विलोक्य खद्योतगणं समन्तात् ।
अवोचदभ्यन्तरमाशु सख्य
आपान्तु वर्षन्ति बहिः स्फुलिङ्गाः।।596।।

पलाशपुष्पाणि विफुल्लितानि
पान्थो नवः कोऽपि वने विलोक्य।
दावानलोऽयं हि विचार्य चित्ते
प्रत्यागतोऽसौ चकितः स्वगेहे ।।597।।

कुटुम्बिनीभिः परितो वृताऽपि
विधाय पृष्ठं हि तथोपविष्टा।
इतोऽपि दृष्टं रुचिरां क्षणाय
स्मिताननाऽसौ कुरुते सलज्जा ।।598।।

निशम्य तन्नाम शरीरमेत-
दन्यादृशं ते च मतस्तथैव ।
पश्याथ तीव्रं भ्रुकुटी विधाय
स्नेहस्त्वया गोप्तुमसौ न शक्यः।।599।।

नहि गणयति शल्यं दुःसहं सा सपत्न्याः
नहि भवति सचिन्ता पत्युरुद्वाहकाले ।
निजगुणनिजरूपेभ्यः सगर्वेव नित्यं
ननु विचरति हर्षादुत्सुका सर्वतः सा ।।600।।

विलोक्य रूपं खलु राधिकाया
अङ्गेषु सर्वेषु करे च कम्पः ।
गिरेश्चलत्वे च समीक्ष्य भीतान्
व्रजौकसो वीक्ष्य हरिः सलज्जः ।।601।।

गायन्ति सख्यो मिलिता हि सर्वाः
उत्साहपूर्णा हसिताननाश्च ।
खिन्ना कथं ह्यालि वधूस्त्वमेका
विवाहकाले तव देवरस्य ।।602।।

सा सुन्दरी स्त्रीषु तथोपविष्टा
स्वात्मानमेवं हि निगूह्य बाला ।
शिखेव दीपस्य सुकाचमध्ये
विराजते रम्यतरा पृथक् सा ।।603।।

स्नेहेन पूर्णे हृदये स्वकीये
स रक्षति त्वां हि सदैव बाले ।
तथापि रूक्षेव हि दृश्यसे त्वं
तत्कीदृशोऽयं हि तव स्वभावः ।।604।।



भित्वा हि पादं मम कण्टकेन
सुजीविताहं मरणात्प्रियेण।
निष्कासने तेन च दर्शिता या
भीतिः परं प्रेम सुलक्षितं मे ।।605।।

विस्मृत्य कान्तः स पुनः प्रयाति
तेनैव मार्गेण हि कण्टकानाम् ।
यान्ती च लावण्यवती स्वनासा-
माकुञ्च्य यत्रैव नु सीत्करोति ।।606।।

सुखानि सर्वाण्यति लुण्ठितानि
त्वया ध्रुवं मे हि निषिध्यते किम् ।

विमर्दितैषा विमला सुसाटी
प्रमाणमस्यात्र नु वार्तया किम् ।।607।।

भूषणमिव तव भाले स्वचरणालक्तेन यया रचितम् ।
मन्ये तयैव नयनेऽनुरञ्जिते खलु निजौष्ठरागेण ।।608।।

गता गभीरं हृदि मोहनस्य
बाणाग्रतीक्ष्णेव परन्तु गोपि।
पीडा सपत्नीहृदयेषु तीव्रा
विचित्रमेतत् प्रतिभाति मह्यम् ।।609।।

हयाविवेते प्रबले चले वै
न लोचने मे हि वशे कथञ्चित्।
ह्री-प्रग्रहेणापि मया गृहीते
नूनं बलाद्धावत एव शीघ्रम् ।।610।।

स्वमुद्रिकादर्शतलेऽतिशुभ्रे
लब्ध्वा प्रियं स्वं प्रतिबिम्बितं सा।
तदा परावृत्य सुखस्थितैव
सुनिर्भयं पश्यति चारुनेत्री ।।611।।

भित्वा समूहं नितरां जनानां
प्रतार्य दृष्टीश्च तदा समेषाम् ।
आगत्य चात्रैव गतः कुतोऽसौ
दृष्ट्या च दृष्टिं मम मेलयित्वा ।।612।।

अत्राहमानीय समागता तां
मूलं प्रिया या तव जीवनस्य ।
पश्याद्य सा त्वद्भवनस्य कोणे
सुवर्णयूथीव सुपुष्पिताऽस्ते ।।613।।

यासुधेव मया पूर्वं भाविता दशतीव सा ।
किञ्चित् तिर्यक् कृतेदानीं दृष्टिर्वृश्चिकदंशवत् ।।614।।



त्वया प्रदत्तां हृदयाद्धि मालां
कण्ठार्पितां नैव करोति दूरम् ।
तस्याः सुगन्धिर्नहि काचिदद्य
तथापि मन्ये मनसि स्थिताऽसौ ।।615।।

प्रचुम्बितं पुत्रमुखं हि पत्या
स्नेहाऽन्विताऽभूद् युवती विलोक्य।
आहूय बालं च तया विहस्य
प्रचुम्बितं चुम्बितमाननं तद् ।।616।।

दृष्ट्वाप्यदृष्टं ननु कुर्वती मां
प्रदर्श्य चाङ्गानि निजानि बाला ।
अवेत्य दृष्टां हि मया तदाभूत्
तनौ प्रविष्टेव विलज्जया सा ।।617।।

पक्षौ सुवासांस्युपलानि भोजनं
सार्धं कपोती च सदैव वर्तते।
धन्योऽसि पक्षिन् सुखितश्च सर्वथा
भूमौ त्वमेकोऽसि कपोत! भाग्यवान् ।।618।।

कथं क्षुब्धो भवस्येवं किञ्चिद् वीक्ष्य विचारय।
वृद्धौ रक्षति मर्यादां कस्तडागो नरश्च कः ।।619।।

अयि नन्दनन्दन मम द्रक्ष्यसि यदि कर्म सुष्ठुतया तर्हि ।
अलं हरे न हि कार्यं किञ्चित् कथञ्चन भविष्यति ।।620।।

द्वारं यावद् गते तस्मिन् स्नेहवार्ता रसान्विताः ।
मिथो विरहसन्देशकोट्यः प्रचलिता द्वयोः ।।621।।

श्रुत्वा तदङ्घ्रि ध्वनिमीक्षते सा
स्नान्ती परावृत्य मुखं तदानीम् ।
भीता नता सङ्कुचिता सलज्जा
दृष्ट्यैव बाला हसति स्म किञ्चित् ।।622।।

अन्ध गान्धिक को ग्रामे
ग्राहकस्ते सुगन्धिनः ।
नीत्वा घ्रात्वा प्रशंस्याथ
ते सर्वे मौनमाश्रिताः ।।623।।

प्रातर्मुहूर्तो हि गतः स तस्य
गत्वा मिलित्वा मिलने च भूयः ।
अस्तङ्गतोऽर्को मिलनेन चेत्थं
विश्राम आद्यः स तदा गृहेऽभूत् ।।624।।

रत्नविन्दीं विधायाथ मुखज्योतिर्विराजते ।
कञ्चुकीं परिधायाथ जाता कान्तिश्चतुर्गुणा ।।625।।



निवार्य हास्यं तु निजोष्ठयोः सा
कृत्वा ह्यधस्तान्नयने प्रियोच्चैः ।
हठेन तस्यैव मुखे करेण
ताम्बूलमुत्थाय ददौ प्रियस्य ।।626।।

अर्धनिमीलितयैव दृशा त्वया खलु वशीकृतः कृष्णः ।
अलिमृगखञ्जनमीना कुत्र वराका त उपमार्थम् ।।627।।

स वञ्चको वञ्चयते न कञ्चित्
भवन्ति विज्ञा अपि नूनमज्ञाः ।
विलोक्य नेत्रे सुमनोहरेऽस्य
कोऽसौ मनौ लुभ्यति यस्य नैव ।।628।।

अर्धनिमीलितनयना शिथिलिततनुः पश्यति परावृत्य ।
सालस्योत्थायार्धं शेते लुठत्पथ जृम्भते भूयः ।।629।।

सा रूक्षवाचाऽपि वदेत्तथापि
त्रुटिष्यति प्रेम दृढं न तस्याः ।
तस्यैव मूर्तिर्हृदये निषण्णा
सदा सुदृष्ट्यैव हि लक्षितं मे ।।630।।

आकुञ्च्य नासां च नहीति कृत्वा
ताम्बूलवीटीग्रहणे प्रवृत्ता ।

आदानकाले च तदा प्रियेण
स्पृष्टौ तदौष्ठौ हि करेण तस्याः ।।631।।

तत्पाणिकम्पात्सखि कुङ्कुमं तत्
पतत्यभीक्ष्णं श्रमविन्दुभिश्च ।
मुष्ट्या गृहीतं ह्यवशिष्टमार्द्रं
क्षिप्तं च लग्नं खलु हस्त एव ।।632।।

तिरष्करण्याँश्च निजाङ्गुलीभि-
र्विधाय रन्ध्रं ननु निर्निष्यम् ।
निरीक्षते सा समयाद्धि कस्मात्
पश्याद्य भो कौतुकमत्र किञ्चित् ।।633।।

पाणौ गृहीत्वा हृदये दधाति
ह्यालिङ्ग्य बाह्वोर्निदधाति मूर्ध्नि।
आकुञ्च्य धृत्वा च पुनः पठित्वा
पत्रं पुनश्चुम्बति सा प्रियस्य ।।634।।

विलोक्य जाता चकितेव बाला
प्रश्ने कृते वक्ति च सा कथञ्चित् ।
मन्ये च कुत्रापि नु दृष्टिरस्या
लग्नाथ वास्यां हि कृतोऽपि कस्य ।।635।।



त्याज्यं च किं ग्राह्यमथास्ति किं वा
बहून् विवादान् कुरु सर्वकालम् ।
आस्वादितं किन्तु च यद्धि येन
तस्मै प्रियं वस्तु तदेव नान्यत् ।।636।।

दृग्भ्यां हसन्तौ च विनोदवार्ता-
रसं मिथस्तावनुभूय भूयः।

दूरस्थितौ द्वावपि तौ समीप -
स्थिताविवेत्थं मुदितौ स्वचित्ते ।।637।।

शय्यां स्वापमिषेण सा खलु गता पत्युः प्रिया सुन्दरी
दृष्ट्वा सूक्ष्मतया निवार्यवसनं पत्या शनैस्तन्मुखात् ।
बिम्बोष्ठौ स्फुरतःस्म जातपुलकाया लोचने चञ्चले
प्रोत्फुल्ले मिलिते च देहलतिका स्विन्ना च तस्यास्तदा ।।638।।

शृंङ्गारतः स्याद् यदि देहकान्ती
रुचिर्न पत्युर्मनसश्चकास्ति।
केशाः प्रयत्नैः किल वर्धनीया
नेत्रे कथं वर्धयितुं हि शक्ये ।।639।।

पश्य सदा घनश्यामं विदधातु च मनोमोहने मोहम् ।
विहर कुञ्जविहारिणा धारयोरसि गिरिधरं सततम् ।।640।।

मिषेण सुप्तं ह्यवगम्य चाहं
गत्वा समीपं हि मुखं चुचुम्ब।
क्रुद्धां हसित्वा च समर्प्य कण्ठे
स्थितः स्थिताहं परिवेष्टितेव ।।641।।

समुत्थितौ द्वावपि तौ कथञ्चिद्
प्रियः प्रिया सा च तदा प्रभातो ।
क्षणाच्च कण्ठार्पितबाहुयुग्मौ
निद्रालसौ तौ भवतः स्म भूयः ।।642।।

वार्ता काऽसौ यस्या रसो न नश्यति मिथ्यावादेभ्यः।
नहीति मिथ्याकथनं रत्यारम्भे मुखान्नार्याः ।।643।।

न स्नाति बाला न गृहं प्रयाति
मनो विलग्नं सरितस्तटेऽस्याः।
स्पृष्ट्वा जलं नैव च तत्प्रविश्य
निवर्तते हास्ययुता सकम्पा ।।644।।

चन्द्रानना सा मुखमंशुकेन
पिधाय भीतेव सुमञ्जुदेहा ।
गता चमत्कृत्य यथैव वह्ने-
र्दीप्तिर्गवाक्षे रुचिराऽतिशीघ्रम् ।।645।।



हस्तो यथायाति तथैव मुद्रा
मुद्रा यथा वा खलु सूत्रकर्त्री।
सहैव नारी चलतीव गत्या
चक्रेण सा कान्तिमती प्रवीणा ।।646।।

श्रुत्या बुद्ध्यनुमेयं तद् ब्रह्म सूक्ष्ममलक्षितम् ।
न लक्ष्यते कटिस्तद्वद् अस्थिमात्रं प्रतीयते ।।647।।

पूर्वं मानापराधाभ्यां दृष्टी रूक्षेव या ध्रुवम्।
हसितेव मिलित्वा सा जाता क्रोधो गतस्तयोः ।।648।।

तद्दिव्यसौन्दर्यसुधासवेन
तृप्तो हि मद्यं तु पिबेत्कथं सः।
ओष्ठौ च तस्यासवपात्रलग्नौ
नेत्रे प्रियाया वदने स्थिरे स्तः ।।649।।

कुसुममिव शरीरं मर्दयत्येतदेवं
सुकठिनहृदयो यो निर्दयोऽसौ विधातः।
करमपि हृदि धृत्वा पश्य चास्या इदानीं
धगिति धगितिकृत्वा वेपते कीदृशं तत् ।।650।।

वद कति कुलवध्वो गोकुलेऽस्मिन्न सन्ति
किमपि सदुपदिष्टं स्यान्न याभिश्च भूयः।

तदपि कथय कास्तास्तां समाकर्ण्य वंशीं
नहि निजकुलमार्गाद् याः प्रयाता हि दूरम् ।।651।।

स्फुटं वचस्त्वर्धनिमीलिता दृक्
तनौ च ते स्वेदकणा विशुभ्राः।
पद्माननं तच्च निरीक्ष्य मन्ये
कन्दर्पकान्त्यैव सुसज्जितास्ति ।।652।।

भ्रान्तौ नहि त्वं भगिनीतिनाम्ना
पतान्यथा तेऽस्ति महाविनाशः।
गृद्धस्य नीडे यदि मांसपिण्डः
सुरक्षितः स्यात् स कथं न जाने ।।653।।

रतिसुखमनुभूयाह्लादपूर्णा हि बाला
मम हृदयतटे सा लज्जितेवाशु लग्ना।
किमपि विकचिता सा दृष्टिकान्तिर्नु तस्या
मम मनसि निबद्धा मुच्यते नैव जातु ।।654।।

दक्षासु नैपुण्यमिदं सखीषु
प्रदर्शितं विस्मर नैव किन्तु।
प्रियागमे पुष्पविकासतुल्यो
हर्षः कथं गूहितुमेष शक्यः।।655।।



समागतोऽयं हि सुहृत्प्रवासाद्
उक्तं समाहूय च केनचिद् वै ।

आकर्ण्य ते द्वे हसतः स्म मोदात्
सा तां च तां सा च मिथो विलोक्य ।।656।।

मनोहरोऽप्युज्ज्वलदीपतुल्यो
भवेन्नु देहः सगुणोऽतिरम्यः।
स्नेहो हि यावान् ध्रियते च यादृक्
तावान् प्रकाशो भवतीह तादृक् ।।657।।

उद्भूय पूर्वं नयनच्छदाभ्यां
चक्षुर्जलं पक्ष्मसु वर्धमानम् ।
कपोलदेशाद्धृदये पतित्वा
छण्णेति तच्छुष्यति तत्क्षणेन ।।658।।

अनेन वै निर्दयचातकेन
पुनः प्रदत्तं स्मरणं प्रियस्य ।
श्वासास्तु पूर्वं सखि मन्दतां ये
प्राप्ताःपुनस्तीव्रतरं चलन्ति ।।659।।

कालात्प्रकृत्याः परिवर्तनेन
कस्य प्रकृत्यां परिवर्तनं न ।

कलौ कराले करुणाकरोऽपि
जातोऽस्ति तस्मात्करुणाविहीनः ।।660।।

नेत्रेऽलसेऽस्याः शिथिलश्च देहो
विनापि तत्प्रेम तदा ह्यभूवन् ।
सौभाग्यघोषस्तुमुलोऽत्र लोके
सर्वत्र देशे हि कृतस्तयेत्थम् ।।661।।

न सृष्टं दुःखिनोः किञ्चिदेतयोश्चक्षुषोः सुखम् ।
न दृष्टुं शक्यते ताभ्यां न दृष्ट्वा तेऽतिविह्वले ।।662।।

क्षीणा विधात्रा हि कटिर्विधत्ता
यथा हि नास्त्येव भवेद्धि तत्र।
तत्पूर्तये तेन कृतौ सुपीनौ
मन्ये ह्युरोजावथ तन्नितम्बौ ।।663।।

दन्तक्षतं यद्धि कृतं प्रियेण
निजाधरे पश्यति दर्पणे सा।
उद्घाट्य भूयो दिवसं हि यावद्
स्पृष्ट्वा च दृष्ट्वा च तिरोदधाति ।।664।।

प्रक्षाल्य किञ्चिच्च मुखं जलेन
स्पृष्ट्वा शिरोवस्त्रमथो करेण।



आकुञ्च्य सूच्चैर्निजजानुनी च
बाला त्वहो स्नाति सरोवरेऽस्मिन् ।।665।।

जलार्द्रवासः सदृशः प्रियो मे
यावच्च नालिङ्गति मां निजाङ्गैः।
तावन्न मे याति स देहतापः
शान्तिं कथञ्चित् खलु यत्नकोट्या।।666।।

सतां हि प्रेम गम्भीरं क्षीणं चापि सुशोभते।
शीर्णे सुरञ्जिते वस्त्रे तस्य रागो न हीयते ।।667।।

असह्यदुःखाद् विरहस्य कश्चित्
नान्योऽस्त्युपायः खलु रक्षितुं स्यात्।
तां श्रावयित्वा प्रियनाम भूयः
प्राणाः कथञ्चिच्च भवन्ति रक्ष्याः।।668।।

सकज्जले त्वन्नयने स्थिरे न
दृष्टे मया धावत एव भूयः।
बाले न चैते चलतः सुमार्गे
वदाद्य कं वञ्चयितुं प्रवृत्ते।।669।।

अस्माद्धि जालान्नु विनिर्गतः कः
पर्याकुलः किं नितरां कुरङ्ग ।

यथा यथा वाञ्छसि धावितुं भो
भविष्यसि त्वं ग्रथितस्तथैव ।।670।।

त्यजाधुना त्वं खलु यत्न नाम
समागतः श्रावणमास एषः ।
अतो निवासः सरलो न चास्मिन्
कदम्बपुष्पोद्भव रम्यगन्धे ।।671।।

मुक्ताफलानि शोभन्ते कर्णाभूषणयोस्तथा।
मन्ये कपोलसंस्पर्शाज्जाता स्वेदकणा इमे ।।672।।

चन्द्रिकायाञ्च छायायां देहौ सम्मिलितौ द्वयोः।
राधाकृष्णौ मिलित्वैवं सदैव पथि गच्छतः ।।673।।

अहो विधातर्नु कियान् हि मानः
क्षीणे शरीरे विधृतोऽस्ति येन।
यत्पादपातादपि पश्य नास्य
कथञ्चिदेषोज्झति कोऽस्त्युपायः ।।674।।

मयूरचन्द्रिके गर्वं गत्वा शिरसि किं हरेः।
करोषि राधिकामानं श्रुत्वा यास्यसि पादयोः ।।675।।

कथं स्यान्नैतयोः प्रेम गम्भीरं चिरजीविनोः।
सा वृषभानुजा ख्याता सोऽयं हलधरानुजः ।।676।।



अन्या गतिस्ते वचनानि नून-
मन्यानि कान्तिश्च मुखस्य सान्या।
प्रतीयते चित्तगता स्वपत्यु -
र्भ्रूचालनं त्वं हि वृथा करोषि ।।677।।

भाले विन्दुश्च ताम्बूलमानने मूर्ध्नि कुन्तलाः।
अञ्जनं नेत्रयोश्चैवं शृङ्गारोऽस्याः स्वभावजः ।।678।।
दर्पणमिव तद्गात्रं विभान्त्याभूषणानि प्रत्यङ्गम्।
प्रतिबिम्बितानि तत्र द्वित्रिचतुर्गुणानि जायन्ते ।।679।।

घनं निकुञ्जं सुखदा च छाया
मन्दः सुगन्धिस्तरलः समीरः।
अद्याधुनाहं रमणीयमालि
स्मरामि चित्ते यमुनातटं तत् ।।680।।

पश्यैकवारं सखि तं गवाक्षाद्
सद्योऽनुरक्तैव भविष्यसि त्वम् ।
रूपं मनोहारि च तस्य नूनं
नेत्रे त्वदीये रसिकेऽतिरम्ये ।।681।।

भ्रूभ्यां भृशं भर्त्सयते मुखात्सा
निषिध्य मां वेष्टयतीव दृष्ट्या ।
एकत्र सा मोचयतीव हस्त-
माकर्षिताऽऽयाति च मत्समीपम् ।।682।।

सङ्कीर्णकुञ्जाध्वनि मन्दगत्या
दोलायमानः पवनस्तुरङ्गः।
गतागतं संविदधन् प्रमत्तः
पुनःपुनर्मां हि रुणद्धि धूर्तः।।683।।

लवङ्गं ललितं बाले नासायां नैव धारय।
शङ्का भवति यन्नासा कोपादुच्चैः कृता भवेत् ।।684।।

निषेधेऽपि हठादेषा शङ्कते नैव चञ्चला।
बलात्कटिर्द्विरावृत्ता दोलायां त्रुटितेव च ।।685।।

आकुञ्च्य केशान् परिवर्त्य बाहू
वासः समाकृष्य पृथक् च मूर्ध्नः।
वेण्याश्च बन्धे खलु कस्य चैषा
सखि प्रबध्नाति मनश्चलं न ।।686।।

पृष्टा कथं वा परुषं ब्रवीषि
स्नातासि तत्स्नेहरसेऽनुरागात् ।
कान्तौ विमुग्धा सखि मोहनस्य
रोमाञ्चिता पश्य तनुस्तवेयम् ।।687।।

पीताम्बरं श्यामतनौ धृतं यन्
मनोहरं भाति हि माधवस्य ।



मन्ये प्रभाते नवसान्द्रनील-
रत्नाचले भास्वर आतपोऽयम्।688।।

रक्ते च विन्दौ ललिते हि भाले
शुभाक्षता भान्ति सखे विशुभ्राः।
राहोर्बिभीता प्रपलाय्य मन्ये
भौमे गताश्चन्द्रकला मनोज्ञाः।।689।।

ज्वाला हि सौन्दर्यभवाः समन्तात्
तस्याः शरीरात्प्रभवन्ति नित्यम् ।
तस्मात्तु तन्वी ह्यतिनिर्बलाऽपि
प्रतीयते पुष्टतरा निजाङ्गैः।।690।।

गर्भभारेण खिन्नाया दृष्टिरर्धनिमीलिता ।
सुरतानन्दसम्भोगाच्छ्रान्तदेहेव दृश्यते।। 691।।

( शिथिलमिव शरीरं गर्भभाराच्च नेत्रे
स्थिर इव च तदर्धोन्मीलिते दुःखितायाः।
सुरतसुखमिदानीं सानुभूयेव मग्ना
नवकमलदलाङ्गी सद्य एवेति मन्ये। 691।)

स्नात्वा सरोवरे सार्द्रवस्त्रा सङ्कुचितेव च।
कुचयोः कृतहस्ता च हसन्ती याति तत्तटम् ।।692।।

सौकुमार्यं च गन्धश्च वर्णश्च मिलितास्तथा।
स्थलपद्मदलं गात्रे धृतं किञ्चन्न ज्ञायते ।।693।।

सुन्दर्याः स्वर्णवर्णाभ-देहे चम्पकमालिका।
म्लानैव ज्ञायते नूनं नान्यथा हृदि संस्थिता ।।694।।

गोवर्धन त्वं हृदयेऽतिहर्षं
निधेहि तावत् खलु पूज्यमानः।
पश्चात् पशूनाञ्च खुरैः स्वमूर्ध्नि
नूनं सखे ज्ञास्यति तच्च सर्वम् ।।695।।

क्षालयति मुखं तीरे घर्षति पादौ विलोडयति नीरम् ।
हसतीन्दीवरनयना विशति न यमुनाजले मुग्धा ।।696।।

बाहुमूलं चारु गौरं कुचाग्रौ च पटाद् बहिः ।।
उच्चैः पुष्पाणि चिन्वन्त्या लुण्ठन्ति स्म मनो बलात् ।।697।।

नहि नहि दधिभाण्डं स्थापनीयं ततो वा
नहि च तदवतार्यं सुन्दरि प्रार्थये त्वाम् ।
अलमतिललितं ते दृश्यते रूपमस्यां
त्वमसि यदि गृहीत्वा संस्थिता शिक्यमेतत् ।।698।।



प्रियेणैवं निजौष्ठाभ्यां पिबता धूम्रवर्तिकाम् ।
सभ्रूभङ्गं हसित्वैवं किं न पीतं मनो मम।।699।।

राधाकृष्णप्रसादेन जयशाहाज्ञया तथा
कृता सप्तशती चेयं रसपूर्णा विहारिणा ।।700।।